A DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS

IN THE

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS.

BY

M. RANGACHARYA, M.A., RAO BAHADUR,
PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE;
CURATOR, GOVERNMENT ORIENTAL MSS. LIBRARY; AND
REGISTRAR OF BOOKS, MADRAS.

Prepared under the orders of the Government of Madras.

VOL. XV.—RELIGION—*continued.*

MADRAS:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.

[PRICE 1 *rupee* 12 *annas.*] 1913. [2 *shillings* 9 *pence.*]

Venus Opala
Charlar

Venus pala
Charlar

Venus Opala Charlar

6. MANTRAKALPA—(*continued*).

6. MANTRAKALPA—(*continued*).

6. MANTRAKALPA—(*continued.*)

6. MANTRAKALPA—(*continued.*)

A DESCRIPTIVE CATALOGUE
OF THE
SANSKRIT MANUSCRIPTS.

VOLUME XV.

CLASS VIII.—RELIGION—(*continued*).

(6) MANTRAKALPA

No. 7730. अघोरकल्पः.
AGHŌRAKALPAḤ.

Pages, 31. Lines, 6 on a page.

Begins on fol. 79*a* of the MS. described under No. 2848.

Complete.

On the details of procedure to be adopted by a person who wants to repeat religiously the Aghōranṛsiṁha-mantra which is intended to be used for the destruction of evil spirits.

Beginning:

अथाघोरनृसिंहविधानं लिख्यते—

प्रथमं ग्रामदेवानां प्रीतिं कृत्वा यथोचितम् ।
अनन्तरं ग्रहग्रस्तमभिषेकं तु कारयेत् ॥

भास्करस्य नमस्कारं क्रियतामयुतं तथा ।
सिद्धमन्त्रस्सदाचारः कृत्वाश्वत्थप्रदक्षिणम् ॥

भौमार्कसितवारेषु भूतकर्म समाचरेत् ।
कल्पोक्तविधिना तूर्णं कुम्भस्थापनमाचरन् ॥

End:

त्रिकोणमादौ संलिख्य तन्मध्ये क्ष्रौं समालिखेत् ।
साध्येन परितो वेष्ट्य यन्त्रनायं(थं)समालिखेत् ॥

Colophon:

इति अघोरनृसिंहकल्पे भूतनिग्रहप्रकारः संपूर्णः ॥

बीजं क्ष्रौं, प्राणः यं, शक्तिः ह्रीं इं ईं, वश्यं क्लीं, गायत्री—तीक्ष्णदंष्ट्राय विद्महे वज्रनखाय धीमहि । तं नो नृसिंहः प्रचोदयात् ॥

मूलमन्त्रपूजायन्त्रप्राणप्रतिष्ठा ॥

No. 7731. अघोरास्त्रानुष्ठानविधिः

AGHŌRĀSTRĀNUṢṬHĀNAVIDHIḤ.

Pages, 7. Lines, 16 on a page.

Begins on fol. 89*a* of the MS. described under No. 424.

Complete.

On the details of procedure to be adopted by a person desirous of using the Aghōrāstramantra with the object of destroying his enemies.

Beginning:

प्रातरुत्थाय शिरसि शिवमयं श्रीगुरुं ध्यात्वा, तीर्थं गत्वा, मूलेन त्रिवारमभिषिञ्चन् स्नात्वा, पादौ प्रक्षाल्य, आचम्य, विशुद्धस्सन् रक्तवस्त्रधरो मौनी मन्त्राभिमन्त्रितभस्माभिरुद्धूल्य, त्रिपुण्ड्रधरः शुद्धमासनमास्थाय, प्राङ्मुखम् उपविश्य च गुर्वादिवन्दनं कृत्वा, शोषणादिभिः शरीरशुद्धिं विधाय, मातृका विन्यस्य, गालवऋषये नमः, बृहतीछन्दसे नमः, त्रिपुरान्तकरुद्राय नमः, इति शिरोमुखहृदयेषु विन्यस्य, फट् बीजं, हुं शक्तिः, इति शक्तिबीजावनुस्मृत्य ।

End:

ध्यात्वा संपूजयेन्मन्त्री सर्वशत्रुनिवारणात् । एवं ध्यात्वार्चयेत् । अथ चतुर्थावरणे द्वादशारस्य बहिर्लम्बषोडशारस्य पूर्वादिदिग्विदिक्पत्रेषु

वज्राय नमः, शक्त्यै नमः, दण्डाय नमः, खड्गाय नमः, पा शा नमः, ध्वजाय नमः, गदायै नमः, त्रिशूलाय नमः ।

द्विनेत्रा द्वि(भु)जास्सर्वे तत्तदायुधधारिणः ।
शुचिमुद्रासमायुक्तास्स्वचेष्टाभिस्समन्विताः ॥

पुनरपि षोडशारस्य दिग्विदिगन्तरमध्ये पत्रेषु क्रमेण चार्चयेत् ॥

No. 7732. अजपाकल्पः.

AJAPĀKALPAḤ.

Pages, 7. Lines, 10 on a page.

Begins on fol. 187*a* of the MS. described under No. 124, wherein for Ajapāmantra 189*a* read Ajapākalpa 187*a*.

Complete.

The copying of this manuscript was done by Sītārāma, and completed on Wednesday the 10th Bahula of Adhikāṣāḍha in the year Sādhāraṇa.

Lays down details in connection with the use of the Ajapāgāyatrīmantra.

Beginning:

संसारपारदं वन्दे सर्वसन्देहनाशनम् ।
तारकं ब्रह्मदातारं गुरुं विश्वेश्वरं मुदा ॥

ओं नमः परदेवतायै ।

सच्चिदानन्दरूपाय गुरवे सर्वसाक्षिणे ।
नमः स्वानन्दकन्दाय शङ्करानन्दमूर्तये ॥

*　*　*　*

ध्यात्वैवं मनसाभ्यर्च्य समाहितमनास्स्वयम् ।
ततस्तमजपारूपमात्मचिन्तनमारभेत् ॥
अजपाराधनं देवि कथयामि तवानघे ।

*　*　*　*

अस्य श्रीअजपानामगायत्रीमन्त्रस्य हंस ऋषिः, अव्यक्तगायत्री छन्दः, परमहंसो देवता ।

End:

हं सः सो हमिति भाव्य सो हं व्यञ्जनहीनतः ।
पक्षां(क्षान्) संहृत्य चात्मानं मन्दरूपं विभावयेत् ॥
अजपा नाम गायत्री त्रिषु लोकेषु दुर्लभं(भा) ।
अजपां जपतो नित्यं पुनर्जन्म न विद्यते ॥
षट्छतान्यधिकान्यत्र सहस्राण्येकविंशतिः ।
अहोरात्रं चरेद्वायुः स जपो मोक्षदायकः ॥

इति अजपासंकल्पं कृत्वा निवेद्य प्रार्थयेदवश्यकृत्त्वात् ॥

No. 7733. अजपागायत्रीविधानम्.

AJAPĀGĀYATRĪVIDHĀNAM

Pages, 9. Lines, 5 on a page.

Begins on fol. 4*a* of the MS. described under No. 5362, wherein it has been omitted to be given in the list of other works.

For Viśvāmitrasaṁhitā 4*a*, in the list of other works given therein, read Viśvāmitrakalpa 10*a*.

Complete.

Similar to the above.

Beginning:

अथ सूर्योदयमारभ्य श्व(श्वः)सूर्योदयपर्यन्तमहोरात्रयोः श्वासनिश्श्वासाभ्यां षट्शताधिकमेकविंशतिसहस्रमजपागायत्रीजपमहं करिष्ये । . . .

मूलाधारमण्टपे चतुर्दलपद्मकर्णिकामध्ये स्थिताय वरुणवर्णाय पुष्पकशक्तिसहिताय गणाधिपतये षट्छतमजपागायत्रीमन्त्रजपमहं निवेदयामि ।

End:

देहो देवालयः प्रोक्तो जीवो देवस्सनातनः ।
त्यजेदज्ञाननिर्माल्यं सोऽहंभावेन पूजयेत् ॥

द्वादशवारं निरञ्जनगायत्रीं जपेत् । ततो हंसगायत्रीं जपेत् ॥

Colophon:

इत्यजपागायत्री(विधानं)सम्पूर्णम् ॥

No. **7734.** **अथर्वणमन्त्रपञ्चकम्.**

ATHARVAṆAMANTRAPAÑCAKAM

Pages, 8. Lines, 6 on a page.

Begins on fol. 87*a* of the MS. described under No. 347, wherein it is given as Tryambakamantravyākhyāna.

Complete.

An explanation of the Trayambaka, Vāiṣṇava, Śaiva, Saura and Gaṇapati Mantras which occur in the Tripurōpaniṣad and Tripurātāpanīyōpaniṣad.

Beginning:

विद्महे मन्त्ररौद्रमधीमहि । तन्नः शक्तिः प्रचोदयात् । इत्यनेन कुमार्यर्चनं कृत्वा यो वै साधकम(कोऽ)भिलषति सोऽमृतत्वं च गच्छति शिवं स प्राप्नोति परमायुषमवाप्य परब्रह्म भित्वा तिष्ठति य एवं वेदेति महोपनिषत् ।

देवा ह वै भगवन्तमब्रुवन् देवीगायत्रीहृदयं लोका(नो व्या) ख्यातं त्रैपुराष्टकं यन्त्रं दृष्ट्वा मुच्यते संसारबन्धनात् । इत्येवं पृच्छतां सर्वेषां देवानामित्येवं विश्वत्यथातोऽयन्त्रियम्बकेणानुष्टुभेन मृत्युञ्जयं दर्शयति त(क)स्मात् त्रियम्बकमिति त्रयाणां पुराणामम्बकं स्वामिनं तस्मादुच्यते त्रियम्बकमिति ।

End:

सामगायने अथर्वेयमन्या च विद्या इति त्रिपुरुषो(रो)पनिषत्त्रिपुरोपनिषन्त्रीणि ।

अतिगुह्यतमा प्रोक्ता न देया यस्य कस्यचित् ।
दातव्या तु सदा तस्मै भक्तिश्रद्धानुकारिणे ॥
यस्य नो पश्चिमं जन्म यदि वा शङ्करस्स्वयम् ।
तेनैव लभ्यते विद्या श्रीमत्पञ्चदशाक्षरी ॥

य एवं वेदेत्युपनिषत् ॥

Colophon:

इति मन्त्रपञ्चकं समाप्तमाथर्वणे ॥

No. **7735.** अनसूयामन्त्रोद्धारः.

ANASŪYĀMANTRŌDDHĀRAḤ.

Pages, 3. Lines, 9 on a page.

Begins on fol. 9*a* of the MS. described under No. 5868.

Complete.

On the order or arrangement of the letters forming the Anasūyāmantra.

Beginning:

सर्वज्ञ भगवन् शम्भो दत्तात्रेयस्य योगिनः ।
अष्टमन्त्रा निकथि(गदि)तास्साङ्गं करुणया त्वया ॥
शीघ्रसिद्धिर्भवेत्तेषां केनोपायेन तद्वद ।

ईश्वर उवाच—

साधु पृष्टं त्वया देवि त्वादृशी धीमती न हि ।
अस्ति किंचिद्रहस्यं मे तद्वक्ष्ये श्रूयतां त्वया ॥
सप्तकोटिमहामन्त्रान् प्रकाशय यथाविधि ।
अनसूयामनुं ब्रूहि कस्मैचिदपि पार्वति ॥

* * * *

शम्भुः—

मन्त्रोद्धारं प्रवक्ष्यामि शृणु पार्वति यत्नतः ।
आदौ समुद्धरेज्जीवं बीजरूपं वदामि ते ॥
जीवोपरि प्राणबीजं ततो दीर्घमहेन्दुयुक् ।

End:

उदङ्मुखस्तु मध्याह्ने निशायां दक्षिणामुखः ।
अज्ञं कर्माणि लुम्पन्ति तद्दुष्कमैव लुम्पते ॥

करे तु नश्यते तैलं जिह्वायां तु न खिद्यते ।
आत्मविज्ञानिनामियं द्रष्टुं शक्या स(ह्यु)पासिता ॥

No. 7736. अभिषेककल्पः.
ABHIṢĒKAKALPAḤ.

Pages, 14. Lines, 6 on a page.

Begins on fol. 119*a* of the MS. described under No. 673.

Complete as found in the 16th Udrēka occurring in the second part of the Mantrakhaṇḍa of the Parānandatantra.

On the rites to be performed by a Guru in relation to a properly chosen disciple, so as to initiate him completely into true Śaivism.

Beginning:

अथातस्संप्रवक्ष्यामि देवि संक्षेपतश्शृणु ।
वेदाभ्यासैकनिरतं शाम्भवीभक्तिसंयुतम् ॥
कुलनिष्ठापरं शान्तं कुर्वीत ज्ञानतत्परम् ।
एवंप्रकारकं शिष्यं प्रगृह्णेद्गुरुपुङ्गवः ॥

* * * *

ततो गुरुः प्रसन्नात्मा दृष्टिबन्धं विसर्जनं(यन्) ।
पश्चिमं कुम्भमाहृत्य शिष्यं तेनाभिषेचयेत् ॥
चक्रश्च(श्च)पुरतो देवि शिवं दद्याद्विचक्षणः ।

End:

शिष्यस्य नाम कर्तव्यं नाथ नाथेति च प्रभुः ॥
पूर्णदीक्षाक्रमं देवि यस्य कस्यापि नोच्यते ।
द्वादशाब्दक्रमं तस्य परीक्ष्य क्रममुच्चरेत् ॥
पूर्णदीक्षा क्रमं सम्यक् मया किञ्चित्प्रकाशिता ।
समासेन वरारोहे किं भूयश्श्रोतुमिच्छसि ॥

Colophon:

इति श्रीपरानन्दतन्त्रे सपादलक्षग्रन्थे मन्त्रखण्डे द्वितीयपादे महादीक्षाक्रमो नाम षोडशोद्रेकं(कः) समाप्तः ॥

No. 7737. अन्नपूर्णामन्त्रकल्पः.
ANNAPŪRṆĀMANTRAKALPAḤ.

Pages, 7. Lines, 14 on a page.

Begins on fol. 100*b* of the MS. described under No. 5673, wherein this is given as Annapūrṇāmantra in the list of other works.

Complete.

This is contained in the 19th and 20th Kalpas in the Tripurāsiddhānta.

On the ceremonial details connected with the repetition of the Annapūrṇā-mantra which is considered to have the power to confer on one everything which one may desire.

Beginning:

श्रीदक्षिणामूर्तिरुवाच—

अन्नपूर्णामनुं वक्ष्ये विद्याप्रत्यङ्गमीश्वरि ।
यस्य स्मरणमात्रेण अलक्ष्मीर्नाशमाप्नुयात् ॥
प्रणवं पूर्वमुच्चार्य मायां श्रियमथोच्चरेत् ।

End:

अन्नपूर्णेश्वरी देवी देवता प्रोच्यते बुधैः ।
मायाबीजं बीजमाहुर्लक्ष्मीश्शक्तिरितीरिता ॥
कीलकं मदनं प्राहुर्मायया न्यासमाचरेत् ।

* * * *

एवमावरणोपेतां बिन्दुस्थां परमेश्वरीम् ॥
अन्नपूर्णामहं वन्दे भक्तानामिष्टदायिनीम् ।
इत्येतदन्नपूर्णायाः कथितं पूजनं शुभम् ॥
सर्वान् कामानवाप्नोति शीघ्रमेव नरोत्तमः ।
देवीसामीप्यमाप्नोति सोऽन्तकाले न संशयः ॥

Colophon:

इति श्रीत्रिपुरासिद्धान्ते अन्नपूर्णेश्वरीपूजाविधानं नाम विंश कल्पः ॥

No. 7738. अन्नपूर्णामन्त्रकल्पः.
ANNAPŪRṆĀMANTRAKALPAḤ.

Pages, 7. Lines, 19 on a page.

Begins on fol. 123*b* of the MS. described under No. 2373, wherein it is given as Annapūrnādhyāna in the list of other works.

Complete as found in the 19th and 20th Kalpas of the Tripurāsiddhānta.

Same as the above

No. 7739. अन्नपूर्णेश्वरीमन्त्रकल्पः.
ANNAPŪRṆĒŚVARĪMANTRAKALPAḤ.

Substance, paper. Size, 9⅜ × 7½ inches. Pages, 25. Lines, 16 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 103*b*. The other works herein are Śarabhakālikāpratyaṅgirāgama 1*b*, Vaśyāñjanādiprayōga 18*a*, Pratyaṅgirāprayōga 26*a*, Mahālakṣmīratnakōśa 34*b*, Śarabhakālikātantra 48*a*, Pratyaṅgirāsūktaprayōga 71*b*, Pītāmbarāpaddhati 75*a*, Bagalāprayōga 79*a*, Navarātrīkalpa 81*b*, Bagalākalpa 83*b*, Bagalāpūjākrama 96*a*.

Kalpas from 6 to 9 and 11 and 12 complete; 13th incomplete; there is no 10th Kalpa; the names of the Kalpas are given below:—

६. अन्नपूर्णादिनार्चनम्.	११. अन्नपूर्णामन्त्रप्रयोगः.
७. कामधेनुस्तोत्रम्.	१२. पूजाविधानम्.
८. पूजाप्रकरणम्.	१३. संविन्माहात्म्यम्.
९. अन्नपूर्णास्तोत्रम्.	

Similar to the above.

Annapūrṇēśvarī is the same goddess as Annapūrṇā.

Beginning:

अस्य श्रीअन्नपूर्णेश्वरीमन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीअन्नपूर्णेश्वरी देवता; ह्रीं बीजं, श्रीं शक्तिः, क्षं कीलकं, मम श्रीअन्नपूर्णाप्रसादसिद्ध्यर्थे जपे विनियोगः ।

* * * *

ओं ह्रीं श्रीं क्लीं ऐं नमो भगवति महेश्वरि अन्नपूर्णे स्वाहा ।
अन्नपूर्णाविशेषदिवसार्चनम्—

ईश्वरी उवाच—

भगवन् देवदेवेश सर्वज्ञ करुणानिधे ।
ब्रूहि मे परमेश्वर्या विशेषादिवसार्चनम् ॥

ईश्वर उवाच—

शृणु पार्वति वक्ष्यामि विशेषदिवसार्चनम् ।
यस्य स्मरणमात्रेण बुद्धिस्वास्थ्यं प्रजायते ॥
उत्तमा नित्यपूजा स्यान्मध्यमं पक्षपूजनम् ।
मासपूजाधमा देवि तदूर्ध्वं निष्फलं भवेत् ॥

* * * *

इति त्रिपुरासिद्धान्ते सिंहासनविद्यातन्त्रे अन्नपूर्णादिनार्चनं नाम षष्ठः कल्पः ॥

End:

स लभेदन्नपूर्णायाः पूजाफलमनुत्तमम् ।
नित्यं मिष्टान्नमाप्नोति त्रैलोक्येनाति(पि)दुर्लभम् ॥
लभते महतीं लक्ष्मीं दैवतैरपि दुर्लभाम् ।
लोकत्रयं वशीकुर्याल्लभेत्पुत्राननुत्तमान् ॥
सर्वान् प्रियानवाप्नोति शीघ्रमेव नरोत्तमः ।
देवीसाहाय्यमाप्नोति वान्ते काले न संशयः ॥

Colophon:

इति श्रीत्रिपुरासिद्धान्ते अन्नपूर्णेश्वरीपूजाविधानं नाम द्वादशः कल्पः ॥

श्रीदक्षिणामूर्तिरुवाच—

शृणु देवि प्रवक्ष्यामि गोप्यमन्यसुदुर्लभम् ।
कलञ्जचूर्णमाहात्म्यं महापातकनाशनम् ॥

* * * *

मर्त्येनानेन सदृशस्साक्षात् परशिवस्स्वयम् ।
नान्यो देवो मनुष्यो वा समोऽनेन महेश्वरि ॥
शुचिस्सदायं विज्ञेयः स्नानादप्यधिकश्शिवे ।
चण्डालस्पर्शनं कृत्वा भुक्तोच्छिष्टेन संयुतः ॥
विष्ठानुलिप्तदेहश्च मन्त्रेण च समन्वितः ।
कलञ्जं भक्षयेद्यस्तु गङ्गास्नानसहस्रकम् ॥

No. 7740. अपामार्जनकल्पः.
APĀMĀRJANAKALPAḤ.

Pages, 3. Lines, 19 on a page.

Begins on fol. 1*b* of the MS. described under No. 2886, wherein this is given as Apāmārjana in the list of other works.

Complete.

This Kalpa forms the 29th Adhyāya of the Viṣṇudharmōttara, wherein Pulastya teaches Dālbhya the Apāmārjana-mantra addressed to Viṣṇu, and gives all the necessary details connected with it. He says therein that it is the best remedy for counteracting poison and various kinds of dire diseases and evil spirits.

Beginning:

श्रीदाल्भ्य उवाच—

भगवन् प्राणिनस्सर्वे विषरोगाद्युपद्रवैः ।
दुष्टग्रहोपघातैश्च(सर्व)कालमुपद्रुताः ॥
आभिचारिककृत्याभिस्सर्वरोगैश्च दारुणैः ।
सदा सम्पीड्यमानास्तु तिष्ठन्ति मुनिसत्तम ॥
येन कर्मविपाकेन विषरोगाद्युपद्रवाः ।
न भवन्ति नृणान्तन्मे यथावद्वक्तुमर्हसि ॥

पुलस्त्य उवाच—

व्रतोपवासैर्ये विष्णुं नान्यजन्मनि तोषिताः ।
ते नरा मुनिशार्दूल ग्रहरोगादिपीडिताः ॥

* * * *

श्रोतुकामो हि वै दाल्भ्य शृणु त्वं सुसमाहितः ।
अपामार्जनकं वक्ष्ये न्यासपूर्वमिदम्परम् ॥
गृहीत्वा तु समूलाग्रान् कुशान् शुद्धानुपस्थितान् ।
स्थापयेत्सर्वगात्राणि कुशाग्रैर्दाल्भ्य शुद्धिकृत् ॥

End:

वाराहं नारसिंहञ्च वामनं विष्णुमेव च ।
स्मरन् जपेदिदं स्तोत्रं सर्वदुःखोपशान्तये ॥

Colophon:

इति विष्णुधर्मोत्तरे दाल्भ्यपुलस्त्यसंवादे अपामार्जनकं नाम एकोनत्रिंशोऽध्यायः. ॥

No. **7741.** अमृतमृत्युञ्जयकल्पः.

AMṚTAMṚTYUÑJAYAKALPAḤ.

Pages, 19. Lines, 18 on a page.

Begins on fol. 121*a* of the MS. described under No. 5574, wherein it is given wrongly as Amṛtamṛtyuñjayamantra in the list of other works.

The manuscript contains Adhyāyas 96 and 99 to 101 of the Ākāśabhairavakalpa, wherein details regarding the number of times and the manner of repetition of the Amṛtamṛtyuñjayamantra are given. This Mantra is considerd to be efficacious in saving one from the immediate danger of death and in securing the accomplishment of one's desires.

Beginning:

कैलासशिखरे रम्ये नानासिद्धनिषेविते ।
मुनिसङ्घसमाकीर्णे योगिबृन्दनिषेविते ॥
प्रणम्य विधिवद्देवमिदं देव्यब्रवीद्वचः ।

श्रीदेव्युवाच—

देवदेव जगन्नाथ त्रिगुणातीत शङ्कर ।
ज्ञानमूर्ते परन्धाम विद्यानाथ नमोऽस्तु ते ॥

* * * *

महामृत्युञ्जयं मन्त्रं साक्षात्परशिवात्मकम् ।
रोमशेन वसिष्ठेन नारदेन महात्मना ॥
शुकेन ऋषिमुख्येन विश्वामित्रेण धीमता ।
गौतमेन ऋषीन्द्रेण देवेन्द्रेण च भास्करैः ॥
उपासितो मन्त्रराजस्सर्वसिद्धिप्रदायकः ।
अप्रकाश्यमिदं देवि गुह्याद्गुह्यतरं परम् ॥

End:

इमं मन्त्रं गुरोर्लब्ध्वा सुमुहूर्ते शुभे दिने ।
पुरश्चर्यां प्रकुर्वीत लक्षत्रयमतन्द्रितः ॥
ततः प्रयोगान् कुर्वीत यथावद्विधिचोदितम् ।

Colophon:

इति श्रीमहाशैवतन्त्रे आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे शङ्करेण विरचिते अमृतमृत्युञ्जयमन्त्रोद्धारो नाम एकोत्तरशततमोऽध्यायः ॥

No. 7742. अरपटम्.

ARAPAṬAM.

Pages, 2. Lines, 19 on a page.

Begins on fol. 37*a* of the MS. described under No. 2886

Complete.

On the nature of the suitability of certain Mantras in relation to certain persons possessing certain specified names: on also in what month and under what lunar asterism the practice of repeating the Mantra should be commenced and on the manner of repeating it so that it may quickly prove efficacious.

Beginning:

अवर्णपूर्वनामकानामिकारङकारधकारहकारपूर्वकास्सर्वेऽपि मन्त्राः कोष्ठऋणनक्षत्रराशिभूतप्रकारपञ्चकेन मित्रवदेव सार्वकालं स्वेन सह स-

र्वीर्थसाधका भवन्ति। मातृकागणनापक्षे त्वस्य सर्वाण्येवाक्षराणि मित्राणि। मूढतमस्य पश्चैव साधकाः। अकारस्य त्वाकारमात्रम्।

End:

एवमनुलोमविलोमक्रमेण मातृकाक्षमालया जपः कर्तव्यः। एवं जपतः सर्वे मन्त्रा झटिति सिध्यन्ति। अथ शूलिनीकल्पे तु मातृकाक्षरैर्नानाविधौ कालभेदेन बिन्दुसाहित्यराहित्यमेर्वक्षरविशेषश्चोक्तः।

* * * *

बैन्दव्यां बिन्दुसंसर्गायां बिन्दुवर्णं परित्यजेत्। स्थानीयत्वेनेति शेषः॥

No. 7743. अश्वारूढाकल्पः.

AŚVĀRUḌHĀKALPAḤ.

Pages, 2. Lines, 19 on a page.

Begins on fol. 17*a* of the MS. described under No. 2886, wherein this is given as Aśvārūḍhāviṣaya in the list of other works.

Complete.

On certain ritualistic and other details connected with the conduct of worship of the goddess Aśvārūḍhā who is a manifestation of Śakti conceived as riding on a horse.

Beginning:

अथ अश्वारूढापूजां वक्ष्ये—

आं हृदयाय नमः, श्रीं शिरसे स्वाहा, क्रों शिखायै वौषट् एह्येहि कवचाय हुं, परमेश्वरि नेत्रत्रयाय वौषट्, स्वाहा अस्त्राय फट्, शक्तिः ऋषिः, गायत्री छन्दः, एवं षडङ्गमृष्यादीनि च विन्यस्य।

अश्वारूढा कराग्रे नवकनकमयीं वेत्रयष्टिं दधाना
दक्षा . . . . . तनुलता पाशहस्ता स्वसाध्या।
देवी नित्यं प्रसन्नाननशशधरबिम्बाभिरामा त्रिनेत्रा
दद्यादाद्यानवद्या प्रवरसुखफले प्रासिहृद्या श्रियं वः॥

एवं ध्यात्वायुतं जप्त्वा आज्येन दशांशं जुहुयात्। शक्तिपीठे अश्वारूढामावाह्य पूजयेत्। तद्यथा गुं गुरुभ्यो नमः, पं परमात्मने नमः, जयायै नमः, विजयायै नमः।

End:

ताम्बूले त्रिकोणं विलिख्य, तत्त्रिकोणे साध्यसहितं स्मरबीजं शक्तिबीजं वा विलिख्य, तद्बीजस्य परतः पञ्चबाणबीजानि विलिख्य, तन्त्रिकोणे साध्याया वराङ्गं संस्मृत्य, तत्कोकिलाक्षकण्टकेन वेष्टयेत्। जप्त्वा सा (तां)कामातुरवशमानयेत्॥

Colophon:

एवमश्वारूढाविधिः॥

No. 7744. अष्टमुखनृसिंहयन्त्रम्.
AṢṬAMUKHANṚSIṀHAYANTRAM.

Pages, 2. Lines, 19 on a page.

Begins on fol. 19*b* of the MS. described under No. 2886, wherein this has been omitted to be included in the list of other works.

Complete.

On the manner of consecrating a metallic plate with mystic diagrams thereon relating to Aṣṭamukhanṛsiṁha. The wearing of such a consecrated metallic plate is considered to have the power to enable a person to acquire wealth and to come off victorious from the battle field.

Beginning:

अथ यन्त्रम्—

ऊर्ध्वं दश रेखाः, तिर्यक् सप्त रेखाः, चतुष्पञ्चाशत्कोष्ठेऽपि, मूलमन्त्रेण विलिखेत्। रेखाग्रे शूलान् विलिखेत्। शूलाग्रे स्वाहाद्वयम्। बीजं सर्वशूलाग्रे विलिखेत्।

End:

तत्र तत्रार्थलाभं च समरे विजयप्रदम्।
निश्चयं ब्रूम ते वत्स निर्णयं यत्न इत्यपि॥

Colophon :

इति अष्टमुखनृसिंहस्य यन्त्रं समाप्तम् ॥

No. 7745. अष्टास्यगण्डभेरुण्डनृसिंहदिग्बन्धनम्.
ASTĀSYAGAṆḌABHĒRUṆḌANṚSIṂHADIG-BANDHANAM.

Pages, 2. Lines, 19 on a page.

Begins on fol. 18*b* of the MS. described under No. 2886, wherein this has been apparently omitted to be included in the list of other works.

Complete.

Describes how to cast a magic spell over the various quarters with the help of the Aṣṭamukhanṛsiṃha-mantra so as to enable a person to accomplish his desires and to seal his enemy's mouth.

Beginning :

अथाष्टास्यगण्डभेरुण्ड नृसिंहकल्पोक्तप्रकारेण विन्यसेत् ।
यथा सनत्कुमार उवाच —
पितामह सुरज्येष्ठ सर्वलोकैकनायक ।
वाणीपते दयासिन्धो भगवन् भक्तवत्सल ॥
* * * *
सनत्कुमार योगीन्द्र वक्ष्यामि शृणु मे वचः ।
अष्टास्यगण्डभेरुण्डनृसिंहस्य महात्मनः ॥
मन्त्रं पापहरं श्रेष्ठं सर्वशत्रुविनाशनम् ।
सर्वसम्पत्करं पुण्यं शृणु वक्ष्यामि नन्दन ॥

End :

अवान्तरदिशि विष्णुमण्डले गरुडारूढनृसिंहाय श्यामवर्णाय चक्रहस्तायावान्तरदिशिस्थितभूत . . . महाविष्णवे हुं फट् स्वाहा ॥

इति अष्टमुखनृसिंहदिग्बन्धनं परसैन्यशत्रुवाग्बन्धनं मृत्युहरं सर्वकार्येषु साधनम् ।

दिग्बन्धनं यथापूर्वं मन्त्रराजं जपेत्ततः ।

Colophon:

अष्टास्यगण्डभेरुण्डनृसिंहदिग्बन्धनं समाप्तम् ॥

No. **7746.** आकाशभैरवकल्पः.

ĀKĀŚABHAIRAVAKALPAḤ.

Pages, 23. Lines, 9 on a page.

Begins on fol. 50*a* of the MS. described under No. 4567.

Adhyāyas 1 to 10 complete. The names of the Adhyāyas are given below:—

(१) उल्लासप्रक्रमः.
(२) यजनविधानम्.
(३) उत्साहयजनम्.
(४) उत्साहाभिषेकः.
(५) मन्त्रयन्त्रक्रमः.
(६) चित्रमालामन्त्रः.
(७) वश्याकर्षणप्रयोगः.
(८) स्तम्भाविद्वेषः.
(९) उच्चाटननिग्रहः.
(१०) भोगमोक्षप्रयोगः.

A work on Mantra-śāstra; the subjects dealt with herein may be gathered from the names of the Adhyāyas given above.

Beginning:

गुरुं गणपतिं देवीं भैरवं शरभेश्वरम् ।
नमस्कृत्वा प्रवक्ष्यामि मन्त्रशास्त्रं विभूतये ॥
साङ्गं सलक्षणं वेदसारभूतमभीष्टदम् ।
ज्ञानदं जीवजं ज्ञानं साधकानां सुखावहम् ॥

श्रीदेव्युवाच —

श्रीशिवेशान देवेश श्रीनाथ जगतां पते ।
श्रीग(कु)ळाग(कु)ळचिद्रूप श्रीमते भवते नमः ॥
अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात्कारुण्यभावेन रक्ष रक्ष महेश्वर ॥

यद्गुह्यं परमं लोके यच्छास्त्रमखिलप्रदम् ।
यद्धितं साधकेन्द्राणां तद्वदस्व दयानिधे ॥

* * * *

Colophon:

इत्याकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे शङ्करेण विरजि(चि)ते उल्लासप्रक्रमो नाम प्रथमोऽध्यायः ॥

End:

इति गुह्यतमं शास्त्रं लघु सिद्धिप्रदायकम् ।
यत्नेनापि जपेद्देवि सर्वकामार्थसिद्धये ॥

Colophon:

इत्याकाशभैरवकल्पे . . भोगमोक्षप्रयोगो नाम॰ दशमोऽध्यायः ॥

No. 7747. आकाशभैरवकल्पः.

ĀKĀŚABHAIRAVAKALPAḤ.

Substance, palm-leaf. Size, $6\frac{3}{4} \times 1\frac{1}{8}$ inches. Pages, 42. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 27*a*. The other works herein are Gītādhyāna 1*a*, Ānandakanda 4*a*.

Adhyāyas 1 to 10 complete.

Same as the above.

No. 7748. आकाशभैरवकल्पः.

ĀKĀŚABHAIRAVAKALPAḤ.

Substance, paper. Size, $12 \times 9\frac{1}{2}$ inches. Pages, 168. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 59*a*. The other works herein are, Mantramālikā 1*a*, Kārtavīryārjunakalpa 146*a*, Nīlakaṇṭhatryakṣarīvidyā 150*b*, Bālāṣaṭka 165*a*, Bhūśuddhi 170*a*, Bhūtaśuddhi 171*a*, Prāṇapratiṣṭhāvidhi 172*a*, Antarmātṛkā 173*a*, Tattvaśōdhanaprakāśa 173*b*, Ākāśabhairavakalpa (51st Adhyāya-different from the corresponding Adhyāya in the work herein described) 175*b*.

There is an index of this and of certain other works in this MS. on fols. 143 and 144.

Same work as the above.

Contaius Adhyāyas 7 to 76 complete; and the subjects dealt with herein are given below:—

७. वश्याकर्षणप्रयोगः.
८. मोहकद्रावकप्रयोगः.
९. स्तम्भविद्वेषः.
१०. उच्चाटननिग्रहः.
११. मोक्षसारस्ववतम्.
१२. गारुडविधानम्.
१३. आशुगरुडविषयः.
१४. आशुगरुडविषयः
१५. शिष्याचारभेदविधिः.
१६. शरभसाल्वपक्षिराजकल्पः
१. ७शरभेशाष्टकम्.
१८. मन्त्रषट्काद्याथर्वणप्रयोगः.
१९. निग्रहानुग्रहविवेकः.
२०. होमविधिः.
२१. अभिषेकविधिः.
२२. बलिकर्मविधिः.
२३. आचारविधिः.
२४. मायाप्रयोगः.
२५. आराधनविधिः.
२६. मातृकादेवतार्पणबलिविधिः.
२७. भद्रकाळीप्रयोगः.
२८. तैलाञ्जनविधिः.
२९. दुर्गाप्रकरणम्.
३०. शूलिनीदुर्गाक्रियाविधानम्.
३१. दुर्गाप्रयोगभेदः.
३२. जगत्क्षोभणम्.
३३. भैरवप्रयोगः.
३४. सिद्धभैरवम्.
३५. सिद्धभैरवम्.
३६. बडबानलप्रयोगः.
३७. दिक्पालविधिः.
३८. व्याधिप्रयोगः.
३९. मृत्युप्रयोगः.
४०. शरभकवचः.
४१. कामराजः.
४२. रक्तचामुण्डी.
४३. मोहिनीप्रयोगः.
४४. द्राविणीप्रयोग.
४५. शब्दाकर्षणम्.
४६. भाषासरस्वती.
४७. लक्ष्मीप्रयोगः.
४८. मायाप्रयोगः.

४९. पुलिन्दाप्रयोगः.
५०. महाशास्ताप्रयोगः.
५१. क्षोभिणीप्रयोगः.
५२. धूमावतीप्रयोगः.
५३. धूमावतीकल्पः.
५४. तारणप्रयोगः.
५५. चित्रविद्या.
५६. देशिकस्तोत्रम्.
५७. दुःस्वप्ननाशनम्.
५८. पाशविमोचनकल्पः.
५९. महागणपतिविधानम्.
६०. गणेशयन्त्रप्रयोगः.
६१. मूलिकाप्रयोगः.
६२. कालमन्त्रः.
६३. षण्मुखप्रयोगः.
६४. त्वरिताप्रयोगः.
६५. वीरभद्रप्रयोगः.
६६. बडबानलप्रयोगः.
६७. ब्राह्मीमन्त्रप्रयोगः.
६८. माहेश्वरीप्रयोगः.
६९. कौमारीप्रयोगः.
७०. वैष्णवीप्रयोगः.
७१. वाराहीप्रयोगः.
७२. नारसिंहींप्रयोगः.
७३. इन्द्राणीप्रयोगः.
७४. चण्डीप्रयोगः.
७५. मन्त्रदेवतास्तुतिः.
७६. कल्पदेवतास्तुतिः.

The Adhyāyas 9 to 11 herein given correspond to Adhyāyas 8 to 10 given in the work described under No. 7745. There is no Adhyāya in No. 7745 corresponding to the 8th Adhyāya here.

Beginning:

श्रीशिव उवाच—

श्रृणु देवि क्रियाभेदं शीघ्रसिद्धिप्रदायकम् ।
नानाकर्मसमोपेतं साधकानां विवेकिनाम् ॥

* * * *

चिरं ध्यात्वा जपेदेवं जगद्वश्याय साधकः ।
काममादौ ततो मन्त्रं पुनः कामं सपल्लवम् ॥
त्रिसहस्रं ततो मौनी देशिकाज्ञामनुस्मरन् ।
तस्य सर्ववशीकारं साध्ययुक्तं विशेषतः ॥

End :

यः स्मरेत्परया भक्त्या प्रजपेच्छृणुयात्पठेत् ।
लिखित्वा निवहेत्कल्पं सकृद्वा स शिवो भवेत् ॥
इदं रहस्यममलं कल्पे त्वाकाशभैरवे ।
तस्मै तु मम सायुज्यं दत्तमेव सनातनम् ॥

Colophon :

इति श्रीआकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे शङ्करविरचिते पक्षिराजकल्पे कल्पदेवतास्तुतिर्नाम षट्सप्ततितमोऽध्यायः ॥

No. 7749. आकाशभैरवकल्पः.
ĀKĀŚABHAIRAVAKALPAḤ.

Pages, 25. Lines, 18 on a page.

Begins on fol. 346*a* of the MS. described under No. 5477, wherein this is included in Mantramālikā 273*a*.

Incomplete.

Contains Adhyāyas 7 to 17, the 17th Adhyāya being incomplete.

Same as the above.

No. 7750. आकाशभैरवकल्पः.
ĀKĀŚABHAIRAVAKALPAḤ.

Pages, 60. Lines, 17 on a page.

Begins on fol. 88*a* of the MS. described under No. 5574.

Incomplete.

Deals with the following subjects :—

Snānavidhi 17th Upadēśa, Sarvagrāsaśūlinī 18th Upadēśa Śarabhasālvapakṣirājakalpa 16th Paṭala (Adhyāya), Śarabhasālva 17th Adhyāya, Pakṣirājakalpa 18 to 23 Adhyāyas, Śmaśānarudramantra 24th Adhyāya, Māyāprayōgavidhi 25th Adhyāya, Ārādhanavidhi 26th Adhyāya and Mātṛkādēvatāvarṇana 27th Adhyāya.

There are no portions in the work described under No. 7748 corresponding to the 17th and 18th Upadēśas in this work; Adhyāyas 16 to 27 however correspond to Adhyāyas 16 to 26 of the MS. described under No. 7748 with some little differences here and there.

Beginning:

अथ स्नानविधिं वक्ष्ये सर्वेषां सिद्धिमिच्छताम् ।
विशेषात्साधकेन्द्राणां देशिकाज्ञानुसारिणाम् ॥
सरोनद्यादितीर्थेषु केवलेष्वखिलेषु च ।
विशेषदिवसे नित्यं स्नायात्सर्वेषु शान्तये ॥
सर्वजापविशुद्ध्यै च सर्वाभीष्टार्थसिद्धये ।
सङ्कल्पषट्षष्टिकोटितीर्थमावाह्य सूक्ष्मवित् ॥

End:

सर्वदा मनुजो मन्त्री पुरश्चर्याद्वयं चरेत् ।
स्मरतां तेन सिद्धिस्स्यान्नानाकर्मक्रियादिषु ॥
सर्वेषां मन्त्रजालानां यथासाध्यं युगे युगे ।
तत्सर्वस्मरणादेव सिद्धिर्भवति तत्त्वतः ॥

Colophon:

इति श्रीआकाशभैरवकल्पे प्रत्यक्षफलसिद्धिप्रदे उमामहेश्वरसंवादे शङ्करेण विरचिते शरभसालुवपक्षिराजकल्पे मातृकादेवतावर्णनं नामसप्तविंशोऽध्यायः ॥

No. 7751. आकाशभैरवकल्पः.
ĀKĀŚABHAIRAVAKALPAḤ.

Pages, 5. Lines, 20 on a page.

Begins on fol. 175*b* of the MS. described under No. 7748.

Incomplete.

This contains the 51st Adhyāya of the Ākāśabhairavakalpa and is different from the 51st Adhyāya in the work described under No. 7748. It deals with the Śarabhasālva-mantra which is considered to be efficacious in causing the destruction of one's enemies and in curing diseases.

Beginning :

भगवन् देवदेवेश सर्वशास्त्रार्थवादक ।
ब्रूहि मे सर्वपापघ्नं किं मन्त्रं चेष्टदायकम् ॥

* * *

शृणु वक्ष्यामि देवेशि सर्वपापहरं परम् ।
सर्वशत्रुहरं दिव्यं हृदयं शरभस्य च ॥
साल्वं तु सर्वरोगघ्नं हृदयं परमाद्भुतम् ।
गुह्याद्गुह्यतमं गुह्यं गोपनीयं स्वयोनिवत् ॥

End :

एतत्ते सुभ्रु कथितं हृदयं शरभस्य च ।
पठतां शृण्वतां चैव सर्वमन्त्रादिसिद्धिदम् ॥

Colophon :

इति श्रीमहाशैवतन्त्रे अतिरहस्ये आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे शरभसाल्वपक्षिराजहृदयं नाम एकपञ्चाशोऽध्यायः ॥

No. **7752.** आचारविधिः.
ĀCĀRAVIDHIḤ.

Pages, 2. Lines, 19 on a page.

Begins on fol. 42*b* of the MS. described under No. 2886, wherein this is found in the Ākāśabhairavakalpa 38*a*.

This forms the 24th Adhyāya of the Ākāśabhairavakalpa and deals with the rules of religious conduct considered necessary for the practical use of the Śarabhamantra. This is somewhat different from the आचारविधि dealt with in the 23rd Adhyāya of the work described under No 7745.

Beginning :

अथाचारविधिं वक्ष्ये साधकानां वरानने ।
ब्राह्मे मुहूर्ते चोत्थाय प्रणम्य गुरुमात्मनः ॥
शरभेशाष्टकं मन्त्रं त्रिवारं मनसा जपेत् ।
नमस्कृत्वा ततो मन्त्री गणेशं शरभेश्वरम् ॥

End:

हंसारेऽस्मिन् प्रयोगे सकलविधिषु चेत् रीतिभिस्सूक्तमन्त्र-
मेकैकं दासमेतं निजगुरुवदनाद्यो न जानाति भूमौ ।
सोऽविद्वान्मूढदृष्टिः कलयति कुपितः किं . . . .पातकर्मा
ज्ञातस्तत्साध्यकृत्तिं कटुवरलिखितं तापयेन्निग्रहाय ॥

Colophon:

इत्याकाशभैरवकल्पे आचारविधिर्नाम चतुर्विंशोऽध्यायः ॥

No. **7753.** आञ्जनेयकल्पः.

ĀÑJANĒYAKALPAḤ.

Pages, 3. Lines, 19 on a page.

Begins on fol. 13*a* of the MS. described under No. 2886, wherein this is given as Hanumatkalpa in the list of other works.

Contains Paṭalas 1 to 6 of the Sudarśanasaṁhitā as shewn below:—

१. आञ्जनेयमनुविधिः.
२. पुरश्चरणविधानम्.
३. पुरश्चरणविधानम्.
४. वश्यकरणम्.
५. यन्त्रविधिः.
६. पापशुद्धिपूजाहोमविधिः.

Deals with the details connected with the repetition of the Āñjanēyamantra and with the manner of consecrating the metallic plate containing mystic diagrams relating to Āñjanēya.

Beginning:

तारं पूर्वं लिखेद्धीमान् चतुःश्रीलसमन्वितम् ।
वज्रकोणमिति प्रोक्तं मन्त्रशास्त्रविशारदैः ॥
आञ्जनेयमनुं वक्ष्ये भुक्तिमुक्त्येकसाधनम् ।
प्रकाशितं शङ्करेण लोकानां हितमिच्छता ॥

End:

अपात्रदानस्वीकारं पुष्पिणीगमनन्तथा ।
तत्पापं विलयं याति अष्टोत्तरशतेन च ॥

Colophon:

इति सुदर्शनसंहितायामाञ्जनेयकल्पे षष्ठपटलः ॥

No. 7754. आञ्जनेयकल्पः.
ĀÑJANĒYAKALPAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 2424, wherein this is given as Āñjanēyamantra in the list of other works

Complete.

Deals with the consecration of the Āñjanēyayantra.

Beginning:

वृत्तत्रिकोणषट्कोणं वसुपत्रं वसुबहिः ।
द्वादशं च ततः पश्चात्षोडशदलसंयुतम् ॥
द्वादश पत्रसंयुक्तं भूपुरं च मथोपरि ।

इति—यन्त्रश्लोकः।

(वृत्ते)ह्रीं साध्यनाम, (त्रिकोणे) ह्रां ह्रीं ह्रं (षट्कोणे) हृदयाय नमः ।

End:

एकरोमाय नमः । एकक्षणाय नमः । नद नद् स्वाहा ॥

No. 7755. आथर्वणमन्त्रकल्पः.
ĀTHARVAṆAMANTRAKALPAḤ.

Pages, 3. Lines, 14 on a page.

Begins on fol. 88*a* of the MS. described under No. 5673, wherein this is given as Ātharvaṇamantra in the list of other works.

Complete.

Contains the details regarding the repetition of the Ātharvaṇa Mantra which is considered to be capable of counteracting the influence of evil spirits and the effect of poison and of hostile Mantras and Tantras.

Beginning:

स्कन्द उवाच—

नमस्ते जगतां नाथ मन्त्रयन्त्रविशारद ।
मन्त्रतन्तुर्दारुतन्तुः शल्यतन्तुसमुद्भवाः ॥

एवं प्रयोगाश्चानन्ता दुःखदा भुवि कृत्रिमाः ।
तेषां सर्वप्रतीकारं वद वात्सल्यगौरवात् ॥

ईश्वरः—

सर्वप्रयोगविध्वंसकुयोगहरमेव च ।
मन्त्रमेकं प्रवक्ष्यामि प्रयोगाद्यभिधानतः ॥
मन्त्रमाथर्वणं प्रोक्तं प्रयोगसुगमं तथा ।
आदौ प्रणवमुच्चार्य तार्क्ष्यबीजमथोच्चरेत् ॥

* * * *

निर्विषं कुरुयुग्मं च छिन्धिछिन्धिसमन्वितम् ॥
ग्रसग्रससमायुक्तं शोषयद्वयसंयुतम् ।
भस्मीकुरु द्विधा प्रोक्तं हुंफट्स्वाहासमन्वितम् ॥

End:

कृत्रिमहरन्—

रात्रराग्रयक्षिणीनागदूतिनागदूतः ग्रहभूतप्रेतपिशाचब्रह्मराक्षसकृत्रिमादिविषं फट् स्वाहा ॥

No. **7756.** आथर्वण्यस्त्रमन्त्रः.

ĀTHARVAṆYASTRAMANTRAḤ.

Pages, 17. Lines, 8 on a page.

Begins on fol. 24*a* of the MS. described under No. 124.

Complete.

This forms Adhyāyas 10 to 15 of the Kālikāgama.

On the details connected with the repetition of the Ātharvaṇyastramantra which is addressed to the goddess Ārdrapaṭīśvarī, i.e., Kālī wearing wet clothes, with the object of causing the destruction of one's enemies.

Beginning:

स्कन्द उवाच—

अनेकशत्रुसंहार अरुणारुणमूर्ध्निने(ध्वज) ।
अनेककालविन्नाश वन्दे आर्द्रपटीश्वरीम् ॥

प्रयोगसिद्धमन्त्रं च वन्दे आर्द्रपटीश्वरीम् ।
तत्साधनं च जपतां वद तल्लक्षणानि च ॥

* * *

आथर्वण्यस्त्रविद्या(याः)क्रौञ्चभेदनकोविदः ।
अधुना सारभूतं च जपलक्षणमाचरेत् ॥
सप्तहस्तं चार्द्रवस्त्रमाच्छाद्य यमादिङ्मुखः ।

End:

सहस्रं प्रजपेत्पुत्र तर्पयेदर्कसङ्ख्यया ।
तज्जलं शोणितं भूत्वा वैरिणां मारणं ध्रुवम् ॥
ग्रन्थं चैव तु शत्रुनामसहितं सञ्जप्य गौरीमनुं
सर्वाम्नायविदश्शतत्रयमहाप्रेतालये बुद्धिमान् ।
शत्रो . . . . मांसमध्यममितं सन्तर्प्य तन्मन्त्रयोः
कालिं कालमयीं करालवदनां संपूज्य कालागमैः ॥

Colophon:

इति कालिकागमे रुद्रतन्त्रे आथर्वण्यस्त्रं नाम पञ्चदशः पटलः समाप्तः ॥

No. 7757. आदित्यहृदयकल्पः.
ĀDITYAHṚDAYAKALPAḤ.

Pages, 18. Lines, 5 on a page.

Begins on fol. 96*a* of the MS. described under No. 1872, wherein this is given as Ādityahṛdayastōtra in the list of other works.

Incomplete.

On the mode of conducting the worship of the sun-god in connection with the repetition of the Ādityahṛdaya-mantra.

Beginning:

अस्य श्रीआदित्यहृदयस्तोत्रमन्त्रस्य श्रीकृष्ण ऋषिः, अनुष्टुप् छन्दः, श्रीकृष्णः परमात्मा देवता । अङ्गन्यासं करिष्ये—

अर्कन्तु मूर्ध्नि विन्यस्य ललाटे तु रविं न्यसेत् ।
विन्यसेन्नेत्रयोस्सूर्यं कर्णयोस्तु दिवाकरम् ॥

*   *   *   *

पूर्वपत्रे न्यसेत्सूर्यमाग्नेय्यां तु दिवाकरम् ।
याम्ये वैवस्वतं चैव नैरृत्यां भगमेव च ॥
मार्ताण्डं पश्चिमे भागे वायव्यां द्युमणिं तथा ।

End:

सप्तद्वीपप्रकाशाय भास्कराय नमो नमः ॥
सर्वदुःखविनाशाय सर्वपापहराय च ।
सर्वव्याधिविनाशाय भास्कराय नमो नमः ॥

*   *   *   *

श्रीसूर्यनारायणदेवतायै नमः प्रदक्षिणनमस्कारं समर्पयामि.

No. 7758. आदित्यहृदयकल्पः.
ĀDITYAHṚDAYAKALPAḤ.

Substance, palm-leaf. Size, 13⅝ × 1¼ inches. Pages, 13. Lines, 7 on a page. Character, Nandināgarī. Condition, slightly injured. Appearance, old.

Begins on fol. 149*a*. The other works herein are Mailārapūjāvidhi 1*a*, Vṛṣabhavrata 3*a*, Ēkādaśīkalpa 5*a*, Visṇusahasranāmāvalī 8*a*, Kṛṣṇajayantīvrata 19*b* and 31*a*, Sōmavāravratakalpa 21*a* and 58*a*, Śivarātrīvratakalpa 25*a* and 96*a*, Lakṣavartyudyāpanavidhi 36*a*, Rajasvalādigamanaprāyaścitta 38*a*, Rāmanavamīvratakalpa 40*a* and 45*b*, Rāmāṣṭōttaraśatanāmāvali 43*a*, Nṛsiṁhajayantīvratakalpa 52*b* and 60*b*, Sōmavāravratōdyāpanakalpa 54*a* and 124*b*, Budhāṣṭamīvratōdyāpana 60*a*, Nṛsiṁhāṣṭōttaraśatanāmāvalī 66*b*, Sarvadānamantra 67*b*, Umāmahēśvaravratakalpa 76*a* and 170*a*, Balīndrapūjā 80*b*, Narakacaturdaśīkalpa 82*b*, Pārvatyaṣṭōttaraśatanāmāvali 83*a*, Nārāyaṇāṣṭōttaraśātanāmāvali 84*a*, Umāmahēśvarāṣṭōttaraśatanāmāvali 85*a*, Śivāṣṭōttaraśatanāmāvalī 85*b*, Kṛṣṇāṣṭōttaraśatanāmāvali 86*b*, Śivasahasranāmāvali 88*a*,

Śivarātripañcaliṅgadānavidhi 107*a*, Varalakṣmīvratakalpa 110*a* and 180*a*, Lakṣanamaskāravidhi 115*a*, Māsōpavāsavrata 116*a*, Lakṣa-tulasīvrata 118*a*, Lakṣapuṣpavrata 118*b*, Bhīṣmapañcakavrata 119*b*, Dhāraṇapāraṇavrata 120*b*, Lakṣapradakṣiṇavrata 121*b*, Bṛhadgaurīvrata 122*a*, Yamalōpanayanavidhi 124*a*, Dūrvāvināyakavrata 133*a*, Bilvapatravratōdyāpana 134*a*, Tulasīvratōdyāpana 135*a*, Maṅgalagaurīvrata 137*a*, Ṛṣipañcamīvratakalpa 141*a*, Tṛcakalpavidhi 141*b*, Mahāsaurakhaṇḍa 148*a*, Dēvapūjāvidhi 156*a*, Kēralīyadēvapūjāvidhi 157*a*, Puruṣasūktavidhāna 157*b*, Grahadēvatāsaṁprōkṣaṇavidhi 160*b*, Vyāsapūjā 162*a*, Bindudvādaśīvratakathā 165*b*.

Almost complete.

Similar to the above.

Beginning:

अर्जुन उवाच—

सूर्यभे किं करिष्यामि कथं सूर्यं प्रपूजये ।
तद्वद श्रोतुमिच्छामि त्वत्प्रसादाद्धि माधव ॥

श्रीभगवानुवाच—

अस्माच्च यत्त्वया पृष्टमेकचित्तो भवार्जुन ।
तदहं संप्रवक्ष्यामि आदिमध्यावसानतः ॥

* * * *

वर्धनं धनपुत्राणामादित्यहृदयं शृणु ।
यत्कृत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥

End:

अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात् कारुण्यभावेन रक्ष रक्ष दिवाकर ॥
. . . . .धं यस्य दिव्यं कनकभूषितम् ।
स वै भवतु सुप्रीतः पद्महस्तो दिवाकरः ॥

Colophon:

इति श्रीभाविष्योत्तरपुराणे कृष्णार्जुनसंवादे.

No. 7759. आनन्दकन्दम्.
ĀNANDAKANDAM.

Pages, 48. Lines, 8 on a page.

Begins on fol. 4*a* of the MS. described under No. 7747.

Complete.

Contains only the 12th Adhyāya which deals with the details regarding the consecration and manner of use of the mystic diagram relating to Ākāśabhairava. It is considered to have the power of enabling one to accomplish one's desires.

Beginning:

अथ यन्त्रप्रयोगं तु कल्याणि शृणु वच्म्यहम् ।
नानासिद्धिप्रदं श्रेष्ठं नानाकार्यजयप्रदम् ॥
वेथ(त)सेन त्रिमूर्धानं परिलिख्याभिवेष्टच तत् ।
ऊर्ध्वे शूलं तु तन्मध्ये लिखेत् डिं कुरु फट् इति ॥
सम्पूज्य विधिवद्देवमावाह्याकाशभैरवम् ।
तद्दलेष्विष्टमालिख्य स्थापयेत्तद्द्विकोष्ठके ॥

End:

मन्त्रन्यासं पुरा कृत्वा पश्चाल्लक्षं जपेत्सुधीः ।
अघोरं तेन वै शीघ्रं तत्तत्सिद्धिमवाप्नुयात् ॥

Colophon:

इति महाभैरवप्रोक्ते आनन्दकन्दे अमृतकरणविश्रान्तौ द्वादशोऽध्यायः ॥

No. 7760. आराधनविधिः.
ĀRĀDHANAVIDHIḤ.

Page, 1. Lines, 19 on a page.

Begins on fol. 43*a* of the MS. described under No. 2886, wherein it is found in the Ākāsabhairavakalpa 38*a* in the list of other works.

Complete.

This forms the 25th Adhyāya of the Ākāśabhairavakalpa, and deals with the mode of conducting the worship of Śiva as Śarabha.

This Mantra is considered to have the power of enabling one to become one with Śiva.

Beginning:

आराधनं प्रवक्ष्यामि सर्वसिद्धिप्रदायकम् ।
भोगमोक्षप्रदं पुण्यं भुक्तिमुक्त्येकहेतुकम् ॥
विषुकालेऽयने पुण्ये पूर्णायां दशके तथा ।
एकादश्यां चतुर्दश्यां शुक्रसौम्येन्दुवासरे ॥

End:

शरभं हृद्यथोद्वास्य शिवोऽहमिति भावयेत् ।
इत्येवं सततं कुर्यात्स्वयमेव शिवो भवेत् ॥
तद्भस्मां(ङ्गे धृतं)श्रुत्वा कम्पन्ते विग्रहग्रहाः ।
किं पुनर्दर्शनादार्ये भूतप्रेतादिराक्षसाः ॥

Colophon:

इत्याकाशभैरवकल्पे आराधनं नाम पञ्चविंशोऽध्यायः ॥

No. 7761. आवहन्तीकल्पः.

ĀVAHANTĪKALPAḤ

Page, 1. Lines, 6 on a page.

Begins on fol. 15*a* of the MS. described under No. 5858.

Complete.

Deals with the details relating to the fire-offering, etc., in connection with the appropriate repetition of the Āvahantīmantra, which is here addressed to Annapūrṇā and Śiva.

Beginning:

अथावहन्तीकल्पं व्याख्यास्यामः---

पयसा सर्पिषा जुहोति श्रीकामो वृतेनो(नौ)दनेनाग्नौ । अन्न-
काम आज्येन तेजस्कामः पयसा पशुकामो व्रीहिभि[:] र्यवैर्वा पुष्टिकामः।
औदुम्बरखादिरपालाशन्यग्रोधसमिद्भिरेकैकं प्रतिपदं जुहुयात् ।

End:

आदित्याभिमुखो भूत्वा शतं जपित्वा सर्वपापैः प्रमुच्यते। श्रीमान् भवति। यश्छन्दसामृषभः। आवहन्ती वितन्वानेत्यनुवाकं जपित्वा श्रीमान् भवतीत्याह भगवान् बोधायनः ॥

No. 7762. आवहन्तीकल्पः.

ĀVAHANTĪKALPAḤ.

Pages, 7. Lines, 24 on a page.

Begins on fol. 101*a* of the MS. described under No. 446.

Complete.

Similar to the above: the Mantra is addressed to Annapūrṇā and Sadāśiva, and consists of the combination of ओं श्रीं ह्रीं क्लीं and the Śrīvidyā with the Upaniṣadic passage beginning with आवहन्ती found in the 4th Anuvāka of the 5th Praśna in the Taittirīya Āraṇyaka.

Beginning:

आवहन्तीत्यस्य मन्त्रस्य माहाचमस्यकहोला ऋषयः, गायत्री त्रिष्टुबनुष्टुब्बृहतीपङ्क्तिश्छन्दांसि, अन्नपूर्णासदाशिवो देवता। . . . .

एवंप्रकारेण मन्त्रजपः—

ओं श्रीं ह्रीं क्लीं क ए ई ल ह्रीं आवहन्ती वितन्वाना कुर्वाणा चीरमात्मनः। ह स क ह ल ह्रीं वासांसि मम गावश्च। अन्नपाने च सर्वदा। स क ल ह्रीं ततो मे श्रियमावह लोमशां पशुभिस्सह स्वाहा। इति मन्त्रजपः। अथावहन्तीकल्पं व्याख्यास्यामः—पायसेन सर्पिषा जुहोति श्रीकामः।

End:

ब्रह्मणः कोशोऽसि मेधयापिहितः। श्रुतं मे गोपाय ॥

ओं श्रीं क्लीं ह्रीं क ए ई ल ह्रीं आवहन्ती वितन्वाना कुर्वाणा चीरमात्मनः। ह स क ह ल ह्रीं वासांसि मम गावश्च। अन्न-

पाने च सर्वदा। स क ल ह्रीं ततो मे श्रियमावह लोमशां पशुभिस्स-
ह्रों नमश्शिवाय स्वाहा ॥

Colophon :

इत्यावहन्तीकल्पं सम्पूर्णम् ॥

No. 7763. आवेशहनूमत्कल्पः.

ĀVĒŚAHANŪMATKALPAḤ.

Pages, 3. Lines, 18 on a page.

Begins on fol. 153*a* of the MS. described under No. 5586, wherein it is given as Āvēśahanūmadviṣaya in the list of other works.

Complete.

On the details connected with the consecration of the mystic diagram connected with the Āvēśahanūmanmantra described under No. 5988.

Beginning :

पार्वत्युवाच—

नमस्ते योगिसंसेव्य नमस्ते नागकङ्कण।
सुगमावेशनं चैव वद मे करुणाकर ॥

ईश्वर उवाच—

सुलभैरा(भा)वेशयोगं च दुर्लभं भूतले नृणाम् ।
तदावेशक्रमं देवि वक्ष्येऽहं तव सादरा(रम्) ॥

* * * *

तारमादौ समुच्चार्य पाशबीजमनन्तरम्।
वायुबीजं च मायां च वाराहं वाग्भवं तथा ॥

End :

एवं यन्त्रं समालिख्य वटुकं च तथोपरि ॥
पद्मासनेन संस्थाप्य भस्ममन्त्रेण निक्षिपेत्।
शतवारं मन्त्रितं चेदावेशं च भवेद्ध्रुवम् ॥

Colophon:

इति श्रीसुदर्शनसंहितायामाञ्जनेयावेशविधिर्नाम तृतीयः पटलः ॥

No. 7764. आशुगरुडयन्त्रकल्पः.

ĀŚUGARUḌAYANTRAKALPAḤ.

Pages, 8. Lines, 18 on a page.

Begins on fol. 336*a* of the MS. described under No. 5477, wherein it is found in the Ākāśabhairavakalpa 273*a* in the list of other works.

Complete as found in the 14th Adhyāya of Ākāśabhairavakalpa.

This Kalpa gives the details for consecrating the metallic plate containing mystic diagrams connected with the Āśugaruḍamantra described under No. 5989.

Beginning:

षट्कोणान्तरिताग्निवायुलिखितं मायां च सप्तार्णकं
कोणेष्वश्रिसुसाध्यवह्निसहितं सर्वत्र हादीन् हरेत् ।

अथ वा—

षट्कोणान्तरिताग्निवायुमनुना संयुक्तमध्याक्षरद्वादशकोणेष्विति पाठविशेषः ।

End:

चतुर्दशसु कोष्ठेषु विचरेद्गरुडो यथा ॥
अनेनैव तु कालेन भूतले बहुसम्पदम् ।
चिरं प्राप्य तु देहान्ते विष्णुसायुज्यमाप्नुयात् ॥
इति आशुगरुडकल्पं सम्पूर्णम् ॥

* * * *

तज्जलेनाभिषिच्याथ होमं हुत्वाथ रूक्षकैः ।
निमज्ज्य तज्जले देवि बध्नीयात् पुत्रकामिनाम् ॥

Colophon :

इत्याकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे शङ्करेण विरचिते आशुगरुडकल्पं नाम चतुर्दशोऽध्यायः ॥

No. 7765. आसनविधिः.
ĀSANAVIDHIḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 188*b* of the MS. described under No. 119, wherein this has been omitted to be shewn in the list of other works.

Complete.

Describes the different postures in sitting and specifies the objects that might be realised by the use of different kinds of Āsana, such as deer skin, woollen carpet, etc.

Beginning :

आसनभेदाः—

पद्मासनं स्वस्तिकाख्यं भद्रं वज्रासनं तथा ।
पीठासनमिति प्रोक्तं क्रमादासनपञ्चकम् ॥

End :

धवलं शान्तिके मोक्षे सर्वार्थे चित्रकम्बलम् ।
कृष्णाजिने ज्ञानसिद्धिर्मोक्षश्रीर्व्याघ्रचर्मणि ।

No. 7766. आसुरीमन्त्रकल्पः.
ĀSURĪMANTRAKALPAḤ.

Pages, 4. Lines, 8 on a page.

Begins on fol. 22*a* of the MS. described under No. 5600, wherein it is given as Āsurīśarabhasālvōddhāraprayōga in the list of other works.

Complete.

This Kalpa contains the Āsurīmantra, which is considerd to be efficacious in counteracting the influence of evil spirits and

in bringing other people under one's control. It gives the details of procedure connected with the practical use of this Mantra, such as, the conduct of worship in honour of the goddess, the mode of performing the prescribed fire-offering, the number of times the Mantra should be repeated, etc.

Beginning:

आसुरीमन्त्रवर्यस्य तद . . . थर्वण ऋषिः ।
छन्दोऽथ जगती चास्या ह्यासुरी देवता मनोः ॥
तारं बीजं विनिर्दिष्टं माया शक्तिरुदीरिता ।
श्रियं कीलकमित्युक्तं विनियोगोऽष्टसिद्धिषु ॥

End:

कर्ता तु गुरवे दद्यात् (भक्त्या) सम्पूर्णदक्षिणाम् ।
ततः कार्यो नित्यदीपः सर्वकाम्यार्थसिद्धये ॥
पात्रे पले(न)प्रमिते पलैकेन घृतेन च ।
एवं कृत्वा नित्यदीपं जपहोमादिकं चरेत् ॥

No. 7767. इन्द्राक्षीकल्पः.
INDRĀKṢĪKALPAḤ.

Pages, 3. Lines, 7 on a page.
Begins on fol. 41*a* of the MS. described under No. 5924.
Complete.

On the manner of consecrating a metallic plate with the mystic diagrams relating to the goddess Indrākṣī. The wearing of such a consecrated plate is considered to be efficacious in curing all kinds of diseases.

Beginning:

पुरन्दरेण संप्रोक्तमिन्द्राक्षीयन्त्रमुत्तमम् ।
सर्वरोगप्रशमनमायुर्वर्धनमुत्तमम् ॥
चतुष्षष्टिपदं पूर्वं लिखेदिन्द्राक्षि शोभनम् ।
षट्त्रिंशच्छूलसंयुक्तं रेखाष्टदलसंयुतम् ॥

End:

यन्त्रान्तरमाह —

पञ्चकोणं लिखेत्पूर्वं कोणाग्रे शूलमालिखेत् ।
कोणमध्ये तु तद्बीजं तत्कोणे वायुबीजकम् ॥
त्रयोदशेन संवेष्ट्य तद्बाह्ये साध्यनामकम् ।
एवं सम्पूज्य देवेशि जपेत्स्तोत्रमनुत्तमम् ॥

No. **7768.** इन्द्राक्षीयन्त्रम्.
INDRĀKṢĪYANTRAM.

Page, 1. Lines, 19 on a page.

Begins on fol. 6*a* of the MS. described under No. 2886, wherein it has been omitted to be included in the list of other works.

Complete.

Similar to the above.

Beginning:

ठकारबाह्ये [वि]लिखेद(खिता)ष्टपत्रं से(त्रे)ष्विन्द्राक्षिवर्णान्
विलिखेत्क्रमाच्च ।
मध्ये च साध्यं प्रणवेन युक्तं तद्बाह्यवृत्तेषु च षोडशारम् ॥

End:

यथावकाशं लिख्यते—

मा त्वा रुद्र चुक्रुधा मा नमोभिः । अष्टदिक्पालबीजम् । इन्द्र-दिगादि लं रं हं षं वं यं सं शं ॥

No. **7769.** इन्द्राक्षीयन्त्रम्.
INDRĀKṢĪYANTRAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 183*b* of the MS. described under No. 7247.

Complete.

Similar to the above.

Beginning:

बिन्दुत्रिकोणषट्कोणमष्टकोणं च वृत्तकम् ।
अष्टपत्रं भूपुरं च एवमिन्द्राक्षियन्त्रकम् ॥
त्रिकोणमस्तके लिख्य प्रणवं व्यञ्जनायुतम् ।
पार्श्वे द्वे त्वपि कोणाग्रे श्रीबीजं च समालिखेत् ॥

End:

इन्द्राक्षीं च विद्महे ह्रीं ईं सर्वशक्त्यै च धीमहि ।
श्रीं ह्रीं इं ईं तन्नो देवी प्रचोदयात् ॥
द्वात्रिंशद्वर्णसङ्ख्याकगायत्रीमनुना युतम् ।
सर्वग्रहादिरोगांश्च नाशयत्येव तत्क्षणात् ॥
भस्म पूर्वोक्तयन्त्रं च लिखेत् ॥

No. **7770.** इन्द्राक्षीयन्त्रम्.

INDRĀKṢĪYANTRAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 182*a* of the MS. described under No. 7247.
Complete.
Similar to the above.

Beginning:

अथ यन्त्रप्रकारमाह—

ठकारमध्यस्थितमष्टपत्रमिन्द्राक्षियन्त्रं क्रमशो विलिख्यते ।
मध्ये स्वराढ्यप्रणवेन युक्तं बहिस्सुवृत्ते दलषोडशश्च ॥
स्वरान्तरे कादिवर्णक्रमेण ततो बहिर्भूपुरभैरवाख्यम् ।
मन्त्रं लिखेत्पूर्वदिशासमस्तं तदुत्तरे सप्त मातॄर्विलिख्य ॥

End:

मध्येऽक्षरं समालिख्य तन्मध्ये साध्यनामकम् ।
भस्समध्ये लिखेद्यन्त्रं पूजयेद्रोगशान्तये ॥

इन्द्राक्षीनामभिश्चैव पूजयेदुपचारकैः ।
इदं यन्त्रं महादेवि सर्वरोगप्रशान्तिदम् ॥

ओं नमो भगवति इन्द्राक्षि महादेवि सर्वजनभयङ्करि सर्वदुष्टस्तम्भिनि स्वाहा ॥

Colophon:

इन्द्राक्षीयन्त्रं समाप्तम् ॥

No. **7771.** इन्द्राक्षीयन्त्रम्.
INDRĀKṢĪYANTRAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 15*b* of the MS. described under No. 2854, wherein it is stated as beginning on fol. 15*a*, in the list of other works.

Complete.

Similar to the above.

Beginning:

ठकारबाह्येऽष्टदलं विलिख्य इन्द्राक्षिवर्णान् विलिखेत् क्रमाच्च ।
मध्ये च साध्यं प्रणवेन युक्तं तद्बाह्यवृत्तेऽपि च षोडशारम् ॥

दलेषु लिख्यं स्वरषोडशं च दलान्तरे कादिवर्णान् विलिख्य ।
तद्बाह्यके भूपुरभैरवाष्टकं तत्पूर्वभागेषु म मालिकाख्यम् ॥

End:

शूल त्रिवलयं मध्ये मनुतारान् लिखेत्क्रमात् ।
सर्वरोगज्वरहरमिन्द्राक्षीयन्त्रमीरितम् ॥

* * * *

पूर्वभागे मालामन्त्रं दक्षिणे ब्राह्मयादिसप्तमातृकाः ।
पश्चिमे पञ्च शरान् निधींश्च उत्तरे अणिमाद्यष्टासिद्धयः ।

महापद्मश्च . . . . . निधयो नव ॥

अरविन्दमशोकं च . . . पञ्च बाणाः प्रकीर्तिताः ॥

No. 7772. इन्द्राक्षीस्तोत्रकल्पः.
INDRĀKṢĪSTŌTRAKALPAḤ.

Pages, 9. Lines, 23 on a page.

Begins on fol. 104*a* of the MS. described under No. 446, wherein it is given as beginning on fol. 106*a* in the list of other works.

Complete as found in the 13th Adhyaya of Brahmatāntrika.

Deals with the details connected with the use of the Mūla-mantra, Aṅga-mantra, Mālā-mantra and Stōtra-mantra relating to the goddess Indrakṣi, and also with the mode of consecrating the Indrākṣī-yantra.

Beginning :

अधुना संप्रवक्ष्यामि इन्द्राक्ष्यस्य (स्तु) विधिं क्रमात् ।
साङ्गोपाङ्गविधानेन तुष्टा सा परमेश्वरी ॥
मूलमन्त्रं चाङ्गमन्त्रं मालामन्त्रं विशेषतः ।
तद्रहस्यं (च) विधिवत् शृणु गोप्यं महामनुम् ॥

अस्य श्रीइन्द्राक्षीमूलमन्त्रस्य मन्वन्तर ऋषिः, गायत्री छन्दः, श्रीइन्द्राक्षी देवता। . . . .

इन्द्राक्षीयन्त्रोद्धार :—

ठकारबाह्येऽष्टदलं विलिख्य इन्द्राक्षिमन्त्रं विलिखेत्क्रमाच्च ।
मध्ये च साध्यं प्रणवेन युक्तं तद्बाह्यवृत्तेऽपि च षोडशारम् ॥

End :

एतत्स्तोत्रं महापुण्यं जपेदायुष्यवर्धनम् ।
विनाशाय च रोगानि(णा)मपमृत्युहराय च ॥
द्विजैस्त्रिभिश्चतुर्भिर्वा पञ्चभिर्वापि वाष्टभिः ।
पूजनीयं प्रयत्नेन त्र्यहं वा पञ्चवासरम् ॥
ताम्बूलदक्षिणायुक्तं फलं देयं गुडोदकम् ।
एवं क्रमेण कुर्वीत सिद्धिर्भवति नान्यथा ॥

Colophon:

इति श्रीब्रह्मतान्त्रिके इन्द्राक्षीस्तोत्रविधियोगो नाम त्रयोदशोऽध्यायः ॥

No. **7773.** इन्द्राक्षीस्तोत्रकल्पः.

INDRĀKṢĪSTŌTRAKALPAḤ

Pages, 11. Lines, 5 on a page.

Begins on fol. 50*a* of the MS. described under No. 5661.

Complete.

Similar to the above.

Beginning:

अथ न्यासं प्रवक्ष्यामि इन्द्राक्ष्याश्च विधिं क्रमात् ।
साङ्गोपाङ्गविधानेन शृणुष्व परमेश्वरि ॥
मूलमन्त्रश्चाङ्गमन्त्रं मालामन्त्रं तथैव च ।
तद्रहस्यं च विधिवच्छृणु गोप्यं महामनुम् ॥

अस्य श्रीइन्द्राक्षीमूलमन्त्रस्य धन्वन्तरिऋषिः, जगती छन्दः, श्री-इन्द्राक्षी देवता ।

End:

पूजनीया प्रयत्नेन इन्द्राक्षी प्रतिवासरम् ।
ताम्बूलं दक्षिणायुक्तं फलं देयं गुडोदकम् ॥
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधके ।
शरण्ये त्र्यम्बके देवि नारायणि नमोऽस्तु ते ॥

Colophon:

इति श्रीब्रह्मतान्त्रिके इन्द्राक्षीस्तोत्रविधियोगो नाम त्रयोदशोऽध्यायः समाप्तः ॥

No. **7774.** इन्द्राणीमन्त्रकल्पः.

INDRĀṆĪMANTRAKALPAḤ

Pages, 2. Lines, 8 on a page.

Begins on fol. 31*a* of the MS. described under No. 2854, wherein it is given as Indrāṇīmantra 31*b* in the list of other works.

Complete as found in the 72nd Adhyāya of the Ākāśabhairavakalpa.

Deals with the consecration of the Yantra relating to the goddess Indrāṇī and lays down the number of times the Mantra should be repeated in order to realize one's desires.

Beginning:

श्रीशिव उवाच—

मन्त्रस्य ऋषिरिन्द्राण्याश्छन्दोऽनुष्टुप्पुरन्दरः ।
इन्द्राणी देवता प्रोक्ता श्रीमाया (ये) बीजशक्तिके ॥
ओङ्कारं कीलकं योगः स्वेष्टकार्यार्थसिद्धये ।

End:

पुरश्चुया यथा कृत्वा कार्यार्थमयुतं जपेत् ।
इच्छासिद्धिमवाप्नोति साधको नैव संशयः ॥

Colophon:

इत्याकाशभैरवकल्पे इन्द्राणीमन्त्रं नाम द्विसप्ततितमोऽध्यायः समाप्तः ॥

No. 7775. उच्छिष्टगणपतिकल्पः.
UCCHIṢṬAGAṆAPATIKALPAḤ.

Pages, 20. Lines, 18 on a page.

Begins on fol. 160*a* of the MS. described under No. 5593, wherein this is given as Ucchiṣṭagaṇapatiyantra in the list of other works.

Contains the following Paṭalas :—

(1) Mantra-paṭala; (2) Vaśya paṭala; (3) Ākarṣaṇa-paṭala. (4) Anyakarma-paṭala; (5) Vidvēṣaṇa-paṭala; (6) Unmatta-paṭala; and (7) Uccāṭana-paṭala

A Telugu rendering of what is contained in these Paṭalas is also given in the MS.

Deals with the details such as the conduct of a fire-offering and the consecration of a Yantra, in relation to the Ucchiṣṭagaṇapati-mantra.

Beginning :

पार्वत्युवाच—

देवदेव जगन्नाथ त्रिनेत्र गजसूदन ।
कलौ युगे महाघोरे अनाचाररतात्मनाम् ॥
कार्येषु जयहीनानामापत्कण्टकवर्तिनाम् ।
कामिनामिष्टासिद्धिस्स्यात्केन मन्त्रेण मे वद ॥

*　　*　　*　　*

उच्छिष्टगणपो नाम महदैश्वर्यदायकः ।
महद्वश्यप्रदश्चैव सर्वाभीष्टफलप्रदः ॥
मन्त्रोद्धारं प्रवक्ष्यामि गणनाथस्य सुन्दरि ।
आदौ प्रणवमुच्चार्य ततो हस्तिमुखाय च ॥

End :

लशुनेन तु संमिश्रं तस्मिन् स्थाप्य विनायकम् ।
साध्यपूर्वं जपेच्छत्रून् अष्टोत्तरसहस्रकम् ।
शरावघटितं पांसुं क्षिपेद्भूमौ श्मशानके ।
शत्रुरुच्चाटितश्शी घ्रं नात्र कार्या विचारणा ॥

Colophon :

इति उच्चाटनपटलः ॥

No. **7776.** उच्छिष्टगणपतियन्त्रम्.

UCCHIṢṬAGAṆAPATIYANTRAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 26*b* of the MS. described under No. 6025.

On the mode of consecrating a metallic plate with mystic diagrams relating to Ucchiṣṭagaṇapati.

Beginning :

उच्छिष्टगणपतियन्त्रविधिर्वक्ष्यते—

त्रिकोणमष्टकोणं च षट्कोणं वृत्तमेव च ।
वृत्तस्योपरि चित्राणि षोडशा इति कीर्तिताः ॥
पुनर्वृत्तं च विज्ञेयं भूपुरं च विलिख्यते ।

End:

त्रिकोणमध्य ओङ्कारं विना वर्णनिवेष्टितम् ॥
अष्टकोणेषु वर्णानि हुं सं षं च विलिख्यते ।
शं वं लं रं च विज्ञेयं यं बीजं लिख्यते क्रमात् ॥
षट्कोणेषु सबीजानि ङ भ णेति च कथ्यते ।
नं मं ह्रां चेति बीजानि मन्त्रराजे प्रकीर्तिताः ॥

No. 7777. उड्डामरेश्वरतन्त्रम्.

UḌḌĀMAREŚVARATANTRAM.

Substance, palm-leaf. Size, 18⅛ × 8⅛ inches. Pages, 90. Lines, 4 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Sudarśanayantrōddhāra 46*a*.

Incomplete.

Contains the Mantras relating to Sudarśana and Kārtavīryārjuna, and also the details connected with the repetition of these Mantras, such as the consecration of the Yantra, the performing of Hōma, etc.

Beginning:

अस्य श्रीसुदर्शनस्तोत्रमहामन्त्रस्य अहिर्बुध्न्यो भगवानृषिः, अनुष्टुप् छन्दः, श्रीसुदर्श . . . . शक्तिः, फट् कीलकं, श्रीसुदर्शनप्रसादसिद्ध्यर्थे जपे विनियोगः । आचक्रादि-अङ्गन्यासः । ध्यानम् । शङ्खं चक्रं . चक्रम् ॥

सिंहासने समासीनं देवेन्द्रं त्रिदिवेश्वरम् ।
श्रोतुं चक्रेशकवचं सुधर्मा(मग)मन् सुराः ॥
देवदेव सहस्राक्ष दैत्यान्तक शचीपते ।
त्वत्तस्सौदर्शनीं विद्यां श्रोतुमिच्छामहे वयम् ॥

पुरा भगवतश्श्रीमदहिर्बुध्न्यान्मया श्रुतम् ।
दिव्यं तत्कवचं गुह्यं शृणुध्वं सुरसत्तमाः ॥

End:

एतद्यन्त्रस्य सामर्थ्यं को वा जानाति शाङ्करि ॥
अहं जानामि विष्णुश्च दत्तात्रेयश्च तद्गुरुः ।
पूर्वं पार्थस्य चरणे पराभवसमुद्भवे ॥
कृष्णेन लिखितं यन्त्रं पार्थस्य जयकाङ्क्षिणा ।
एतद्यन्त्रध्वजाग्रस्थं युध्यमानस्य शत्रुभिः ॥
तं दृष्ट्वा धार्तराष्ट्राश्च भीष्मद्रोणादयस्तथा ।
द्रौणिकर्णादयस्सर्वे भयभीताः पलायिताः ॥

Colophon:

इत्युड्डामरेश्वरतन्त्रम् ॥

No. 7778. कच्छपुटतन्त्रम्.

KACCHAPUṬATANTRAM.

Snbstance, palm-leaf. Size, $13\frac{3}{8} \times 1\frac{1}{4}$ inches. Pages, 260. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains the following Paṭalas:—

१. मन्त्रखण्डकथनम्.
२. जपलक्षणम्.
३. मन्त्रसिद्धिः.
४. मन्त्रमूलिकायोगः.
७. संमोहनप्रयोगः.
८. स्तम्भनप्रयोगः.
९. संमोहनविद्या.
१०. वश्यादिप्रयोगः.
११. आकर्षणयोगः.
१२. बध्नकयोगः.
१३. स्तम्भनयोगः.
१४. बन्धनयोगः.
१५. गोप्यमन्त्रविधानम्.
१६. संमोहनादिविद्या.

१७. विद्वेषणादिविद्या.
१८. स्वस्थावेशकरविद्या.
१९. कौतुकयोगादि.
२२. अदृश्याञ्जनादि.
२३. कालज्ञानयोगकथनम्.

Paṭalas 5, 6, 20 and 21 are not found in this manuscript.

A work on charms and spells and magic; the subjects dealt with herein may be made out from the names of the Paṭalas as given above.

By Nāgārjuna.

The first four Paṭalas of this manuscript are said to have been written by Mājēṭi Sarvēśaliṅga, and the remaining Paṭalas by Bālantarapu Accaṇṇa.

Beginning:

श्रीकुचाम्भोजयुगळे कस्तूरीमदसङ्कुले ।
नखैर्लिखन्तं चित्राणि श्रीनृसिंहमहं भजे ॥
श्रीमद्भार्गवगोत्रजः प्रकटितापस्तम्बसूत्रो महा-
सूरिश्रीबलनारसिंहक(गु)रुणा स्वायंभुवोच्छा(त्पा)दितम् ।
संप्राप्ताखिलवेदशास्त्रकलनाविर्भूतवाग्वैखरी-
विख्यातः प्रणमाम्यहं गुरुनृसिंहेन्द्रं मनोविग्रहम् ॥
श्रीपतिं श्रीनिधिं श्रीशं श्रीमहेन्द्रनृकेसरी ।
हृदि ध्यात्वा प्रवक्ष्यामि यत्तत्सिध्यतु मे वचः ॥
यश्शान्तः . . . . सिद्ध्यष्टकम् ॥

* * * *

विना मालिकया जप्यं राक्षसार्पणमाप्नुयात् ॥
तस्मात्सर्वप्रयत्नेन मालिकाया मनुं जपेत् ॥

Colophon:

इति श्रीनागार्जुनसिद्धविरचिते कच्छपुटे महातन्त्रे मन्त्रखण्डे प्रथमः पटलः ॥

End:

एवं मन्त्रं समालिख्य प्राणस्थापनमाचरेत् ।
पूजां चैव च कृत्वा तु षोडशैरुपचारकैः ॥

Mr. Magal

Magili Ramachandrachar

मस्तके चैव कृत्वा तु यन्त्रं शयनमाचरेत् ।
स्वप्नं चैव भवेदाशु नात्र कार्या विचारणा ॥

Colophon:

इति श्रीनागार्जुनसिद्धविरचिते कच्छपुटतन्त्रे कालज्ञानयोगकथनं नाम त्रयोविंशः पटलः ॥

No. **7779.** कच्छपुटतन्त्रम्.

KACCHAPUṬATANTRAM.

Substance, paper. Size, $11\frac{1}{8} \times 8\frac{3}{4}$ inches. Pages, 132. Lines, 17 on a page. Character, Telugu. Condition, good. Appearance, new.

Paṭalas 1 to 20 complete.

Similar to the above.

By Siddhanāgārjuna who is evidently the same as Nāgārjuna

Beginning:

यश्शान्तः प्रभवान्वयः परशिवः कङ्काळकालान्तको
ध्यानातीतमनादिनित्यनिचयः सङ्कल्पसङ्कोचकः ।
आभासान्तरभासकस्समरसस्सर्वात्मना बोधकः
सोऽयं शर्म ददातु सर्वजगतां विद्यादिसिद्ध्यष्टकम् ॥

* * * *

संसारे बहुविस्तीर्णे विद्यासिद्धिमनेकथा ।
प्रोक्तवान् शङ्करः पूर्वं यदिच्छति च पार्वती ॥
अन्यैर्देवगणैस्सिद्धैर्मुनिदेशिकसाधकैः ।
यद्यदुक्तं हि शास्त्रेषु तत्सर्वमवलोकितम् ॥

* * * *

तत्सर्वञ्च समाकृष्य दुग्धाद्घृतमिवोदरात् ।
साधकानां हितार्थाय मन्त्रखण्डमिहोच्यते ॥
वश्यमाकर्षणं स्तम्भं मोहमुच्चाटमारणम् ।
विद्वेषं व्याधिकरणं पशुसर्वार्थनाशनम् ।

कौतुकश्चेन्द्रजालश्च यक्षिणीमन्त्रसाधनम् ।
छादकं चाञ्जनं दिव्यमदृश्यं पादुकागतिः ॥

* * * *

Colophon:

इति श्रीसिद्धनागार्जुनविरचिते कच्छपुटे प्रथमः पटलः ।

End:

अदृश्यो जायते मर्त्यः देवैरपि न दृश्यते ।
दिग्वेदवसुकामैश्च ह्यङ्कोलीतैलपेषितैः ॥
पुष्यभास्करयोगेन त्रिलोहेन तु वेष्टयेत् ॥
मूर्धस्थैः खेचरत्वं स्यात् योजनानां शतावधि ॥
एते सर्वे महायोगाश्चण्डीमन्त्रेण सिद्धिदाः ।

Colophon:

इति सिद्धनागार्जुनविरचिते कच्छपुटे विंशः पटलः ॥

* * * *

No. 7780. कच्छपुटतन्त्रम्.

KACCHAPUṬATANTRAM.

Pages, 29. Lines, 16 on a page.

Begins on fol. 67*a* of the MS. described under No. 424, wherein this is mentioned as Kautukayōga.

Contains Paṭalas 19 and 20 only treating of Kautukayōga and Dēvāñjanavidyā respectively

Similar to the above.

Beginning:

नमस्ते देवदेवेश करुणाकर शङ्कर ।
अधुना कौतुकं योगं वद मे करुणाकर ॥

ईश्वरः—

पाषाणमूलभेदे तु चर्विते स विचक्षवित् ।
पाषाणबदरादार्भचलकानि च कौतुकम् ॥

End:

असाध्यं देवदेवेशि नात्र कार्या विचारणा ।
सर्वेच्छा(सर्वोऽप्य)घोरमन्त्रेण साध्यमाप्नोति निश्चितम् ॥

Colophon:

इति नागार्जुनसिद्धविरचिते कच्छपुटीतन्त्रे विंश[ति]ः पटलः ॥

No. 7781. कामराजमन्त्रः.

KĀMARĀJAMANTRAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 17*a* of the MS. described under No. 2854.

Complete as found in the 38th Adhyāya of the Ākāśabhairavakalpa.

On the details connected with the repetition of the Kāmarājamantra which is addressed to Manmatha, the god of love.

Beginning:

अथवचोव(थोवाच स्व)यन्देवीं कामराजं महामनुम् ।
तस्य स्मरणमात्रेण मुह्यन्त्यखिलजन्तवः ॥

विशेषतोऽखिला देवा यक्षकिन्नरराक्षसाः ।
गणा गणपिशाचाश्च भूतप्रेतादयोऽम्बिके ॥

श्रीकामराजमन्त्रस्य सम्मोहन ऋषिः स्मृतः ।
ततश्छन्दस्तु गायत्री अनङ्गो देवता स्वयम् ॥

क्लीङ्कारं बीजमीङ्कारं शक्तिर्योगस्तु मोहने ।
क्लामित्यादिकरन्यासं षडङ्गञ्च तथा (भवेत्) ॥

End:

एकारैकारयुक्तं हरिहरसहितं पञ्चबाणमरिम-
रास्याख्यतववक्ष्यण्यमिष्टां हृदयकुचदृशो (शा)मूर्ध्नि गुह्ये क्रमेण(?)।

मर्मस्वेतेषु भूयो निजनयनधनुःप्रेरितैस्तैः पतद्भिः
स्यन्दन्ते सुन्दरीणां मदनपरवशाद्याह्विवक्राद्यथाज्यम् ॥

Colophon:

इत्याकाशभैरवकल्पे कामराजमन्त्रं नाम अष्टत्रिंशोऽध्यायः ॥

No. 7782. कार्तवीर्यार्जुनकल्पः.

KĀRTAVĪRYĀRJUNAKALPAḤ.

Substance, palm-leaf. Size, $15\frac{7}{8} \times 1\frac{3}{4}$ inches. Pages, 60. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, old.

Incomplete.

On the details of procedure, such as the performing of the Pujā, etc., in connection with the repetition of the Kārtavīryārjuna-mantra. A description of the Yantra is also given here

Beginning:

वन्दे शम्भुं सदानन्दं शङ्करं करुणाकरम् ।
चन्द्रार्धचूडामिन्द्राद्यैर्वन्दितं नन्दिवाहनम् ॥

* * * *

कार्तवीर्यस्य मन्त्रस्य विधानं वक्तुमर्हसि ।
तद्रहस्यं महापुण्यं श्रोतुमिच्छामि विस्तरात् ॥

End:

क्लीं ह्लुं शिरसे स्वाहा—नैरृत्यै । उत्पलवर्णस्त्रीरूप . . . सनधराय आं हं शिखायै वषट्—वायवे । इन्द्रवर्णस्त्रीरूपाय अभय वरदपाणये क्रैं श्रैं.

No. 7783. कार्तवीर्यार्जुनकल्पः.

KĀRTAVĪRYĀRJUNAKALPAḤ.

Pages, 114. Lines, 18 on a page.

Begins on fol. 1*a* of the MS. described under No. 5586.

Complete.

The subject matter is the same as in the above. The work contains information on the following subjects :—

कार्तवीर्यार्जुनपीठपूजा ।	कार्तवीर्यार्जुनानुष्टुप् ।
कार्तवीर्यार्जुनमूलमन्त्रः ।	कार्तवीर्यार्जुनगायत्री ।
उड्डामरेश्वरतन्त्रोक्तकार्तवीर्यार्जुनदीपविधिः ।	कार्तवीर्यार्जुनकल्पः ।
	कार्तवीर्यार्जुनमन्त्रविधिः ।
कार्तवीर्यार्जुनस्नानतर्पणविधिः ।	कार्तवीर्यार्जुनपञ्जरः ।
कार्तवीर्यार्जुनहोमविधिः ।	कार्तवीर्यार्जुनकवचः ।
कार्तवीर्यार्जुनयन्त्रलेखनक्रमः ।	कार्तवीर्यार्जुनद्वादशनामस्तोत्रम् ॥

Beginning :

एवङ्गुणविशेषणविशिष्टायां शुभातिथौ कार्तवीर्यार्जुनपीठपूजाङ्करिष्ये। तद्गायत्रीं दशवारं जपित्वा, सुदर्शनेनात्मरक्षां कृत्वा, तदङ्गकलशाराधनं करिष्य इति सङ्कल्प्य कलशपूजां कृत्वा, गरुडमुद्रया निर्विषीकृत्य सुरभिमुद्रयामृतीकृत्य । . . . .

सर्वेषां कार्तवीर्यस्य मन्त्राणां जयकर्मणाम् ।
आदौ तु कवचं योज्यं जप्तव्यानि मनून्यथ ॥

तेषामेकं जपेन्मन्त्री स्वर्क्षनामानुरूपतः ।
तेषां स्वमूलबीजेन स्वरारूढेन पूर्ववत् ॥

End :

सहस्रबाहुः शत्रुघ्नो रक्तवासा धनुर्धरः ।
रक्तगन्धो रक्तमाल्यो राजा स्मरदभीष्टदः ॥

द्वादशैतानि नामानि कार्तवीर्यस्य यः पठेत् ।
सम्पदस्तस्य जायन्ते जनास्तस्य वशं तदा (गताः) ॥

* * * *

448-A

सहस्रबाहुं सशरं सचापं रक्ताम्बरं रक्तकिरीटकुण्डलम् ।
चोरादिदुष्टाभयनाशनाभी(ने)ष्टदं ध्यायेन्महाहैहयकार्तवीर्यम् ॥

Colophon :

इति श्रीकार्तवीर्यद्वादशनामस्तोत्रं सम्पूर्णम् ॥

No. 7784. कार्तवीर्यार्जुनकल्पः.

KĀRTAVĪRYĀRJUNAKALPAḤ.

Substance, paper. Size, 9⅜ × 7⅜ inches. Pages, 36. Lines, 19 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 115*a*. The other works herein are Śūlinīdurgāvidhāna 1*a*, Gaṇapatikalpa 79*a*, Kaumārasaṁhitā 13*2b*, Triśat 153*a*.

Complete.

Subject-matter same as that of No. 7781. Also deals with the different kinds of lamp and wick, and the different incantations, etc., to be used in the act of propitiating the deity with the Mantra.

Beginning :

श्रीदेव्युवाच—

देवदेव महादेव भक्तानुग्रहकारक ।
प्रसन्नो यदि देवेश ममाभीष्टवरं प्रभो ॥

श्रीशिव उवाच—

याचस्व गिरिजे देवि वरं च मनसेप्सितम् ।
गोप्याद्गोप्यतरं किंचिन्नास्ति चाग्रे तव प्रिये ॥
मनस्सन्तोषजननं ददेऽहं वरमुत्तमम् ।

देव्युवाच—

यदिदं वचनं सत्यं भगवन् भवतोऽधुना ।
पृच्छामि त्वां सुरश्रेष्ठ लोकानां हितकाम्यया ॥

कार्तवीर्यस्य नृपतेर्वद दीपविधिं प्रभो ।
दीपभेदांश्च त्रिविधान् वर्तिभेदांस्तथैव च ॥
मन्त्रभेदान् स्थानभेदान् पात्रभेदांस्तथैव च ।

End:

सर्वदा सर्वदेवेशि गुरोराज्ञां न लङ्घयेत् ।
कृतवीर्यसुतस्यात्र मन्त्रभेदं सविस्तरम् ॥
गदितं तव देवेशि मया गुह्यमनुत्तमम् ।
त्वया चैतन्महामन्त्रं न प्रकाश्यं दुरात्मने ॥
विष्णुभक्ताय दातव्यमिति गुह्यं सुदुर्लभम् ।
सर्वरक्षाकरं श्रीदं चोरनाशं मलापहम् ॥
भक्तिमुक्तिप्रदं देवि सत्यमेव न संशयः ।

Colophon:

इति कार्तवीर्यार्जुनकल्पः ॥

ओं आं श्रीं वषट् । कार्तवीर्यार्जुनीय माहिष्मतीनाथाय सहस्रबाहवे सहस्रक्रतुदीक्षिताय दत्तात्रेयप्रियाय आत्रेयाय अनसूयागर्भरत्नाय हुं फट् । इमं दीपं गृहाण अमुकं रक्ष रक्ष दुष्टान्नाशय नाशय . .

* * * *

इति पश्चिमाभिमुखो भूत्वा करसम्पुटं कृत्वा जपेत् ।

ओं आं श्रीं क्रीं त्रीं स्वाहा । क्रों तदग्रसम्पुटितविधानेन जपेत् सहस्रम् ॥

No. 7785. कार्तवीर्यार्जुनकल्पः.
KĀRTAVĪRYĀRJUNAKALPAḤ.

Pages, 5. Lines, 16 on a page.

Begins on fol. 81*b* of the MS. described under No. 424.

This forms the first Paṭala of the Uḍḍāmarēśvaratantra.

On the efficacy of repeating this Mantra which is in praise of Kārtavīryārjuna.

Beginning:

अस्य श्रीकार्तवीर्यार्जुनस्तोत्रमन्त्रस्य दत्तात्रेय ऋषिः, अनुष्टुप् छन्दः, कार्तवीर्यार्जुनो देवता; ओं ल्ह्रां बीजं, श्रीं शक्तिः, हुं कीलकं, कार्तवीर्यार्जुनप्रसादसिद्ध्यर्थे जपे विनियोगः । . . . . . .

निवृत्तरागद्वेषाय पोषिताशेषधन्विने ।
दत्तात्रेयैकशिष्याय जितक्रोधाय योगिने ॥

End:

पूर्वस्तोत्रे पदे वात्र प्रयोगं सर्वमेव च ।
कृत्वा सिद्धिमवाप्नोति द्वयै(यो)रेकविधीरि(धिर्मे)तः ॥

Colophon:

इत्युड्डामरेश्वरतन्त्रे प्रथमः पटलः समाप्तः ॥

No. 7786. कार्तवीर्यार्जुनकल्पः.

KĀRTAVĪRYĀRJUNAKALPAḤ.

Pages, 10. Lines, 20 on a page.

Begins on fol. 146*a* of the MS. described under No. 7748.

Adhyāyas 6 to 8 as found in the Uḍḍāmarēśvaratantra.

These Adhyāyas deal with certain Mantras which are accessory to the Kārtavīryārjuna-mantra. The repetition of these Mantras is considered to have the power of enabling one to annoy one's enemies in various ways.

Beginning:

शृणु देवि प्रवक्ष्यामि सर्वसौभाग्यदायकम् ।
यासां स्मरणमात्रेण करस्थास्सर्वसम्पदः ॥
कारुण्यलक्ष्मीमन्त्रस्य दन्तवक्र ऋषिः स्मृतः ।
गायत्री छन्द इत्युक्तो देवता चाधिदेवता ॥

श्रीबीजं च ततस्स्वाहा श्रीं ह्रीं बीजादिशक्तिके ।
स्वेच्छाभीष्टार्थसिद्ध्यर्थे विनियोगक्रिया ततः ॥
कराङ्गन्यासजालानि कृत्वा ध्यानं समाचरेत् ।

मालिनी—

अरुणकमलमध्ये सन्निषण्णां द्विनेत्रां
तरुणरविसमाभां पङ्कजाक्षीं परां ताम् ।
अमृतकलशपद्माभीतिदानाग्रहस्तां
प्रणतसुभगदोग्ध्रीं नौमि कारुण्यलक्ष्मीम् ॥

End :

ततः कुरु कुरु स्वाहा मन्त्रं षड्विंशदक्षरम् ।
यथा पुरा पुरश्चर्या भर्तृवत्तु क्रियान्तरम् ॥
बिन्दौ बीजं महाशक्तिं त्रयोदशदले मनुम् ।
नामावृतमिदं कार्तवीर्योच्चाटनयन्त्रकम् ॥

Colophon :

इति श्रीउड्डामरेश्वरतन्त्रे अतिरहस्ये उमामहेश्वरसंवादे शङ्करविरचिते कार्तवीर्यार्जुनकल्पे गन्धमादनवज्रदंष्ट्रधीरप्रयोगो नाम अष्टमोऽध्यायः ॥

चण्डविक्रमक्रिया ।

शिव उवाच—

चण्डकायस्तु(स्य) देवेशि सत्यराय ऋषिस्स्मृतः ।
ततोऽतिजगतीच्छन्दो देवता चण्डविक्रमः ॥
भं बीजमाहुतिश्शक्तिरभीष्टविनियोगकम् ।
चामित्यादि कराङ्गस्य न्यासं मायाबिभेदकैः ॥
देवता च महाभाग देवदेवो महाशिवः ।

Colophon :

इति कार्तवीर्यकल्पस्समाप्तः ॥

No. **7787.** कार्तवीर्यार्जुनकल्पः.

KĀRTAVĪRYĀRJUNAKALPAḤ.

Pages, 15. Lines, 7 on a page.

Begins on fol. 42*b* of the MS. described under No. 5924.

Complete.

Gives the Kārtavīryārjuna-mantra and describes the manner of drawing the Yantra relating thereto.

Beginning:

ओं नमो भगवते कार्तवीर्यार्जुनाय . . . . . सम्यञ्मारय मारय हुं फट् स्वाहा ।

अनेन मन्त्रराजेन सर्वकर्माणि साधयेत् ।
त्रिसहस्रं जपं कुर्यात् . . . समन्त्रकम् ॥
पूजयेत्तत्तदङ्गाद्यैः पूर्वोक्तावरणैर्बुधः ।
क्षिप्रं समीहितार्थाप्त्यै मालामन्त्रप्रजापकः ॥

End:

गायत्रीयन्त्रमन्त्रौ च प्राणस्थापनमेव च ।
भूतदिक्पालबीजानि मन्त्रस्याङ्गानि वै दश ॥

No. **7788.** कार्तवीर्यार्जुनदीपविधिः.

KĀRTAVĪRYĀRJUNADĪPAVIDHIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 39*a* of the MS. described under No. 5858.

Complete.

Describes the nature of the lamp to be lighted and kept on the lamp-stand which has to be placed on a heap of rice on which the Kārtavīryārjunayantra is written.

Beginning:

स्वस्थे पुण्यदेशे गोमयेनानुलिप्य शुभ्रकम्बलस्योपरि वस्त्रं तस्योपरि कुशासनं परिस्तीर्य । . . . . तदुपरि स्वर्णकर्षत्रयमात्रं रजतं वा विंशतिकर्षमात्रं दीपपात्रं

कृत्वा स्वर्णं वा रजतं वा वर्तिं कृत्वा अथ वा ताम्रपात्रं वा दीपपात्रं कुर्यात् । विंशतितन्तुभिर्वर्तिं कुर्यात् ।

End:

अनेनैव प्रकारेण साधयेत्कार्यमुत्तमम् ।
प्रत्ययो जायतेऽवन्ध्यो नान्यथा क्रतुकोटिभिः ॥

Colophon:

इति उड्डामरतन्त्रे पार्वतीश्वरसंवादे कार्तवीर्यार्जुनदीपविधानं सम्पूर्णम् ॥

No. 7789. कार्तवीर्यार्जुनमन्त्रकल्पः.
KĀRTAVĪRYĀRJUNAMANTRAKALPAḤ.

Pages, 2. Lines, 18 on a page.

Begins on fol. 335*a* of the MS. described under No. 5477, and forms a part of Mantramālikā shewn among the other works therein.

Incomplete.

Describes the manner of performing the Hōma or fire-offering in connection with the Kārtavīryārjuna-mantra, and also indicates the number of times the Mantra should be repeated in order to make it effective and the manner of drawing the Yantra relating thereto.

Beginning:

ध्यानमात्रेण रक्षा स्यात् सुमहत्सु भयेष्वपि ।
चोरैर्हृतं तथा द्रव्यं सद्यो याति प्रकाश्यताम् ॥

लक्षं जपः । रक्तमण्डले त्रिमधुरयुक्तदशांशहोमः । वैष्णवपीठे पुरतो दत्तात्रेयं यजेत् । वामपार्श्वे गार्ग्यः । पुनरङ्गैः प्रथमावृतिः । . . . .

वैश्वदेवावसाने च दूर्वाभिर्घृतसंयुतैः ।
एकादशाग्नौ जुहुयादारोग्यायायुषे श्रिये ॥

End :

आवेष्ट्य व्यञ्जनार्णैश्च भूपुराग्रेषु तद्बहिः ।
क्षौं बीजमालिखेद्देवं यन्त्रमेतदुदीरितम् ॥

वाक्यम्—

तत्र चक्रमन्त्रस्येति सुदर्शनमन्त्रः । आ च स्वेति तस्याङ्गानि—
इति.

No. 7790. कार्तवीर्यार्जुनयन्त्रपूजाविधिः.

KĀRTAVĪRYĀRJUNAYANTRAPŪJĀVIDHIḤ.

Pages, 9. Lines, 4 on a page.

Begins on fol. 9*a* of the MS. described under No. 6055.

Complete.

On the manner of conducting the worship in connection with the consecration of the metallic plate with mystic diagrams relating to Kārtavīryārjunamantra. The wearing of such a consecrated plate is considered to be efficacious in warding off misery and in causing the accomplishment of one's desires.

Beginning :

यन्त्रपूजाप्रकारा महाद्वारपालदेवेभ्यो वास्तुपूजाप्रकारः । ह्रः—अस्त्राय फट्—इति मन्त्रेण द्वारदक्षिण(वा)मशाख(यो)र्देहल्यां च जलं संप्रोक्ष्य द्वारपालान् प्रपूजयेत् । गं गणपतये नमः—इति दक्षिणवामशाखयोः दक्षिणद्वाःप्रदेशे सम्पूज्य ।

End :

रक्ताम्बुजाक्षमतिभीषणमेघनादं नीलाम्बुजाभगजपुष्पगतं नमामि ।
सर्वेष्टदं सकलदुःखहरं विशिष्टं सर्वेष्टदं सकलदुःखनिवारणाय ॥

Colophon :

इति यन्त्रपूजा समाप्ता । कार्तवीर्यार्जुनं समाप्तम् ॥

No. 7791. कार्तवीर्यार्जुनयन्त्रलक्षणम्.

KĀRTAVĪRYĀRJUNAYANTRALAKṢAṆAM.

Pages, 5. Lines, 4 on a page.

Begins on fol. 7*a* of the MS. described under No. 6055, wherein this has been omitted to be shewn among the other works.

Complete.

Lays down clearly the manner of drawing the Kārtavīryārjunayantra. Herein it is stated that the Yantra should be drawn on a plate of gold, silver or copper or on a Bhūrja leaf and that the duration of its efficacy would depend upon the nature of the substance on which it is drawn.

Beginning:

यन्त्रलक्षणम्—

आदौ षट्कोणं तद्बहिर्वृत्तं तत्कोष्ठाद्यानि विलिखेत्। तद्बहिः राशिचक्रं विलिख्य ततश्चक्रत्रयं तद्बहिः चतुरश्रं विलिखेत्। षट्कोणमध्ये तारबीजम्।

End:

सर्वरक्षाकरं भवति।

यावज्जीवं तु सौवर्णे रौप्ये विंशतिवर्षकम्।
भूर्जे द्वादशवर्षाणि तदर्धं ताम्रके पठे (पट्टके)॥

Colophon:

इति यन्त्रलक्षणम्॥

No. 7792. कालमन्त्रः.

KĀLAMANTRAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 27*b* of the MS. described under No. 2854.

Complete.

This forms the 59th Adhyāya of the Ākāśabhairavakalpa and deals with the Mantra addressed to Yama, the god of death. A proper repetition of the Mantra is considered to bestow on one the power to bring about the death of one's enemies.

Beginning:

अस्य श्रीकालमन्त्रस्य पुलस्त्यो भगवानृषिः ।
छन्दस्तु जगती प्रोक्ता देवता काल उच्यते ॥
दुं बीजं प्रकृतिश्शक्तिः नियोगस्सर्वनाशने ।
ङामित्यादिकराङ्गस्य न्यासं मूलेन चाम्बिके ॥

End:

जपावसाने सर्वेशि कालाकृष्टो भवेद्रिपुः ।
सकलं हेतुसंयुक्तं पुनः कालाय वेदवे(येत्) ॥

Colophon:

इत्याकाशभैरवकल्पे कालमन्त्रं नाम एकोनषष्टितमोऽध्यायः ॥

No. 7793. कालिकागमः.
KĀLIKĀGAMAḤ

Pages, 113. Lines, 12 on a page.

Begins on fol. 1*a* of the MS. described under No. 3832.

The subject-matter dealt with herein can be made out from the names of the Paṭalas given below. The Mantras referred to in these Paṭalas are considered to have the power of enabling one to cause the death of one's enemies :—

१. धूमावतीमन्त्रविधानम्.
२. धूमावतीयन्त्रविधानम्.
३. धूमावतीमन्त्रभेदकथनम्.
४. धूमावतीमन्त्रभेदकथनम्.
५. काकधूमावतीमन्त्रक्रमः.
६. आश्चर्यदमन्त्रयोगः.
७. धूमावतीदशाक्षरीमन्त्रविधानम्.
८. धूमावतीविद्वेषणम्.
९. आर्द्रपटीश्वरीमन्त्रोद्धारः.
१०. आर्द्रपटीमन्त्रभेदः.
११. आर्द्रपटीमन्त्रभेदः.
१२. सुसिद्धार्द्रपटीमन्त्रः.
१३. घर्मटिकामन्त्रोद्धारः.
१४. जन्मर्क्षवृक्षप्रतिमाविधानम्.
१५. कालिकामन्त्रोद्धारः.
१६. कालिकामन्त्रभेदप्रयोगः.
१८. विध्वंसिनीमन्त्रः.
१७. अस्त्रविद्याविधानम्.
१९. एकरात्रप्रसादमन्त्रः.
२०. मन्त्रपल्लवविधानम्.
२१. सर्वप्रयोगहरमन्त्रविधानम्.

Beginning:

उद्दामद्युमणिद्युतिप्रतिभटप्रारब्धकूलङ्कषा
यत्तेजस्त्रसरेणवो जगदपध्वान्तं सदा कुर्वते ।
यः पद्मापरिरम्भसम्भ्रमभरव्यग्रेण (ग्राग्र) दोर्वल्लरी(रिः)
पायाद्वस्स ह (हि) खेचरीपुरमहोग्रश्रीनृकण्ठीरवः ॥

सर्वविघ्नप्रशमनं सर्वसिद्धिकरं परम् ।
सर्वजीवप्रणेतारं वन्दे विजयदं हरिम् ॥

श्रीकरं शङ्करावाससिद्धचारणसेवितम् ।
सदा मुनिजनावासं सायुज्यप्रदमव्ययम् ॥

नानाकल्पद्रुमाकीर्णं शिवचिन्तामणीयुतम् ।
कामधेनुसहस्रेण शोभितं पर्वतोत्तमम् ॥

नित्यमुक्तसमायुक्तं सत्यज्ञानसमावृतम् ।
अच्छिन्नभक्तसंसेव्यं महाकैलासमन्दिरम् ॥

तत्र तातं महारुद्रं कुमारस्सादरात्ततः ।
उवाच परमं वाक्यं नत्वा भक्त्या समादरात् ॥

चतुर्दश महाविद्याश्चन्द्रचूड तवाज्ञया ।
अभ्यस्तोऽहमहं सम्यक्साधु भो पार्वतीपते ॥

प्रयोगविद्याविपुलं शत्रुसंहारकारकम् ।
नोक्तवान्मम सर्वेश किमर्थं करुणाकर ॥

पुत्रोऽस्मि तव शिष्योऽस्मि ब्रह्मचारी जितेन्द्रियः ।
किमर्थं गोपनं तात वद वात्सल्यगौरवात् ॥

ईश्वरः—

साधु साधु महाप्राज्ञ क्रौञ्चभेदनकोविद[ः] ।
गोपनीया प्रयत्नेन अस्त्रविद्या कदाचन ॥

देवतार्थे द्विजार्थे च यज्ञार्थे यमिरक्षणे ।
पतिव्रतां च गां चैव रक्षणेनैव दोषभाक् ॥
व्रतिनो व्रतसिद्ध्यर्थे गुरुपोषणतत्परः ।
प्रयोगमाचरेत्पुत्र न दोषं मनुरब्रवीत् ॥
एताद्विना प्रयोगं यो(य)ः कुरुते च नराधमः ।
रौरवं नरकं याति ब्रह्मकल्प(ा)युतानि च ॥
तस्मात्त्वं पुत्र सततं वर्जयेन्मारणादिकम् ।
तुर्यमाथर्वणं वेदं नानामन्त्रसमन्वितम् ॥
नानावेदार्थसारं च नानातन्त्रसमन्वितम् ।
तन्मध्ये केवलं तुर्यमाथर्वणशिरस्तथा ॥
तुर्यात्तुर्यतरं चैव तत्सखेत्यभिधीयते ।
आथर्वणशिखाविद्यां यो जानाति स बुद्धिमान् ॥
तस्य शत्रुस्त्रिलोकेषु नास्ति सत्यं कुमारक ।
विद्यां गुरुमुखात् ज्ञात्वा शीघ्रं सिद्धिमवाप्नुयात् ॥
पुरा मुनिकुलश्रेष्ठः कुम्भजो राघवं प्रति ।
एतत्प्रयोगविद्यां च समरे चोपादिष्टवान् ॥
अर्जुनस्येन्द्रकीलाद्रौ उपदिष्टो(देष्टा)स्म्यहं तथा ।
राक्षसान् कुरुवीरांश्च जित्वा तेनैव विद्यया ॥
शृणु वत्स शुचिर्भूत्वा विद्यां तां त्वं कुमारक ।

End:

अर्कमूलं समाश्रित्य जपं चार्कशतं जपेत् ।
महता तापमाप्नोति म्रियते सप्तरात्रतः ॥
एतदाकर्षिणी शक्तिः कर्मगर्भितमेव च ।
त्रिदिनं रात्रिजपनादाकर्षणकरं भवेत् ॥

Colophon :

इति श्रीकाळिकागमे कालरुद्रतन्त्रे आथर्वण्यस्त्रविद्यायामेकविंशतितमः पटलः ॥

No. 7794. कालिकागमः.
KĀLIKĀGAMAḤ.

Substance, paper. Size, 9¼ × 7⅜ inches. Pages, 32. Lines, 16 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are :—Triśatīnāmāvalī 24*a*, Vanadurgākalpa 32*a*, Tripurāsiddhānta 71*a*, Vārāhyaṣṭōttaraśata 121*b*, Mātaṅgīkavaca 122*b*, Saṁhāraśrīcakranyāsa 124*b*, Sṛṣṭicakranyāsa 128*b*, Śrīvidyānyāsādi 131*a*, Bagalāmahālakṣmīkalpa 158*a*.

Paṭalas 9 to 15.

Same work as the above.

No. 7795. कालिकापूजाविधिः.
KĀLIKĀPŪJĀVIDHIḤ.

Pages, 2. Lines, 19 on a page.

Begins on fol. 49*b* of the MS. described under No. 2886, wherein this has been omitted to be shewn among the other works.

Complete.

On the details connected with the conduct of the worship of the goddess Kālikā, or Kālī, with the object of realizing one's desires.

Beginning :

श्रीभैरव उवाच—

देवदेव महाबाहो भक्तानां सुखवर्धन ।
केन सिद्धिं नयत्याशु काली त्रैलोक्यमोहिनी ॥
तन्मे वद जगन्नाथ दयाप्रयतमानसः ।
दिवा चैव प्रकर्तव्यं सर्वकामार्थसिद्धये ॥
द्विजानाञ्चैव सर्वेषां विधिरत्र च कथ्यते ।
शूद्राणाञ्चैव सम्प्रोक्तं रात्रौ दिव्यं महामतम् ॥

End:

आं वाराह्यै नमः । ओं नारसिंह्यै नमः । पुनर्देवीशिरसि पुष्पं दत्वा स्तोत्रं पठित्वा विसर्जनीयमुद्रया विसृज्य सन्निधापनमुद्रया सन्निधापयेत् ॥

इति पूजाक्रमः ॥

अथ काम्यम् । तत्र नागयज्ञोपवीतधारिणीं चन्द्रार्क(र्ध)कृतशेखरां जटान्विता महाकारसमन्वितां सञ्चिन्त्य केवलान्देवीं रक्तपुष्पैरभ्यर्च्य . . . . देवीन्ध्यायेत् । कृष्णपुष्पैरर्चयेत् । स्वाहा देविका ॥

No. **7796.** कालरात्रीकल्पः.

KĀLARĀTRĪKALPAḤ.

Pages, 26. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 5600.

Complete.

Deals with certain details in connection with Kālarātrīmantra, the proper repetition of which, it is believed, has the power of enabling one to do various kinds of harm to one's enemies.

Contains the following Paṭalas :—

१. कालरात्रीमन्त्रमाहात्म्यम्.	७. स्तम्भनप्रयोगः.
२. स्नानपूजाविधिक्रमः.	८. मोहनम्.
३. यन्त्रोद्धारः.	९. आकर्षणम्.
४. पूजाप्रकारः.	१०. विद्वेषणम्.
५. पुरश्चर्याहवनविधिः.	११. उच्चाटनम्.
६. वशीकरणम्.	१२. मारणम्.

Beginning:

श्रीपार्वत्युवाच—

देवदेव महादेव भक्तानामिष्टदायक ।
त्वत्प्रसादान्मया सर्वं श्रुतं रुद्रादियामळम् ॥

इदानीं श्रोतुमिच्छामि यन्मे मनसि वर्तते ।
काळरात्र्यां क्रमेऽर्चां च तत्सर्वं कृपया वद ॥

ईश्वर उवाच—

एतद्गुह्यतमं देवि न कस्य कथितं मया ।
गुह्याद्गुह्यतमं गोप्यं श्रुतं तद्बहुकारणम् ॥
इदानीं तव भूत्यर्थं कथयामि सुविस्तरम् ।
शृणुष्वैकाग्रमनसा भक्तिपूर्वेण पार्वति ॥
सन्ति नानाविधा मन्त्रा आगमोक्तास्सबीजकाः ।
तथैव देवमन्त्राश्च पुराणे डाम्ब(म)रे तथा ॥
ते सर्वे निष्फला जाताः कलौ वीर्यविवर्जिताः ॥

End :

प्रत्यहं प्रजपन्मन्त्रमयुतं दक्षिणामुखः ।
न्यासं देहस्य कुर्वीत पूर्वोक्तं पद्धतेर्यथा ॥

अथ मन्त्रः—

ओं श्रां श्रीं श्रूं मृत्येश्वरी(रि) कृं कृं ते देवदत्तं शीघ्रं मारय मारय क्रौं—इति मन्त्रः ॥

Colophon :

इति श्रीकाळरात्रिकल्पे ईश्वरपार्वतीसंवादे मारणं नाम द्वादशः ॥
इति काळरात्रिकल्पं समाप्तम् ॥

No. **7797.** कालरात्रीकल्पः.

KĀLARĀTRĪKALPAḤ.

Pages, 31. Lines, 20 on a page.

Begins on fol. 204*a* of the MS. described under No. 581.

Paṭalas 1 to 12 complete.

Same as the above.

No. 7798. किरातवाराहिकल्पः.
KIRĀTAVĀRĀHĪKALPAḤ.

Pages, 3. Lines, 9 on a page.

Begins on fol. 69*a* of the MS. described under No. 21.

Incomplete.

On the details connected with the manner of practising the Kirātavārāhīmantra which is considered to have the power of compassing the destruction of one's enemies.

Beginning :

देवदेव महादेव त्रिपुरघ्न सदाशिव[:] ।
वद कैरातवाराह्या मन्त्रं मन्त्रविदां वर ॥

ईश्वरः—

किरातनाम वाराही कालमृत्युस्वरूपिणी ।
तन्मन्त्रस्मरणे देवि शत्रुक्षयमवाप्नुयात् ॥
आदौ प्रणवमुच्चार्य वाराहीबीजमुच्चरेत् ।
ततश्चक्रवराहं च मायाबीजं ततो(दो)च्चरेत् ॥

End :

निशा दिगम्बरो भूत्वा न्यासध्यानेन पूर्वकम् ।
नित्यमष्टोत्तरं जप्त्वा मारणं चिन्तितं भवेत् ॥
न्यासध्यानं प्रवक्ष्यामि मन्त्रकैरातकेषु च ।
कालमृत्युर् ऋषिः प्रोक्तो गायत्री छन्द उच्यते ॥

No. 7799. किरातवाराहीकल्पः.
KIRĀTAVĀRĀHĪKALPAḤ.

Substance, palm-leaf. Size, $10\frac{1}{3} \times 1\frac{1}{4}$ inches. Pages, 8. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 35*a*. The other works herein are :—Vanadurgākalpa 1*a*, Vanadurgāmantraviṣaya 21*a*.

Has neither beginning nor end.

Similar to the above.

The carrying out of a fire-offering followed by the repetition of this Mantra is held to have the power of bewildering one's enemies.

Beginning:

युग्मपूजां ततः कुर्यात् त्रिपश्च नव एव वा ।
मन्त्रसिद्धिर्भवेत्तस्य नात्र कार्या विचारणा ॥
अमुकस्थान्(न) दिवोर्नां(ङ्ना)म कृत्वा मन्त्रशतं जपेत् ।
मन्त्रान्ते होममित्युक्त्वा मोहनं भवति ध्रुवम् ॥

* * * *

वाराहीति पदं चोक्त्वा हुंफट्स्वाहासमन्वितम् ।
मन्त्रं किरातवाराह्यास्सप्तत्रिंशत्सुबीजकम् ॥
षोडशैरुपचारैश्च पूजयेत्सप्त मातृकाः ।

End:

आद्यवृत्तं लिखेन्मन्त्रमास्त्रवाराह्यमुत्तमम् ।
द्वितीयवर्णमालिख्य कादिक्षान्तं कुलेश्वरि ॥
प्राणप्रतिष्ठाम.

No. 7800. कौतुकयोगः.
KAUTUKAYŌGAḤ.

Substance, palm-leaf. Size, $13\frac{1}{8} \times 1\frac{1}{8}$ inches. Pages, 17. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Incomplete.

Lays down the details connected with the repetition of a certain Mantra addressed to Kālī, which is supposed to have the power of enabling one to bring other people under one's control and of causing the realization of one's desires. The details relating to the preparation of a certain powder having magical properties is also given here.

Beginning:

कञ्जाक्षं करुणामूर्तिं श्रीमहोग्रनृकेसरिम् ।
हृदि ध्यात्वा प्रवक्ष्यामि यत्तत्सिध्यतु मे वचः ॥

श्रीपार्वत्युवाच—

प्रयोगं वद मे देव सर्वलोकोपकारकम् ।
सर्वमन्त्रमयं स्वामिन् कृपां कुरु जगत्पते ॥

ईश्वर उवाच—

यन्त्रमेकं प्रवक्ष्यामि तत्प्रकारोदितं पुरा ।
तेनैव मन्त्रराजेन कौतुकानि बहूनि च ॥

* * * *

श्वेतगुञ्जाफलं ग्राह्यं रविवारे तु साधकः ।
शवदाहस्थलोत्थेन भस्मनैव च संयुतम् ॥

End :

अग्नियन्त्रादिकं चैव बन्धनं भवति ध्रुवम् ।
नश्येद्वा भूतनाशश्च भूतज्वरमवाप्नुयात् ॥
अथवा स्फोटकैर्युक्ता.

No. 7801. कौमारसंहिता.
KAUMĀRASAṀHITĀ.

Pages, 32. Lines, 17 on a page.

Begins on fol. 132b of the MS. described under No. 7784
Complete.

Deals with certain details connected with the Gaṇapatimantra The names of the Adhyāyas give an idea of the subjects treated of in the work.

Contains the following Adhyāyas:—

१. विद्यागणेशमन्त्रोद्धारः.
२. पुरश्चरणविधिः.
३. विद्यागणेशपूजाविधिः.
४. आवरणपूजा.
५. वश्याकर्षणप्रयोगः.
६. स्तम्भनप्रयोगः.
७. उच्चाटनप्रयोगः.
८. होमविधानम्.
९. सङ्ग्रामविजयविधानम्.

१०. विद्वेषणाविधिः.
११. जपफलनिरूपणम्.
१२. मातृकाबीजनिरूपणम्.
१३. बहिर्योगः.
१४. यन्त्रोद्धारः.

Beginning:

श्रीदेव्युवाच—

देवदेव जगन्नाथ सर्वज्ञ सकलेश्वर ।
कलौ युगे महाघोरे अनाचाररताखिलाः ॥
अथ तेषामिष्टसिद्धिः केन मन्त्रेण मे वद ।
केनोपायेन देवेश नराणां स्वल्पचेतसाम् ॥
अगम्यपरदारेषु [वृत्ति]चित्तवृत्तिमतां नृणाम् ।
राजप्रसादहीनानामापत्कण्टकवर्तिनाम् ॥

महेश्वर उवाच—

रहस्यं संप्रवक्ष्यामि शृणु पार्वति सम्प्रति ।
अनाचाररता(प्रधा)नानामलसानां नृपादिषु ॥
इष्टसिद्धिर्भवेत्तेन तथा वक्ष्यामि साम्प्रतम् ।
उच्छिष्टगणपो नाम महदैश्वर्यदायकः ॥

End:

लेखयित्वा विधानेन तां च तालेन बन्धयेत् ।
रक्तवस्त्रेण संवेष्ट्य तन्तुना वेष्टयेत्ततः ॥
अर्चयेन्मूलमन्त्रेण धारयेद्वामके भुजे ।
यन्त्रराजमिमं प्रोक्तं हृल्लेखायां विनिर्दिशेत् ॥
रक्तपुष्पैश्च होमेन राजानं वशमानयेत् ॥

Colophon:

इति सकलागमसङ्ग्रहे गणपतिकल्पे यन्त्रोद्धारश्चतुर्दशः पटलः ॥
ग्रन्थस्समाप्तः ॥

No. **7804.** गणपतिकल्पः.

GAṆAPATIKALPAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 43*b* of the MS. described under No. 21, wherein this has been omitted to be shewn among the other works.

Incomplete.

Similar to the above. Lays down the details relative to the conduct of the worship of Gaṇapati and to the performance of a fire offering.

Beginning:

कृष्णाष्टमीं समारभ्य यावत्कृष्णचतुर्दशि ।
नित्यमष्टसहस्रं च जपेन्मन्त्रं सुसिद्धये ॥
सिद्धिर्भवेत्स मन्त्रस्य सर्वकामक्षमो भवेत् ।
तर्पणं चाभिषेकं च होमं कुर्याद्दशांशतः ॥
अपूपैरिक्षुदण्डैर्वा स्वशक्त्या मोदकैस्तथा ।
प्रतिवासरमामन्त्र्य गणनाथं प्रपूजयेत् ॥

End:

निम्बकाष्ठैरष्टोत्तरसहस्रं सप्तदिनेषु होमयेत् । शत्रुर्ज्वरितो भवति । उच्चाटनं भवति । वटसमिद्भिरष्टोत्तरसहस्रं सप्तदिनेषु होमयेत् । शत्रुर्ज्वरितो भवति । अष्टोत्तरसहस्रं निम्बकाष्ठैः.

No. **7805.** गणपतिकल्पः.

GAṆAPATIKALPAḤ.

Pages, 16. Lines, 6 on a page.

Begins on fol. 160*a* of the MS. described under No. 2848.

Complete.

This forms the 19th Adhyāya of the Mahāgaṇapatikalpa, and deals with the repetition of a certain Mantra addressed to Gaṇapati, considered to be conducive to the prosperity of the worshipper.

Beginning:

ऋद्धिमन्त्रं प्रवक्ष्यामि ऋजुं सर्वार्थसिद्धिदम् ॥
चराचरात्मविश्वस्य सर्वसिद्धिसमृद्धिदम् ॥

ऋषिर्वै ऋद्धिमन्त्रस्य पुण्डरीको महाऋषिः ।
छन्दोऽनुष्टुप् तथा देवि देवता ऋद्धिदायिनी ॥
ऋं बीजं धीं रमा शक्तिः माया कीलकमुच्यते ।
नानाभीष्टार्थसिद्ध्यर्थे विनियोगस्त्रिवर्णकैः ॥

* * * *

Colophon :

इति श्रीमहागणपतिकल्पे ऋद्धिविद्याविधिर्नाम एकोनविंशोऽध्यायः ।

End :

इति जगति समीक्ष्य शान्तिविद्यां निजगुरुवदनादुपासमेत्य ।
विधिमुखविबुधैरशक्यकृत्यं कलयति ऋजु तद्यथा रमेशः ॥

No. **7806.** गणपतिमन्त्रकल्पः.

GAṆAPATIMANTRAKALPAḤ.

Pages, 6. Lines, 8 on a page.

Begins on fol. 22*b* of the MS. described under No. 2854.

Complete as found in the 56th Adhyāya of the Ākāśabhairava-kalpa.

Deals with the details prescribed in connection with the repetition of the Gaṇapatimantra.

Beginning :

श्रीशिव उवाच—

शृणु देवि महागुह्यं मन्त्रं सर्वार्थसाधकम् ।
शत्रुमृत्युप्रशमनं चतुर्वर्गफलप्रदम् ॥
यस्य स्मरणमात्रेण क्षुभ्यन्त्यखिलमूर्तयः ।
तादृशं भीषणं शान्तं गाणपत्यं वदामि ते ॥

अथ महागणपतिमन्त्रस्य गणक ऋषिः । छन्दो नृचिद्गायत्री तु गणेशो देवताम्बिके । गंकारं बीजमुच्चार्य ततः स्वाहा शक्तिः विनियोगस्त्वभीष्टये । गामित्यादिकराङ्गस्य न्यासं मूलेन वाम्बिके ॥

End :

मूलं च तर्पणं कुर्यात् चतुर्वारं स मन्त्रितः ।
तस्य सर्वसमृद्धिस्स्याद्विघ्नेशस्य प्रसादतः ॥

Colophon :

इत्याकाशभैरवकल्पे गणपतिमन्त्रो नाम षट्पञ्चाशोऽध्यायः ॥

No. 7807. गणपतिमूलिकाप्रयोगः.

GAṆAPATIMŪLIKĀPRAYŌGAḤ.

Pages, 5. Lines, 8 on a page.

Begins on fol. 25*b* of the MS. described under No. 2854.

Complete as found in the 58th Adhyāya of the Ākāśabhairava-kalpa.

On the preparation and use of certain magical recipes which are considered to acquire mysterious properties through the repetition of the Gaṇapatimantra.

Beginning :

अथान्यं वच्मि ते देवि मूलिकासिद्धिसङ्ग्रहम् ।
सर्वलोकजयश्चैव सर्वकार्यार्थसिद्धये ॥
गुळिकासिद्धयोगें तु पेयश्चामृतयोगके ।
द्वेषणन्दग्धयोगे तु मृत्युयोगे च निग्रहे ॥
विशेषाद्रोगनाशायामृतयोगे च सिद्धये ।
स्तम्भनायापरे पक्षे धृतियोगे च वर्जिते ॥

* * * *

अश्वगन्धां समूलत्वक् पिष्ट्वा कर्पूरसंयुतम् ।
पाने ख(घ)ने प्रदातव्यं रम्भाराम(ा)वशङ्करम् ॥

End :

प्राणप्रतिष्ठापूर्वन्तु कुर्यात्सर्वमतन्द्रितः ।
यस्तस्य सर्वसिद्धिः स्यान्न चेत्सर्वं न सिध्यति ॥

Colophon :

इत्याकाशभैरवकल्पे गणपतिमूलिकाप्रयोगो नामाष्टपञ्चाशत्तमोऽध्यायः ॥

No. 7808. गणपतियन्त्रध्यानम्.

GAṆAPATIYANTRADHYĀNAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 169*a* of the MS. described under No. 2848, wherein this has been omitted to be shewn among the other works.

Contains Dhyānaślōkas, i.e, stanzas used for meditation, in connection with the Gaṇapatiyantra.

Beginning :

विकिरन्तं स्वभक्तेभ्योऽविरतस्रुतिधारया ।
गण्डस्थलगलद्दानगन्धलुब्धान्मुहुर्मुहुः ॥

*   *   *   *

तन्मध्ये लिपिसंयुक्तं दलाष्टकमनोहरम् ।
षट्कोणचक्रमध्यस्थं त्रिकोणाङ्कितकर्णिकम् ॥
वृत्तभूमध्य . . पेतं विलसत्केसरावृतम् ।
सर्वशक्त्यात्मकदलं पूजयाम्यासनात्मकम् ॥

End :

जपाकुसुमसङ्काशं दीप्तिरञ्जितदिङ्मुखम् ।
गजाननं जगद्वन्द्यं तुन्दिलं मह आश्रये ॥

No. 7809. गणेशयन्त्रः.

GAṆEŚAYANTRAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 25*a* of the MS. described under No. 2854, and not on fol. 24*a* as shown among the other works therein.

Complete; forms the 57th Adhyāya of the Ākāśabhairavakalpa.

On the consecration of a metallic plate with mystic diagrams with the help of the Gaṇapatimantra. It is stated that the diagrams may be drawn either on a metallic plate or on a palm-leaf.

Beginning :

श्रीशिव उवाच—

अथान्यं वच्मि ते यन्त्रं सर्वकामफलप्रदम् ।
साध्यश्च फलके लोहे तालपत्रेऽथ तद्रुके ॥
लिखेत्सप्तचतुष्कोष्ठे रेखा रेखाग्रशूलके ।
क्रमान्मन्त्रं बहिः साध्यमावाह्यात्र गणेश्वरम् ॥

End :

समन्त्राणि सदा कुर्यादनुक्तान्यौषधान्यपि ।
यस्तस्य सर्वसिद्धिः स्यात् साधको नास्ति शोभने ॥

Colophon :

इत्याकाशभैरवकल्पे महागणपतिविधानं नाम सप्तपञ्चाशोऽध्यायः ॥

No. **7810.** गरुडपञ्चाक्षरीविधानम्.

GARUḌAPAÑCĀKṢARĪVIDHĀNAM.

Pages, 4. Lines, 19 on a page.

Begins on fol. 22*a* of the MS. described under No. 2886. Complete.

Taken from the Ākāśabhairavakalpa ; on the details connected with the repetition of the five-syllabled Mantra addressed to Garuḍa. It is stated that the formula ओं ऐं ह्रीं श्रीं क्लीं क्ष्म्रां should precede the Mantra in repetition. The feeding of Brahmins is also said to be necessary to secure the efficacy of the Mantra.

Beginning :

गरुडपञ्चाक्षरकल्पे काश्यपीये सारमुद्धृत्य सङ्ग्रहः क्रियते ।

द्वन्द्वतारानुतारश्च महामायां रमामपि ।
कामराजस्य(श्च) तस्यान्दै(न्ते)क्ष्म्रान्तु बीजचतुष्टयम् ॥
मन्त्रादौ योजयेन्मन्त्री सर्वसिद्धिकरं परम् ।

अस्यार्थः—द्वन्द्वतारम् ओं अनुतारम् ऐं महामायां ह्रीं रमां श्रीं कामराजं क्लीं बीजचतुष्टयं नाम क्ष्म्रां एतत्सर्वं मन्त्रादौ योजयेत् ।

End:

ब्राह्मणान् भोजयेत्पश्चात् यथाविभवसारतः ।
एवं यः कुरुते भक्त्या सोऽभीष्टफलमाप्नुयात् ॥

Colophon:

इत्याकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे काश्यपीये गरुडपञ्चाक्षराविधानं सम्पूर्णम् ॥

No. 7811. गरुडयन्त्रम्.
GARUḌAYANTRAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 168*b* of the MS. described under No. 2848, wherein this has been omitted to be shewn among the other works.

Incomplete.

Deals with the consecration of the Garuḍayantra.

Beginning:

अथ यन्त्रम्—
षट्कोणान्तरिताग्निवायुलिखितं मायां च सप्तार्णकं
कोणेष्वश्रिषु साध्यवह्निसहितं तद्बाह्यचिन्तामणिम् ।
पाशं शक्तिसबिन्दुकं सुविलसद्बाह्येऽङ्कुशेनावृतं
तारेणावृतबिन्दुनादसहितं प्रायोगकाले बुधः ॥

* * * *

यमिति वायुबीजं ह्रीमिति मायाबिजं चान्तर्विलिख्य ओं विष्णुवाहनाय इति सप्तार्णकेन वेष्टयेत् ।

End:

रमाविष्ण्वादिमिथुनहेत्यलङ्कृतविग्रहम् ।
दक्षवामकराग्रेषु बीजापूरं गदां धनुः ॥
पक्षिपं त्रिशिखं चक्रं कमलं पाशमुत्पलम् ।
कलमाग्रस्वरदनं पुष्करे कलशं शुभम् ॥
दधानं . . . . . . सर्वदा ।

No. **7812.** गायत्रकिल्पः.

GĀYATRĪKALPAḤ.

Pages, 49. Lines, 23 on a page.

Begins on fol. 108*b* of the MS. described under No. 446.

Complete.

Deals with the manner of performing the daily morning and evening prayers by the repetition of the Gāyatrī after purifying one's self with the aid of the Mantra.

Beginning:

अथ ब्रह्मगायत्र्यास्स्नानविधानमुच्यते—

आदौ द्विराचम्य—

आसने सम्यगासीनो वामेनापूर्य चोदरम् ।
कुम्भकेन त्रिरावृत्त्या दक्षिणेन विरेचयेत् ॥
सव्याहृतीं सप्रणवां गायत्रीं शिरसा सह ।

* * * *

उपविश्याचम्य जलं गृहीत्वा वस्त्रादिकं संप्रोक्ष्य परिधायाचामेत् ॥
इति श्रीब्रह्मगायत्र्याः स्नानविधिस्समाप्तः ॥
अथ ब्रह्मगायत्र्याः सन्ध्याविधानमुच्यते—

End:

ध्येया सात्र सरस्वती भगवती पीताम्बराडम्बरा
श्यामा श्यामतनूलता परिलसद्ग्रैवेयभूषाज्ज्वला ।
तार्क्ष्यस्था मणिनूपुरापरिणहद्ग्रैवेयभूषोज्ज्वला
हस्तालम्बितशङ्खचक्रसगदाभीतीर्दधानाम्बिका ॥

मुक्ताविद्रुमेति ध्यात्वा इमं मे वरुणेत्यादिचतुस्सागरपर्यन्तं पठेत् ॥

Colophon:

इति श्रीविश्वामित्रकल्पे गायत्रीसन्ध्यावन्दनप्रकारस्समाप्तः ॥

Beginning:

गायत्रीयन्त्रं वक्ष्यामि मन्त्रतन्त्रानुपूर्वकम् ।
यन्त्रराजमिदं दिव्यं(धृत्वा) कृतार्थो भवति द्विजः ॥
मन्त्रसिद्धिप्रदं यच्च महापातकनाशनम् ।
क्षुद्रग्रहविनाशाय उरगादिनिवारणम् ॥

End:

कुङ्कुमं चन्द(न्द्र)कोष्ठश्च चन्दनागरुमेव च ।
कर्पूरं रोचनायुक्तं स्वर्णपट्टे न(वि)लेखयेत् ॥

Colophon:

इति शारदातिलके ब्रह्मप्रोक्ते गायत्रीयन्त्रस्समाप्तः ॥

No. 7819. गायत्रीयन्त्रोद्धारः.

GĀYATRĪYANTRÔDDHĀRAḤ.

Pages, 6. Lines, 7 on a page.

Begins on fol. 12*b* of the MS. described under No. 5639, wherein this is mentioned as Gāyatrīcakravidhāna.

Complete.

Similar to the above.

Beginning:

पराशरः—

वद मे सर्वधर्मज्ञ वसिष्ठ सुतपोधन ।
मोक्षधर्मार्थभे(सि)द्ध्यर्थं गायत्रीमन्त्रमुत्तमम् ॥

वसिष्ठ उवाच—

वक्ष्ये सम्यग्विधानेन यन्त्राणामुत्तमोत्तमम् ।
विप्राणां रक्षणार्थाय सृष्ट्यादौ तु महामुने ॥
पूर्वं यद्विष्णुना प्रोक्तं तद्यन्मन्त्राङ्गसंयुतम् ।
रहस्यं परमं गुह्यं वेदान्तेष्वपि चोदितम् ॥
अग्निमण्डलमालिख्य तन्मध्ये प्रणवं लिखेत् ।
मायाङ्गे बीजसंयुक्तं महामायां रमामिति ॥

End:

प्राणञ्च शक्तिबीजञ्च दृष्टिं वश्यादिकन्तथा ।
गायत्रीमन्त्रयन्त्रौ च प्राणस्थापनमेव च ॥
दिक्पालभूतबीजानि यन्त्रस्याङ्गानि वै दश ।
दशाङ्गेन विना यन्त्रं लिखित्वा(तं) निष्फलं भवेत् ॥

Colophon:

इति गायत्रीयन्त्रमन्त्रोद्धारविधिः ॥

No. **7820.** गायत्रीवर्णविन्यासकल्पः.

GĀYATRĪVARṆAVINYĀSAKALPAḤ.

Pages, 7. Lines, 5 on a page.

Begins on fol. 28*a* of the MS. described under No. 2539. Complete.

On the touching of the various parts of one's body repeating at the same time the appropriate words of the Gāyatrimantra.

Beginning:

ओं भूर्विन्यसेद्धृदये भुवश्शिरसि विन्यसेत् ।
शिखायां स्वःपदं न्यस्य गायत्र्याः प्रथमं पदम् ॥
विन्यसेत्कवचे धीमान् द्वितीयं नेत्रयोर्न्यसेत् ।
तृतीयमस्त्रे विन्यस्य चतुर्थं सर्वतो न्यसेत् ॥

End:

हृदि तत्सवितुर्न्यस्य न्यसेत्कण्ठे वरेणियम् ।
भर्गो देवस्य इत्येतत् शिखायां च ततो न्यसेत् ॥

No. **7821.** गारुडब्रह्मविद्यामन्त्रकल्पः.

GĀRUḌABRAHMAVIDYĀMANTRAKALPAḤ.

Pages, 2. Lines, 19 on a page.

Begins on fol. 4*a* of the MS. described under No. 2886. Complete.

Complete.

On the details connected with the repetition of the Madanagōpālamantra the repetition of which is believed to enable one to accomplish one's desires and also to obtain salvation.

Beginning:

मन्त्रविधिवत्कृतस्नानः पश्चिमद्वारमासाद्यासने उपविश्य द्वारदेवताभ्यो नमः इति रक्षां विधाय सुगन्धपुष्पमन्त्रेण हस्तौ सुरभीकृत्य नाराचमुद्रया पुष्पमुत्तरतो निक्षिपेत् । . . . .

* * * *

करद्वये मूलमन्त्रं विन्यस्य .

अस्य श्रीअष्टादशाक्षरगोपालमन्त्रस्य नारद ऋषिः, गायत्री छन्दः, श्रीकृष्णो देवता, क्लीं बीजं, स्वाहा शक्तिः, मम इष्टकाम्यार्थसिद्ध्यर्थे जपे विनियोगः ।

End:

शुद्धस्फटिकसङ्काशमथ वा पुरुषोत्तमम् ।
ध्यायेन्नित्यं जपेन्मन्त्रं मोक्षार्थी त्रिसहस्रकम् ॥
संसारसागरं तीर्त्वा याति विष्णोः परं पदम् ।
बहुना किमथोक्तेन धर्मकामार्थमोक्षदम् ॥

Colophon:

इति सनत्कुमारनारदसंवादे सनत्कुमारप्रोक्तो नाम मदनगोपालकल्पस्समाप्तः ॥

No. 7827. गोपालसन्ध्याविधिः.
GŌPĀLASANDHYĀVIDHIḤ.

Pages, 9. Lines, 5 on a page.

Begins on fol. 141*a* of the MS. described under No. 5417.

Complete.

On the mode of offering the morning and evening prayers using the Gāyatrīmantra addressed to Kṛṣṇa.

Beginning:

त्रैलोक्यचैतन्यमयादिदेव श्रीनाथ विष्णो भवदाज्ञयैव ।
प्रातस्समुत्थाय तव प्रियार्थं संसारयात्रामनुवर्तयिष्ये ॥

शौचाचमनदन्तधावनमुखप्रक्षालनानन्तरं नदीस्नानं कृत्वा धौतवस्त्रे परिधाय ।

End:

पुनरञ्जलिना जलमादाय आदित्यमण्डलगताय श्रीं ह्रीं क्लीं कृष्णाय गोविन्दाय विद्महे गोपीजनवल्लभाय धीमहि । तन्नः कृष्णः प्रचोदयात्— इति मन्त्रेणार्घ्यत्रयं दत्वा रुक्मिणीसत्यभामाभ्यां नमः—इति प्रदक्षिणीकृत्याचम्य ।

* * * * *

यथाशक्ति गोपालगायत्रीमष्टोत्तरशतं जपं कृत्वा पुनष्षडङ्गं कृत्वा भूशुद्धिं भूतशुद्धिं कृत्वा ॥

No. 7828. घटिकापारायणम्.

GHAṬIKĀPĀRĀYAṆAM.

Pages, 2. Lines, 10 on a page.

Begins on fol. 56*a* of the MS. described under No. 5647, wherein this has been omitted to be shown among the other works.

Complete.

This Pārāyaṇa involves the repetition of a Mantra consisting of all the letters of the Sanskrit alphabet. It is enjoined that sixty letters corresponding to the sixty Ghaṭikas of the day should be repeated each day, the letters of the alphabet being taken in the regular order.

Beginning:

अथ घटिकापारायणत्वेन षष्टिजपं कुर्यात् । स च पञ्चभिर्दिवसैर्मातृकायाष्षडावृत्तिरूपः । तथा च तन्त्रराजे—

आरभ्य भानोरुदयमेकशो घटिकाक्रमात् ।
एकैकमातृकावर्णान्पञ्चाशत्परिवृत्तितः ॥

End:

अत्राधुना वर्तमानसमये ज्यौतिषशास्त्र . . . . . नेन कलियुगस्य गतदिनानि ज्ञात्वा स्वक्रमारम्भादिनपर्यन्तं गणयित्वा पञ्चभिरावर्त्य उर्वरितदिनेनोदयाक्षरं ज्ञात्वा यस्मिन् दिने उदयाक्षरमकारो भवति, तस्मिन् दिने प्रारभ्य घटिकापारायणं कार्यमिति । अयं घटिकापारायण जपः प्रातरेव कार्यः ॥

No. **7829.** चण्डीयन्त्रः.

CAṆḌĪYANTRAḤ.

Pages, 2. Lines, 4 on a page.

Begins on fol. 144*a* of the MS. described under No. 6685.

Complete.

On the manner of drawing the Caṇḍīyantra

Beginning:

बिन्दुत्रिकोणवसुकोणदशारयुग्ममन्वश्रनागदशसंयुतषोडशारम् ।
वृत्तत्रयं च धरणीसदनत्रयं च श्रीचक्रमेवमखिलं परदेवतायाः ॥

इतीत्थं मूलमन्त्रे लिखित्वा त्रिकोणेषु पाशाङ्कुशधनुर्बीजं लिखित्वा वसुकोणेषु नकारादिहकारपर्यन्तं चतुः लिखित्वा ।

End:

पाशबीजं—आं, अङ्कुशबीजं—क्रों, ब्रां-धनुर्बीजं, द्रां द्रीं क्लीं ब्लूं-सश्शतबीजं, यां गां लां वारि पां ॥

No. **7830.** चतुःषष्टिभैरवाः.

CATUṢṢAṢṬIBHAIRAVĀḤ.

Pages, 4. Lines, 18 on a page.

Begins on fol. 118*a* of the MS. described under No. 5574.

Complete.

It is stated that if a person repeats the names (herein enumerated) of the 64 different manifestations of Bhairavīs and of the 64 of Bhairavas, he need not fear any harm from enemies, cruel animals, evil spirits, etc.

The Bhairava or the Bhairavī is to be conceived as assuming bodies of different colours according to the object for which the repeater of the Mantra invokes the help of the deity

Beginning:

श्वेतध्यानं भवेच्छान्तिः पीतं शुभकरी(रं)स्मृतम् ।
वश्यकार्येषु रक्ताभं क्षोभणार्थे तथाप्रभम् ॥
त्रिपदं रक्तवर्णाम्बे नीलं विद्वेषकारणम् ।
कृष्णश्च मारणं प्रोक्तं धूम्रमुच्चाटनं तथा ॥
दिव्ययोगी महायोगी सिद्धयोगी गणेश्वरी ।
प्रेताशी डाकिनी काली कालरात्री निशाचरी ॥

End:

अष्टाष्टगुणितश्चैव भैरवाणां प्रमाणतः ।
स्वर्गपातालमर्त्येषु विचरन्ति महाबलाः ॥

* * * * *

नित्यमेतैर्महामन्त्रैः भैरवान्नो(न्पू)जयेत् क्रमात् ।
त्रिः कुर्वन्ति सदा पूजामिच्छन्ति श्रियमद्भुताम् ॥

Colophon:

इति चतुःषष्टिभैरवाः ॥

No. 7831. चामुण्डीमन्त्रः.

CĀMUṆḌĪMANTRAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 31*b* of the MS. described under No. 2854.

Complete as found in the 73rd Adhyāya of the Ākāśabhairavakalpa.

On the details connected with the repetition of the Cāmuṇḍīmantra which is considered to have the power to enable one to destroy one's enemies.

Prescribes the preliminary rites, the manner of worship, etc., to be conducted in connection with the repetition of the Cidambaranaṭanamantra.

Beginning:

मन्त्रन्यासं प्रवक्ष्यामि मुने मन्त्रार्थसिद्धिदम् ।
आदितो दशभिर्वर्णैर्हृदयं परिकीर्तितम् ॥
ततोऽष्टाभिश्शिरः प्रोक्तं पुरस्तान्नवभिश्शिखा ।
कवचं नवभिः पश्चात् नेत्रं च नवभिः स्मृतम् ॥

End:

ओं हं शिवाय शिवदर्शनं योगदीक्षादर्शनम् । औं शिवाय ओं—अयं प्रसादचूडामणिः ज्ञानदीक्षादर्शनम् । ओं हं शिवाय नमः—इदं प्रासादहृदयं सर्वज्ञानदर्शनम् । औं इदं प्रासादं श्शिवदर्शनं सालोक्यसामीप्यसारूप्यसायुज्यदर्शनम् । चिदम्बरमहाचक्रप्रस्तारक्रम उच्यते ।

No. 7834. चिदम्बररहस्यम्.
CIDAMBARARAHASYAM.

Substance, palm-leaf. Size, $13\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 13. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Śivapūjāvidhi 8*a*.

Contains only a portion of the work; deals with the rites to be performed in connection with the Āśugaṇapatimantra. The colophon at the end of the work attributes the authorship to Śaṅkara.

Beginning:

अथातस्संप्रवक्ष्यामि मन्त्रं सर्वार्थसाधकम् ।
सप्तकोटिमहामन्त्रश्रेष्ठं सारमिदं परम् ॥
सर्वसौभाग्यदं मन्त्रं सर्वाभीष्टफलप्रदम् ।

* * * *

षट्पत्रषट्कोणदलाग्रशूलं तदग्रसाध्यं बहितारशक्ती ।
समन्त्रसाध्यं दलकोणलेख्यं ससाध्यमध्यं पवन प्रतीयाः ।

Colophon:

इति चिदम्बररहस्ये सभाचक्रे उमामहेश्वरसंवादे आशुगणपतिकल्पं नाम चत्वारिंशोऽध्यायः ॥

शिखिपुरवाह्यां रकारं(रेफं) द्वादशकोणं समालिखेत् भूमिम् ।
संपुटिताया मध्ये यान्तं संलिख्य . . . . . . ॥

End:

इदं कल्पं कलौ नृणां संजपादेव सिध्यति ।
शङ्करानुग्रहादेव कृतं सर्वमयत्नतः ॥
इदं कल्पं सकृज्जप्त्वा मुच्यते सर्वकिल्बिषैः ।
सर्वसिद्धिं समाश्रित्य शिवलोके महीयते ॥

Colophon:

इति चिदम्बररहस्ये सभाचक्रे उमामहेश्वरसंवादे शङ्करेण विरचिते आशुगणपतिकल्पं नाम चत्वारिंशोऽध्यायः ॥

No. 7835. चैतन्यभैरव्युद्धारमन्त्रः.

CAITANYABHAIRAVYUDDHĀRAMANTRAḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 76*b* of the MS. described under No. 3472, wherein this work has been omitted to be shown among the other works.

Incomplete.

Describes the arrangement of the syllables in the Caitanyabhairavīmantra and also the manner of drawing the Yantra relating thereto.

Colophon:

इति कूर्मचक्रविधिः ॥

End:

केन्द्रत्रिकोणस्थाने तु तिष्यक्षभय . . षु च ।
पापेषु त्र्यायषष्ठेषु गतेष्वावियोगतः ॥

No. 7838. जातवेदसमन्त्रशेषः.

JĀTAVĒDASAMANTRAŚĒṢAḤ.

Page, 1. Lines, 9 on a page.

Begins on fol. 14a of the MS. described under No. 2854.

Describes the method of writing the Mantra in the Yantra relating thereto; also mentions the purposes for which the Mantra may be used.

Beginning:

जातवेदसमन्त्रशेषः—

आदौ मन्त्रं ततो नाम पुनर्मन्त्रं ततो लिखेत् ।
एवमेवं त्रिधा कृत्वा भवेद्युक्तिविदर्भितम् ॥
सर्वव्याधिहरं प्रोक्तं भूतापस्मारदर्शनम् ।

प्रथमतः मन्त्रं(न्त्रः) तदनन्तरं साध्यं पश्चान्मन्त्रं(न्त्रः) इति क्रमेण त्रिरावृत्तिश्चेत् आवृत्तिरेकं(का)भवेत् ।

End:

मध्ये साध्यमन्त्रे मन्त्रम् एवमुच्चरेद्यदि एकावृत्तिर्भवेत् । अग्निष्टोमफलमैश्वर्यञ्च लभते ॥

No. 7839. जातवेदोदुर्गादेवीमन्त्रकल्पः.

JĀTAVĒDŌDURGĀDĒVĪMANTRAKALPAḤ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 16a of the MS. described under No. 2854, wherein this has been omitted to be mentioned among the other works.

Complete.

Describes the method of "writing the Durgāmantra with the Vēdic Ṛk., commencing with Jātavēdasē." in the mystic diagram relating thereto.

Beginning :

विद्युद्दामसमप्रभां मृगपतेः स्कन्धस्थितां भीषणां
कन्याभिः करवालखेटविलसद्धस्ताभिरासेविताम् ।
हस्तैश्चक्रध(व)रासिचापविशिखान् पाशाङ्कुशान्तर्जनीं
बिभ्राणामनलात्मकां शशिनिभां दुर्गां त्रिणेत्रां भजे ॥

End :

दुर्गामन्त्रम् ततो लिख्य मातृकार्णेन वेष्टयेत् ।

देव्यियन्त्रम् जातवेदसे दुर्गामन्त्रम् । मध्ये साध्यं, षट्कोणे दुर्गादेव्यै नमः, वृत्ते जातवेदसे इति मन्त्रं, तदुपरि अकारादिक्षकारान्तं, अष्टारे भैरवाष्टकं, अष्टदिक्षु दिक्पालकबीजाक्षरं, दुं सह इति बीजाक्षरं मूलम् ॥

No. **7840.** ज्योतिष्मतीकल्पः.

JYŌTIṢMATĪKALPAḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 96*a* of the MS. described under No. 5417

Complete.

Describes the method of propitiating the deity presiding over the plant Jōtiṣmatī.

Beginning :

अथ ज्योतिष्मतीकल्पं वक्ष्यामि शृणु पार्वति ।
विवृज्ज्यो (दिव्या ज्यो)ति (ष्मती)वल्ली तप्तकाञ्चनसन्निभा ॥
बहुप्रताना स्पर्शा(स्वर्णाभा)फलबीजा शुचिप्रदा ॥
आषाढशुक्लपक्षे च शुभर्क्षे शुभवासरे ।
कुङ्कुमाक्तेन सूक्ष्मे (त्रे)ण तां वल्लीं परिवेष्टयेत् ॥

End :

कोचिद्रागाकुला देवि तीर्थान्तैरे (इत्थं भैर) व विप्रि(प्रि)ताः।
यत्र ज्योतिष्मती वल्ली तद्भूमिः पुण्यभूमिका ॥

तत्रैव पुण्यतीर्थानि सिद्ध एव(यो वि) विधा अपि ।
ज्योतिष्मतीफलभवं सेव्यं दिव्यरसायनम् ॥

Colophon:

इति ज्योतिष्मतीकल्पं सम्पूर्णम् ॥

No. 7841. ज्योतिष्मतीकल्पः.

JYŌTIṢMATĪKALPAḤ.

Pages, 3. Lines, 13 on a page.

Begins on fol. 142*a* of the MS. described under No. 4338

Complete.

Same as the above.

See under the previous number for the beginning.

End:

केचिद्रागाकुला देवि इत्थं भैरवविम्निताः ।
ज्योतिष्मतीफलभवं सेव्यं दिव्यरसायनम् ॥

Colophon:

इति ज्योतिष्मतीकल्पं सम्पूर्णम् ॥

No. 7842. ज्योतिष्मतीकल्पः.

JYŌTIṢMATĪKALPAḤ.

Pages, 4. Lines, 8 on a page.

Begins on fol. 75*a* of the MS. described under No. 3680.

Complete.

Same as the above.

No. 7843. ज्वरयन्त्रम्.

JVARAYANTRAM.

Page, 1. Lines, 19 on a page.

Begins on fol. 6*a* of the MS. described under No. 2886.

Complete.

This gives directions for drawing the magical diagram the wearing of which is supposed to have the power of curing fever.

Beginning:

द्विचत्वारिंशके कोष्ठे रेखाग्रे बाह्यसाध्यके ।
क्रमाल्लिखितमन्त्रार्णान् मायां शिष्टेति योजिता ॥

End:

ज्वैम् ओन्नमो भगवते ज्वरदेवाय सशरशार्ङ्गामृतकुम्भहस्ताय सर्व-ज्वरप्रशमनाय सर्वदुष्टान्तकाय हुं फट् ॥

No. **7844.** तत्त्वपारायणम्.

TATTVAPĀRĀYAṆAM.

Pages, 2. Lines, 10 on a page.

Begins on fol. 56*b* of the MS. described under No. 5647 and forms part of the work shown as Mantrapārāyaṇa among the other works given therein.

Complete.

Deals with one of the seven forms in which Dēvī should be meditated upon. It is stated that Devi should be contemplated as consisting of 36 Tāṭtvas or primal principles.

Beginning:

अथ तत्त्वपारायणम्—
षट्त्रिंशत्तत्त्वात्मकत्वेन मूलविद्यां जपेत् । तद्यथा—

मध्याह्ने हृदयाम्भोजकर्णिके सूर्यमण्डले ।
कामराजात्मिकां देवीं . . . . . णम् ॥
प्रसूनबाणपुण्ड्रेक्षुचापपाशाङ्कुशान्विताम् ।
परितश्चात्ममुख्याभिष्षट्त्रिंशत्तत्त्वशक्तिभिः ॥

इति देवीं ध्यात्वा सू दिनानित्या हं स अं शिवतत्त्वरूपिणी श्री-महात्रिपुरसुन्दरी . . . मि ।

End:

कामराजकूटमष्टोत्तरशतवारं जपित्वा प्राणायामादिपूर्वकं समर्प्य स्तुत्वा प्रणम्य मूलदेवीं कामेश्वरीं च प्राग्वद्धृदये विसृजेत् ॥

Colophon:

इति मध्याह्नसन्ध्याकाले तत्त्वपारायणजपः समाप्तः ॥

No. 7845. तन्त्रसारः.

TANTRASĀRAḤ.

Substance, paper. Size, 9½ × 7½ inches. Pages, 746. Lines, 16 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

A work by Kṛṣṇānandabhaṭṭācārya treating of the details to be observed in repeating a certain collection of Mantras.

Beginning :

नत्वा कृष्णपदद्वन्द्वं ब्रह्मादिसुरवन्दितम् ।
गुरुं च ज्ञानदातारं कृष्णानन्देन धीमता ॥
तत्तद्ग्रन्थगतान्वाक्यान्नानार्थान् प्रतिपाद्य च ।
सौकर्यार्थं च संज्ञेय(क्षेपात्) तन्त्रसारं(रः) प्रतन्यते ॥
उच्यते प्रथमं तत्र लक्षणं गुरुशिष्ययोः ।
शान्तो दान्तः कुलीनश्च विनीतश्शुद्ध*वेश्मवान् ॥
शुद्धाचारस्सुप्रतिष्ठश्शुचिर्दक्षस्सुबुद्धिमान् ।
आश्रमी ज्ञाननिष्ठश्च मन्त्रतन्त्रविशारदः ॥
निग्रहानुग्रहे शक्तो गुरुरित्यभिधीयते ।

इति गुरुलक्षणम् ।

End :

मध्येवर्त्म समीरणद्वयमिथस्संघट्टसंक्षोभितं
शब्दं (ब्द)स्तोममतीव(त्य)तेज(चेत)सि तटित्कोटिप्रभामम्ब(भास्व)रे ।
उग्रां तां समुपास्महे नवजपासिन्दूरसन्ध्यारुणं
सान्द्रानन्दसुधामयीं परशिवं प्राप्तं परां देवताम् ॥

* * * *

वेदा(गमा)र्थ[मर्थे] विपरीत(वि)लोकनेन
शयोभवद्यवनलोप(प्रायोऽघवज्जडजनौघ)मवेक्ष्य मातः ।

---

* विन्मना इति पाठान्तरम्.

त्वन्मुक्त(द्रुम)बीजविशदीकरणेन जातां(तान्)
दोषान् क्षमस्व तव पादयुगेषु याचे ॥

Colophon:

श्रीकृष्णानन्दवागीशभट्टाचार्यस्य सङ्ग्रहम् ।
दृष्ट्वानधीतशास्त्राणि धीराध्यापय साम्प्रतम् ॥
इति श्रीमहामहोपाध्यायभट्टाचार्यकृतस्तन्त्रसारः ॥

No. **7846.** तन्त्रसारः.

TANTRASĀRAḤ.

Substance, paper. Size, 12¼ × 8¼ inches. Pages, 605. Lines, 19 on a page. Character, Telugu. Condition, good. Appearance, new.

To the end of Śyāmāprakaraṇa

This is the first volume of the work.

Same as the above.

No. **7847.** तन्त्रसारः.

TANTRASĀRAḤ.

Substance, paper. Size, 12½ × 8½ inches Pages, 496. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

From Tārāprakaraṇa to the end. This is the second volume.

Same work as the above.

The following are the subjects dealt with in this work:—

First Paricchêda.

गुरुलक्षणम्.
शिष्यलक्षणम्.
पित्रादितो दीक्षानिषेधः.
तत्करणे प्रायश्चित्तम्.
महातीर्थादौ पित्रादितो दीक्षानिषेधाभावः.

दीक्षाया आवश्यकत्वम्.
निजविद्याकथनम्.
कुलाकुलचक्रम्.
राशिचक्रम्.
नक्षत्रचक्रम्.
अकथहचक्रम्.
अकडमचक्रम्.
ऋणिधनिचक्रम्.
दीक्षाकालः.
तिथिवारनियमः.
नक्षत्रनियमः.
करणयोगादिनिर्णयः.
पक्षनिर्णयः.
रविसङ्क्रमणादौ कालदोषाभावः.
मालानिर्णयः.
अष्टोत्तरशतजपविषयः.
अष्टवारजपनियमः.
मालायां मणिनियमः.
आसनभेदाः.
मालासंस्कारः.
पुरश्चरणम्.
पुरश्चरणे भक्ष्याभक्ष्यनियमः.
जपकाले वर्ज्यानि.
जपफलमूलजपादिलक्षणं.
सूतकद्वयम्, अक्षोपायः.
भूतलिपिः.
होमाशक्तौ जपनियमः.
स्त्रीशूद्रयोर्ब्राह्मणद्वारा होमग्रहण-
पुरश्चरणम्.
पुरश्चरणप्रयोगः.
ग्रहणपुरश्चरणसङ्कल्पः.
कूर्मचक्रम्.
मन्त्राणां दशसंस्काराः, मातृका-
यन्त्रम्.
कलावतीदीक्षाप्रयोगः.
पञ्चगव्यपरिमाणम्.
अर्घ्ये एकपात्रनिषेधः.
नमःपदादिपाद्यादिदानम्.
षडङ्गधूपाः.
एकैकोपचारानन्तरं जलदानम्.
त्र्यम्बकमन्त्रः.
धूपगन्धादिदाने मुद्राविशेषाः.
पञ्चायतनीदीक्षा.
सङ्क्षेपदीक्षा.
उपदेशानन्तरं सर्वतोभद्रमण्ड-
लम्.
स्वल्पसर्वतोभद्रम्.
त्रिलौहीमुद्रा.

Second Paricchéda.

सामान्यपूजापद्धतिः.
सन्ध्याप्रयोगः.
स्नानविधिः.
गायत्र्यः.
भूतशुद्धिः.
मातृका ऋष्यादिन्यासः.
प्राणायामः.
पीठन्यासः.
पूर्वादिदिङ्नियमः.
अविशेषे यन्त्रनियमः.
षोडशोपचारः.
अष्टाङ्गादिप्रणामाः.
भुवनेश्वरीमन्त्रः.
अन्नपूर्णामन्त्रः.
त्रिपुटीमन्त्रः.
त्वरितामन्त्रः.
नित्यामन्त्रः.
वज्रप्रस्तारिणीमन्त्रः.
दुर्गामन्त्रः.
महिषमर्दिनीमन्त्रः.
जयदुर्गामन्त्रः.
शूलिनीमन्त्रः.
वागीश्वरीमन्त्रः.
पारिजातसरस्वतीमन्त्रः.
गणेशमन्त्रः.
हेरम्बमन्त्रः.
हरिद्रागणेशमन्त्रः
लक्ष्मीमन्त्रः
सूर्यमन्त्रः.
अजपामन्त्रः.
विष्णुमन्त्रः.
राममन्त्रः.
श्रीकृष्णमन्त्रः.
अष्टादशाक्षरादिमन्त्रः.
बालगोपालमन्त्रः.
वासुदेवमन्त्रः.
दधिवामनमन्त्रः.
हयग्रीवमन्त्रः.
नृसिंहमन्त्रः.
हरिहरमन्त्रः.
वराहमन्त्रः.
शिवमन्त्रः.
क्षेत्रपालमन्त्रः.
आपदुद्धारवटुकभैरवमन्त्रः.
मृत्युञ्जयमन्त्रः.
अर्धनारीश्वरमन्त्रः.
भैरवीमन्त्रः.
कौलेशभैरवीमन्त्रः.
सकलसिद्धिदाभैरवीमन्त्रः.
भयविध्वंसिनीभैरवीमन्त्रः.

V. R. Sreenivasa Rangachar

चैतन्यभैरवी.
कामेश्वरीभैरवी.
षट्कूटाभैरवी.
नित्याभोगमोक्षदाभैरवी.
रुद्रभैरवी.
भुवनेश्वरीभैरवी.
त्रिपुरबालामन्त्रः.
नवकूटाबाला.
अन्नपूर्णेश्वरीभैरवी.
श्रीविद्या.
पारिभाषिकषोडशी.
महाषोडशी.
ब्रह्मविद्या.
पञ्चमी.
श्रीविद्याप्राणमन्त्रः.
दीपिनी.
श्रीयन्त्रम्.
श्रीचक्रनाशप्रायश्चित्तम्.
श्रीचक्रपादोदकमाहात्म्यम्.
संक्षेपश्रीविद्यापूजापद्धतिः.
श्रीविद्यायां विशेषस्नानम्.
श्रीविद्यायां विशेषपूजापद्धतिः.
प्रचण्डचण्डिकामन्त्रः.
छिन्नमस्तामन्त्रः.
कालिकामन्त्रः.
श्यामामन्त्रः.
मन्त्रभेदाः.
गुह्यकालीमन्त्रः.
ताराप्रकरणम्.
तारायन्त्रम्.
ताराषोढा.
रहस्यपुरश्चरणम्.
वीरसाधनम्.
शवसाधनम्.
जपहोमः.
सङ्ख्यानुक्तौ सङ्ख्यानियमः.
चण्डोग्रशूलपाणिमन्त्रः.
मातङ्गीमन्त्रः.
उच्छिष्टचाण्डालिनीमन्त्रः.
धूमावतीमन्त्रः.
भद्रकालीमन्त्रः.
उच्छिष्टगणेशमन्त्रः.
धनदामन्त्रः.
धनदायन्त्रः.
श्मशानकालीमन्त्रयन्त्रौ.
बगलामुखीमन्त्रयन्त्रौ.
कर्णपिशाचिनीमन्त्रसिद्धिलक्षणानि.
मञ्जुघोषमन्त्रः.
तारिणीकल्पः.

परिभाषा.	बालकसंस्कारः
विष्णवाराधनमन्त्राः.	भागादिबलिः.
वैष्णवद्वादशविधशुद्धिः.	कुलाचारनिरूपणम्.
मन्त्रदेवतानिरूपणम्.	शिवाबलिः.
योगाङ्गासनमुद्रालक्षणम्.	प्रातःकृत्यम्.
धारणयन्त्राणि.	दूतीयोगः.
धारणयन्त्रलेखनद्रव्याणि.	यजनप्रकारः.
प्रयोगानन्तराभिषेकः.	मांसादिशोधनम्.
नैमित्तिकविधिः.	शक्तिशोधनम्.
सङ्क्षेपसर्वपूजाविधिः.	श्रीविद्यायां विशेषकथनम्.
प्रयोगविधिः.	वीरपुरश्चरणम्
निग्रहाद्युपायः.	आन्तरपूजा.
वेतालादिसिद्धिः.	योगप्रक्रिया.

No. 7848. तन्त्रसारः.
TANTRASĀRAḤ.

Pages, 61. Lines, 14 on a page.

Begins on fol. 158*a* of the MS. described under No. 5586, wherein this is shown as Bhairavatantra in the list of other works.

Kālīprakaraṇa only.

No. 7849. तन्त्रसारः.
TANTRASĀRAḤ.

Pages, 40. Lines, 14 on a page.

Begins on fol. 157*a* of the MS. described under No. 5568, wherein this is shown as Bhairavatantra among the other works.

Deals with the several kinds of Mantras addressed to the goddess Kālī. A person who has knowledge of these Mantras is considered to become free from the bondage of Saṁsāra even before death.

Same as the above.

V. K. Srinivasa Rangachari

Beginning :

अथ वक्ष्ये महाविद्याः कालिकायास्सुदुर्लभाः ।
यासां विज्ञानमात्रेण जीवन्मुक्तो भवेन्नरः ॥
नात्र चित्तविशुद्धिस्स्यान्नारीमित्रादिदूषणम् ।
न वा प्रयासबाहुळ्यं समयासभयादिकम् ॥
न वित्तव्ययबाहुळ्यं कायक्लेशकरं न च ।
य एनां चिन्तयेन्मन्त्री सर्वकामसमृद्धिदाम् ॥
तस्य हस्ते सदैवास्ति सर्वसिद्धिर्न संशयः ।

End :

तिथिवारे च नक्षत्रे आकुळे स्थायिनो जयः ।
कुळाख्ये जयिनो नित्यं समं चैव कुळाकुळे ॥
एवं कुळाचारादिकं ज्ञात्वा साधकः कर्म कुर्यात् ॥

Colophon :

इति श्रीतन्त्रसारे कुळाचारविधिः ॥
इति श्रीतन्त्रसारे काळीप्रकरणं सम्पूर्णम् ॥

No. **7850.** तृचकल्पः.

TṚCAKALPAḤ.

Pages, 16. Lines, 23 on a page.

Begins on fol. 158*a* of the MS. described under No. 446.

Complete.

Deals with the details connected with the worship of the sun by repeating the three Ṛks. 11 to 13 of the 50th Sūkta in the First Maṇḍala of the Ṛgvēda. The offering of oblations of water while repeating these is considered to have the power to enable one to accomplish one's desires.

Beginning :

एवंगुणविशेषणविशिष्टायां शुभतिथौ यजमानस्य समस्तपापक्षयद्वारा सर्वकाम्यार्थफलसिद्ध्यर्थं . . . .

End :

बलिर्विभीषणो भीष्मः कपिलो नारदोऽर्जुनः ।
प्रह्लादश्चाम्बरीषश्च वसुर्वायुसुतश्शिवः ॥
विष्वक्सेनोऽथ वाक्रूरस्सनकाद्याश्शुकादयः ।
महाविष्णुप्रसादोऽयं सर्वे गृह्णन्तु वैष्णवाः ॥
हृद्रोगं देवरोगं च द्विषन्तं नाशयेत्सकृत् ।
रोगाद्वा वन्ध्यनिर्मुक्तः पुत्रपौत्रप्रदोऽर्थिनाम् ॥

Colophon :

इति तृचकल्पः सम्पूर्णः ॥

No. **7853.** तृचकल्पः.

TṚCAKALPAḤ.

Substance, palm-leaf. Size, 11⅜ × 1¼ inches. Pages, 20. Lines, 5 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Incomplete.

Similar to the above.

Gives the purposes for which the Mantra should be repeated and also the details connected with the repetition thereof.

Beginning :

अर्जुनस्य हितार्थाय कृष्णो वचनमब्रवीत् ।
उद्यन्नद्येति मन्त्रोऽयं सौरः पापप्रणाशनः ॥
रोगघ्नश्च विषघ्नश्च भुक्तिमुक्तिफलप्रदः ।
कर्णे(ण्वे)न तु पुरा दृष्टो गुह्यः परमसिद्धिदः ॥

End :

यन्त्रदेवताप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः, अनुष्टुप् छन्दः, ऋग्यजुस्सामाथर्वाणो देवता, यन्त्रदेवताप्राणप्रतिष्ठासिद्ध्यर्थे जपे विनियोगः । अमुष्य प्राण इह प्राणः सर्वयन्त्रजीवाय सर्वमन्त्रजीवाय ओं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः तिष्ठति साम इत्यष्टोत्तरशतं जपित्वा ॥

No. 7854. तृचकल्पः.

TṚCAKALPAḤ.

Pages, 13. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 7156, wherein this is mentioned as Sūryōpāsanavidhi among the other works.

Incomplete.

Similar to the above.

Beginning:

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ श्रीसूर्यनारायणमुद्दिश्य सूर्यनारायणप्रीत्यर्थम् आदित्यपुराणोक्ततृचकल्पविधानेन हरिहरब्रह्मात्मकस्य मित्रादिद्वादशनामात्मकस्वरूपेण द्वादशावरणसहितस्य त्रयीमूर्तेर्भगवतः सूर्यदेवस्य प्रीतिं कामयमानः . . . . षोडशोपचारपूजाप्रसन्नार्घ्यसौरमन्त्रैर्द्वादश महानमस्कारांश्च करिष्ये । अस्य श्रीतृचमन्त्रस्य कण्वपुत्रप्रस्कण्वः ऋषिः, अनुष्टुप् छन्दः ।

End:

पादार्धचर्क्रचेनैव तृचा होमं समाचरेत् ।
जयाद्यृगाहुतीर्हुत्वा पूर्णाहुतिमथाचरेत् ॥
कौशेयेनाखण्डितेन होमद्रव्याणि वेष्ट्य च ।
पूर्णाहुतिं चरेद्धीमानुत्तरं परिषेचनम् ॥
यावन्नमस्कारदिने नीलकण्ठं ग्रहाधिपम् ।
* * * *
स्वयं भुञ्जीत वै स्तोत्रं कुर्यादाद्याभिरादरात् ॥

No. 7855. तृचकल्पः.

TṚCAKALPAḤ.

Substance, palm-leaf. Size, $14 \times 1\frac{1}{8}$ inches. Pages, 38. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 32*a*. The other works herein are Raghuvaṁśa

1*a*, Prātassmaraṇīyaślōkāḥ 52*a*, Kṛṣṇaviṣayagāna 53*a*, Dhūmapānadaṇḍaka 54*a*, Telugu Padyamulu 56*a*, Samāsacakra 71*a*.

Incomplete.

Similar to the above.

Beginning:

नारदं(द उवा)च—

(भक्त्या कृष्णं) नमस्कृत्य अर्जुनः परिपृच्छति ।
तृचमन्त्रस्य माहात्म्यं श्रोतुमिच्छाम्यहं प्रभो ॥
अर्जुनस्य हितार्थाय कृष्णो वचनमब्रवीत् ।

श्रीकृष्ण उवाच —

उद्यन्नद्येति मन्त्रोऽयं सौरः पापप्रणाशनः ॥
रोगघ्नश्च द्विषद्घ्नश्च भुक्तिमुक्तिफलप्रदः ।

End:

हरिमाणं निदध्मसि—मरीचिं तर्पयामि । उदगादयमादित्यः—आदित्यं तर्पयामि । विश्वेन सहसा सह—सवितारं तर्पयामि । द्विषन्तं मह्यं(म)रन्

No. **7856.** तृचकल्पः.

TṚCAKALPAḤ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 42*a* of the MS. described under No. 7156, wherein this is mentioned as Sūryanamaskāra among the other works.

Complete.

Contains the details connected with the repetition of the Mantra.

Beginning:

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ श्रीसूर्यनारायणमुद्दिश्य सूर्यनारायणप्रीत्यर्थं तिलतण्डुलयवदूर्वाङ्कुरकुसुमरक्तचन्दनकांस्यपात्रेण अर्घ्य-

प्रदानानि करिष्ये । ओं ह्रां उद्यन्नद्य मित्रमहः—मित्राय नमः अङ्गुष्ठाभ्यां नमः ओं ह्रीं आरोहन्नुत्तरां दिवम्—रवये नमः तर्जनीभ्यां नमः । ओं ह्रूं हृद्रोगं मम सूर्य ।

End:

ओं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः उद्यन्नद्य . . द्विषतो रधम् । मित्ररविसूर्यभानुखगपूषहिरण्यगर्भमरीच्यादित्यसावित्रर्कभास्करेभ्यो नमः इदमर्घ्यं समर्पयामि । अनेन प्रकारेण द्वादश नमस्कारान् कुर्यात् । छायासमेतश्रीसूर्यनारायणाय नमः इदमर्घ्यं समर्पयामि ॥

No. 7857. तृचकल्पः.

TṚCAKALPAḤ

Pages, 6. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 5937, wherein this is mentioned among the other works as Sūryanamaskāravidhi.

Complete.

Similar to the above.

Beginning:

वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् । . .

शुभार्थे च शुभे शोभनमुहूर्ते अत्र पृथिव्यां जम्बूद्वीपे . . शुभतिथौ मम समस्तपापक्षयद्वारा सर्वकाम्यार्थसिद्ध्यर्थं सर्वरोगानिवृत्त्यर्थं छायासमेतश्रीसूर्यनारायणमुद्दिश्य . . . . ताम्रपात्रेणार्घ्यप्रदानानि करिष्ये तदङ्गकलशाराधनानि करिष्ये । कलशस्य मुखे विष्णुः . . . क्षयकारकाः । अस्य श्रीतृचमहामन्त्रस्य कण्वपुत्रः प्रस्कण्व ऋषिः, अनुष्टुप् छन्दः, मित्ररविसूर्यभानुखगपूषहिरण्यगर्भमरीच्यादित्यसावित्रर्कभास्करा देवता । . . . .

ओं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः उद्यन्नद्य मित्रमहः। आरोहन्नुत्तरान्दिवम्। हृद्रोगं मम सूर्य। हरिमाणं च नाशय। शुकेषु मे हरिमाणम्। रोपणाकासु दध्मसि। अथो हारिद्रवेषु मे। हरिमाणं निदध्मासि। उदगादयमादित्यः। विश्वेन सहसा सह। द्विषन्तं मम रन्धयन्। मो अहं द्विषतो रधम्।

End:

> अर्घ्याणि द्वादशावृत्त्या लघुरेवं निगच्छति।
> लघुना द्वादशावृत्त्या महार्घ्यं सन्निगच्छति॥
> महार्घ्यं द्वादशावृत्त्या क्षयरोगात्प्रमुच्यते।
> उत्तमं द्वादशार्घ्यं तु मध्यमं षट् प्रशस्यते॥
> चत्वार्यर्घ्यत्र(ाणि)दातव्यअ(न्य)भावे तु दिने दिने।

No. 7858. तृचकल्पः.

TṚCAKALPAḤ.

Pages, 44. Lines, 6 on a page.

Begins on fol. 42*b* of the MS. described under No. 5937, wherein this is mentioned among the other works as Sūryārghyavidhi.

Incomplete.

Similar to the above.

Beginning:

एवङ्गुणविशेषणाविशिष्टायां शुभातिथौ श्रीमान् गोत्रः नामधेयः धर्मपत्नीसमेतोऽहं श्रीमतः गोत्रस्य नामधेयस्य धर्मपत्नीसमेतस्य मम. . . -द्वारा आदित्यपुराणोक्तफलसिद्ध्यर्थं श्रीसूर्यनारायणमुद्दिश्य . . . रक्तचन्दनमिश्रिततिलतण्डुलयवदूर्वाकुसुमजलपूरितताम्रपात्रेण अर्घ्यप्रदानानि करिष्ये।

अस्य श्रीतृचमन्त्रस्य कण्वपुत्र ऋषिः प्रस्कण्वः, अनुष्टुप् छन्दः, मित्ररविसूर्यभानुखगपूषहिरण्यगर्भमरीच्यादित्यसवित्रर्कभास्करा देवता।

End:

अर्कभास्कराभ्यां नमः इद. मि। ओं ह्रां ह्रीं उद्यन्नद्य मित्र-
महः। आरो. दिवम्। हृद्रोगं. सूर्य। हरि. नाशय। मित्ररविसूर्यभानुभ्यो
नमः इद. मि। ह्रौं ह्रः शुकेषु.. णम्। रोप. ध्मसि। अदो(थो)..ने।
हरि.. ध्मसि खगपूषहिरण्यगर्भमरीचिभ्यो नमः। इद. मि।

No. **7859.** तृचकल्पः.
TṚCAKALPAḤ.

Substance, palm-leaf. Size, 14 × 1½ inches. Pages, 13. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Taittīrīyōpaniṣadbhāṣya 8*a*.

Incomplete.

Beginning same as in the above.

End:

एहि सूर्य सहस्रांशो तेजोराशिजगत्पते।
अनुकम्पय मां भक्त्या गृहाणार्घ्यं नमोऽस्तु ते॥
श्रीसूर्यनारायणाय नमः—प्रसन्नार्घ्यं समर्पयामि।
पूर्वोक्तैवङ्गुण . . . शुभतिथौ यजमानस्य सकलरोगनिवृत्तिद्वारा
क्षिप्रमेवारोग्यसिद्ध्यर्थं पादार्घ्यर्चतृचमन्त्रप्रकारेण अर्घ्यप्रदानानि करिष्ये.

No. **7860.** तृचकल्पः.
TṚCAKALPAḤ.

Pages, 5. Lines, 21 on a page.

Begins on fol. 3*a* of the MS. described under No. 2373, wherein this is mentioned as Tṛca-arghyapradāna among the other works.

Complete.

Similar to the above.

Beginning:

तृचार्घ्यप्रदानम्—

एवंगुणविशेषणविशिष्टायां तिथौ सूर्यनारायणप्रसादसिद्ध्यर्थं नित्यार्घ्यप्रदानं करिष्ये ।

ओं भूर्भुवस्सुवः ओं ह्रां उद्यन्नद्य मित्रमहः मित्राय नमः इदमर्घ्यम् । ओं भूर्भुवस्सुवः ओं ह्रीं आरोहन्नुत्तरान्दिवं रवये नमः इदमर्घ्यम् ।

End:

ओं भूर्भुवस्सुवः ओं ह्रूं हृद्रोगं मम सूर्य सूर्याय नमः इदमर्घ्यम् ।

मित्ररविसूर्यभानुखगपूषहिरण्यगर्भमरीचिसवित्रादित्यार्कभास्करेभ्यो नमः इदमर्घ्यम् । पादार्धर्चर्चैस्तृचेन त्रिरावृत्तिं कुर्यात् । उद्यन्नद्य मित्रमहः द्विषतो रधम् । इत्यष्टोत्तरशतजपं कुर्यात् ॥

No. 7861. तृचकल्पः.

TṚCAKALPAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 3*a* of the MS. described under No. 365, wherein this is shown as Tṛcārghyapradāna in the list of other works.

Complete.

Same as the above.

No. 7862. त्रिपुरामन्त्रकल्पः.

TRIPURĀMANTRAKALPAḤ.

Pages, 4. Lines, 8 on a page.

Begins on fol. 125*b* of the MS. described under No. 5683, wherein this is shown as Tribhuvanamōhinītripurāmantra.

Incomplete.

Describes the Tripurāmantra and its various subdivisions.

Beginning:

अथ भगवदिच्छाशक्तिरूपत्रिपुरा[रि]मन्त्राराधनविधिर्वक्ष्यते—

तत्र त्रिपुरामन्त्रस्त्रिविधः त्रिभुवनमोहिनी, षट्पुटत्रिपुरा, महात्रिपुरेति। तत्राद्यमन्त्रः सबिन्दुकद्वादशस्वरः ककारलकारचतुर्थस्वरबिन्द्वात्मकं द्वितीयं बीजम् इति बीजत्रयात्मको बालामन्त्रः । द्वितीयस्य हकारसकाररेफयुक्तबिन्द्वन्तैकारः इत्येकं बीजं हकारसकारककारलकाररेफबिन्द्वन्तचतुर्थस्वरयुक्तं द्वितीयं बीजम् ।

* * * *

सर्वस्य त्रिपुरामन्त्रस्य दक्षिणामूर्तिः ऋषिः, पङ्क्तिः छन्दः, त्रिपुरा सरस्वती देवता ।

End:

अक्षस्रक्पुस्तककरा रक्ताभास्सर्वशक्तयः ।
दिव्याम्बरास्सर्वभूषास्सर्वाभीष्टप्रदायिकाः ॥

अनन्तरं ब्रह्माण्यादिमातृगणं चण्डिकान्तमष्टकोणेषु पूजयेत् ।

असिताङ्गोऽरुरुश्चण्डः क्रोध उन्मत्तसंज्ञिकः ।

No. **7863.** त्र्यम्बककल्पः.

TRYAMBAKAKALPAḤ.

Substance, paper. Size, $10\frac{7}{8} \times 8\frac{1}{2}$ inches. Pages, 19. Lines, 16 on a page. Character, Telugu. Condition, good. Appearance, new.

Breaks off in Kuṇḍalakṣaṇa.

Incomplete.

Gives the characteristics of the Tryambakamantra and the method of repeating it. The Mantra is considered to be efficacious in keeping off diseases.

Beginning:

आश्रमस्थं सुखासीनं वसिष्ठं जगतः परम् ।
ब्रह्मचर्येण तपसा योगैश्वर्यसमन्वितम् ॥

प्रणम्य शिरसा भूमौ गर्गस्तु प(रिपृच्छ)ति ।
श्रुतास्तु बहवो मन्त्राः सर्वकामफलप्रदाः ॥
त्रैयम्बकस्य माहात्म्यं श्रोतुमिच्छामि साम्प्रतम् ।
एवं पृष्टः प्रसन्नात्मा तं प्रत्याह महामुनिः ॥

वसिष्ठः—

महता तपसा दृष्टा मृतसञ्जीविनी मया ।
नासाध्यमनया किञ्चित् त्रिषु लोकेषु विद्यते ॥

End :

उपजिह्वेति सा प्रोक्ता लक्ष्मीस्तत्र प्रतिष्ठिता ।
कुण्डस्य मध्यमे भागे अग्नेरास्यं विदुर्बुधाः ॥

No. **7864.** त्र्यम्बककल्पः.
TRYAMBAKAKALPAḤ.

Pages, 52. Lines, 7 on a page.
Begins on fol. 49*a* of the MS. described under No. 3664.
Complete.
Similar to the above.

Beginning : Same as in the above.

End :

अक्षिरोगे समुत्पन्ने यस्य यस्य तु मन्त्रवित् ।
मन्त्रं जप्त्वा तु तत्तैलं तैलमक्ष्णो(र्विनिक्षिपेत्) ॥
तच्छान्तिर(श्च) भवेत् क्षिप्रं तथा शूलादिनाशनम् ।
अपस्मारादिकुष्ठान्तसर्वरोगादि(न् वि)नाशयेत् ॥

No. **7865.** त्र्यम्बककल्पः.
TRYAMBAKAKALPAḤ.

Pages, 12. Lines, 8 on a page.
Begins on fol. 6*a* of the MS. described under No. 124.
Incomplete. Breaks off in the 14th Paṭala.
Similar to the above.

Contains the following Paṭalas :—

१. मन्त्रध्यानम्.
२. पुरश्चरणलक्षणम्.
३. कुण्डलक्षणम्.
४. मन्त्रविनियोगः.
५. मन्त्रोपायान्तरकथनम्.
६. रक्षाविधिः.
७. शान्तिविधिः.
८. काम्यकर्मनिरूपणम्.
९. उच्चाटनादि.
१०. शत्रुमारणम्.
११. मन्त्रफलकथन.
१२. शत्रुविजयः.
१३. अभिचारशान्तिः.
१४. गजहितकथनम्.

Beginning:

वासिष्ठत्र्यम्बकमुच्यते—

आश्रमस्थं सुखासीनं वसिष्ठं ब्रह्मणा पुरा ।
त्रियम्बकस्य माहात्म्यं श्रोतुमिच्छामि सुव्रत ॥
एवं पृष्टः प्रसन्नात्मा तं प्रत्याह महामुनिः ।

वसिष्ठ उवाच—

महता तपसा दृष्टा मृतसञ्जीविनी मया ॥
नासाध्यमनसा(या) किञ्चित्त्रिषु लोकेषु विद्यते ।
विधिवत्संप्रवक्ष्यामि समाहितमनाश्शृणु ॥
ब्रह्मणा च ऋषिः प्रोक्तः छन्दोऽनुष्टुबिहोच्यते ।
देवता त्र्यम्बको रुद्रः षडङ्गानि शृणु द्विज ॥

End:

आभिचारे च शान्तौ च दानं तर्पणमाचरेत् ।
जपन्नित्यं प्रकुर्वीत ब्राह्मणांश्चापि भोजयेत् ॥

Colophon:

इति त्रयोदशपटलः ॥

अथातः संप्रवक्ष्यामि गजानां हितकाम्यया ।
पूर्वेद्युर्गजराजश्च कृत्वा कौतुकबन्धनम् ॥

* * * *

प्रदोषे समयेऽतीते मुहूर्ते सुमनोहरे ।
ध्यायेत्त्रियम्बकेत्येवं य ऋचा . . . ॥
ततश्च वासुकिं ध्या.

No. 7866. दक्षिणामूर्तियन्त्रम्.

DAKṢIṆĀMŪRTIYANTRAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 176*a* of the MS. described under No. 7247.

Complete.

Gives the method of drawing and consecrating the Yantra or mystic diagram relating to Dakṣiṇāmūrtimantra. The Yantra is considered to have the power to make the wearer learned.

Beginning:

दक्षिणामूर्तियन्त्रम्—

यन्त्रं श्रीदक्षिणामूर्तेः सर्वविद्याप्रदायकम् ।
वद मे योगिनां श्रेष्ठ मार्कण्डेय महामुने ॥

मार्कण्डेय उवाच—

वक्ष्यामि दक्षिणामूर्तेर्यन्त्रं सर्वार्थदायकम् ।
यस्य श्रवणमात्रेण कविर्भवति मानवः ॥

* * * *

संलिख्यैतन्महायन्त्रं पूजयेत्पार्वतीपतिम् ।
महाकविर्भवेन्मन्त्री सर्वविद्यासुनिष्ठितः ॥

End:

एतद्यन्त्रं समालिख्य प्राणस्थापनमाचरेत् ॥
पूजयेद्धारयेद्विद्वान् गुलिकीकृत्य यत्नतः ।
महाकविर्भवेन्मन्त्री बृहस्पतिसमो नरः ॥

अचलां श्रियमाप्नोति सर्वदा विजयी भवेत् ।
कामसौन्दर्यमाप्नोति तेजस्वी सूर्यवद्भवेत् ॥

Colophon:

इति दक्षिणामूर्तियन्त्रं संपूर्णम् ॥

No. 7867. दत्तात्रेयचक्रम्.
DATTĀTRĒYACAKRAM.

Page, 1. Lines, 9 on a page.

Begins on fol. 21*a* of the MS. described under No. 5868.

Complete.

On the method of drawing and worshipping the Cakra or the mystic diagram relating to Dattātrēyamantra.

Beginning:

आदौ वृत्तौ(त्तं) समालिख्य चतुरश्रं ततः परम् ।
पश्चादष्टदलं पद्मं लिखेद्भूपुरमेव च ॥

End:

एह्येहीत्यष्ट बीजानि दलेष्वष्टसु विन्यसेत् ॥
तत्सन्धिष्वङ्गमन्त्राश्च समन्तात्परिपूरयेत् ।
अकारादिक्षकारान्तैर्बिन्दुभिर्मातृकाक्षरैः ॥

No. 7868. दत्तात्रेयतन्त्रम्.
DATTĀTRĒYATANTRAM.

Substance, paper Size, $8\frac{1}{8} \times 6\frac{3}{8}$ inches. Pages, 50. Lines, 23 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete

It is stated in the MS. that it was written on the 8th of the month of Panguni in the year Akṣaya.

This work treats of Indian magic and mysticism as may be seen from the following list of Paṭalas contained therein :—

१. उपोद्घातः.	११. इन्द्रजालादिकौतुकम्.
२. मारणम्.	१२. यक्षिणीमन्त्रविधानम्.
३. मोहनम्.	१३. रसायनम्.
४. स्तम्भनम्.	१४. कालज्ञानम्.
५. विद्वेषणम्.	१५. अनाहारः.
६. उच्चाटनम्.	१६. अन्नाहरणम्.
७. सर्ववशीकरणम्.	१७. निधिदर्शनम्.
८. स्त्रीवशीकरणम्.	१८. वन्ध्यागर्भधारणम्.
९. पुरुषवशीकारः.	१९. विजयप्रदम्.
१०. आकर्षणम्.	२०. सर्पादिनिवारणम्.

Beginning :

श्रीदत्तात्रेय उवाच—

कैलासशिखरासीनं देवदेवं महेश्वरम् ।
दत्तात्रेयः पर्यपृच्छच्छङ्करं लोकशङ्करम् ॥

* * * *

अथ तत्संप्रवक्ष्यामि दत्तात्रेय तथा शृणु ।
कलौ सिद्धिर्महातन्त्रं विना कीलेन कथ्यते ॥

न तिथिर्न च नक्षत्रं नियमो नास्ति वासरः ।
न व्रतं नियमं होमं कालवेलाविवर्जितम् ॥

* * * *

Colophon :

इति श्रीदत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे प्रथमः पटलः ॥

End :

पुष्यार्के च गृहीत्वा तु श्वेतार्कस्य तु मूलकम् ॥
धारयेद्दक्षिणे हस्ते अग्निबाधाभयं न हि ॥

Colophon:

इति दत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे सर्पवृश्चिकाग्निनिवारणं नाम विंश[ति]: पटलः ॥

* * * *

महादारिद्र्यहरणं महापातकनाशनम् ।
यावज्जीवति सा लोके ग्रहपीडा न बाध्यते ॥

अथ मन्त्रः—

ओं नमो भास्कराय अमुकं सर्पग्रहाणां पीडानाशनं कुरु कुरु स्वाहा ॥

Colophon:

इति श्रीइन्द्रजालाख्यस्समाप्तोऽयं ग्रन्थः ॥

No. **7869.** **दत्तात्रेयतन्त्रम्.**

DATTĀTRĒYATANTRAM.

Substance, paper. Size, $9\frac{5}{8} \times 4\frac{1}{8}$ inches. Pages, 56. Lines, 11 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete in Paṭalas 1 to 22.

Same as the above.

See under the previous number for the beginning.

End:

अथाग्निवारणम्—

उत्तरस्यां च दिग्भागे मरीचो नाम राक्षसः ।
तस्य मूत्रपुरीषाभ्यां हस्तौ स्तम्भो स्वाहा ॥

अनेन मन्त्रेण सप्ताञ्जलि जलं गृहीत्वाग्निमध्ये निक्षिपेत् । अग्निश्शाम्यति ।

गृहीत्वा रविवारे तु श्वेतकरवीरमूलकम् ।
धारयेद्दक्षिणे हस्ते अग्निबाधाभयं न हि ॥

Colophon:

इति दत्तात्रेयतन्त्रे सिंहव्याघ्रादिनिवारणं नाम द्वाविंश[ति]: पटलः ॥

इति दत्तात्रेयतन्त्रं सम्पूर्णम् ॥ इदं रङ्गनाथस्य.

No. **7870.** दत्तात्रेयतन्त्रम्.

DATTĀTRĒYATANTRAM.

Substance, paper. Size, $8\frac{1}{2} \times 6\frac{5}{8}$ inches. Pages, 43. Lines, 9 on a page. Character, Dēvanāgarī. Condition, slightly injured. Appearance, old.

Complete in Paṭalas 1 to 20.

This is a treatise on Indian magic; also known as Indrajāla. See under No. 7868 for the beginning.

End:

इति श्रीदत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे सर्पवृश्चिकाग्निनिवारणं नाम विंशः पटलः ॥

* * * *

महादरिद्रहरणं महापातकनाशनम् ।
यावज्जीवति सा लोके ग्रहपीडा न बाध्यते ॥

अथ मन्त्रः—

ओं नमो भास्कराय अमुकं सर्वग्रहाणां पीडानाशनं कुरु कुरु स्वाहा ॥

Colophon:

इति श्रीइन्द्रजालाख्यस्समाप्तोऽयं ग्रन्थः ॥

No. **7871.** दत्तात्रेयद्वादशाक्षरमन्त्रराजमन्त्रन्यासविधिः.

DATTĀTRĒYADVĀDAŚĀKṢARAMANTRARĀJA-MANTRANYĀSAVIDHIḤ.

Pages, 16. Lines, 5 on a page.

Begins on fol. 6*a* of the MS. described under No. 5445. Complete.

Describes the method of repeating the twelve-syllabled Dattātrēyamantra accompanied by the required ceremonial touching of the several parts of the body.

Beginning :

अथ द्वादशाक्षरमन्त्रन्यासः—

तत्रादौ मूलेन प्राणायामत्रयं कृत्वा ।

अस्य श्रीदत्तात्रेयद्वादशाक्षरमन्त्रराजमहामन्त्रस्य श्रीसदाशिव ऋषिः, जगती छन्दः, दत्तात्रेयः परमात्मा देवता ; द्रां बीजं, स्वाहा शक्तिः, क्रों कीलकं, श्रीदत्तात्रेयप्रसादसिद्ध्यर्थे विनियोगः—इति ऋष्यादीन् शिरोवदनहृदयदक्षवामस्तनहृत्करसंपुटेषु न्यसेत् ।

End :

एवमन्तर्यागं कृत्वा ततश्चक्षुरुन्मील्य मातृकावर्णमालया रुद्राक्षमालया वा नित्यं कुर्यात् ॥

Colophon :

इति सप्तमः परिच्छेदः ॥

No. 7872. दत्तात्रेयद्वादशाक्षरादिमन्त्रोद्धारः.

DATTĀTRĒYADVĀDAŚĀKṢARĀDIMANTRŌDDHĀRAḤ.

Pages, 8. Lines, 9 on a page.

Begins on fol. 11*a* of the MS. described under No. 5868.

Complete.

Deals with the order of arrangement of the syllables constituting the eight kinds of Dattātrēyamantra. The repetition of these Mantras is said to have the power to enable one to accomplish one's objects and to confer on one longevity, wealth, happiness, etc.

Beginning :

अष्टमन्त्रोद्धारः—

द्वादशाक्षरमन्त्रस्तु ततस्स्यात् षोडशाक्षरः ।
षडक्षरमतः पश्चात्तयोरे(त ए)काक्षरो मनुः ॥

अष्टाक्षरमनुः पश्चात् विंशद्वर्णमनुस्तथा ।
अनुष्टुप् च ततः पश्चान्मालामन्त्रमतः परम् ॥
एवमष्टविधा मन्त्रा दत्तात्रेयस्य योगिनः ।
शीघ्रमिष्टार्थदातारः तत्रापि च कलौ युगे ॥
भोगी भवति योगी च चिरञ्जीवी च जायते ।
तन्मन्त्रं जापको मर्त्यः अणिमाद्यष्टसिद्धिमान् ॥

End:

न बाधते यन्त्रमन्त्रयन्त्रसिक्ताम्बुनाथ वा ।
बालग्रहादयस्सर्वे यन्त्रं दृष्ट्वा विनाशिताः ॥
निधिनिक्षेपसंरक्षोपसंरक्षा महाग्रहाः ।
फलायनमनुक्तं यत् तत्सर्वं द्वादशार्णवत् ॥

No. 7873. दत्तात्रेयसन्ध्याविधिः.
ḌATTĀTRĒYASANDHYĀVIDHIḤ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 8b of the MS. described under No. 5868.
Complete.

Deals with the method of offering the daily prayers, with Dattātrēya as the deity to be addressed instead of the Sun as in the ordinary daily prayers.

Beginning:

दत्तात्रेयसन्ध्याविधिः—

ओमिति बीजेन त्रिराचम्य, केशवादिस्थानेषु स्पृशेत् । बीजेन प्राणानायम्य, दत्तात्रेयसंध्यामुपासिष्ये । तदनन्तरं सङ्कल्प्य, मन्त्रन्यासं कृत्वा, त्रिवारं जप्त्वा, तीर्थे नाराचमुद्रया पूजायन्त्रं विलिख्य, यन्त्रं स्पृष्ट्वा,

ब्रह्माण्डोदरतीर्थानि करैस्स्पृष्टानि ते रवे ।
तेन सत्येन मे देव तीर्थं देव(हि)दिवाकरः ॥

End:

अनसूयामन्त्रेण अनसूयां तर्पयित्वा मूलमन्त्रेण देववदने तर्पणं कृत्वा आवरणदेवताभ्यो नमः, आरव(वरण)देवतास्तर्पयामि नमः, सर्वोपचारान् समर्पयामि नमः, दक्षिणहस्ते तीर्थमादाय त्रिवारं जप्त्वा पिबेत् । पुनरुपसंहृत्य दत्तात्रेयोऽहमस्मि इत्यनुसन्दधानः सन् यथेच्छं विहरेत् ॥

Colophon:

दत्तात्रेयसन्ध्या समाप्ता ॥

No. 7874. दशविधमन्त्रसंस्कारः.

DAŚAVIDHAMANTRASAṀSKĀRAḤ.

Pages, 2. Lines, 19 on a page.

Begins on fol. 4*b* of the MS. described under No. 2886.

Complete.

This explains the ten kinds of rituals considered necessary for consecrating a Mantra with a view to make it effective.

Beginning:

मन्त्राणां दशकं वक्ष्ये संस्कारास्सिद्धिदायकाः ।
जननं जीवनं पश्चात् ताडनं बोधनन्तथा ॥
अथाभिषेको विमलीकरणाप्यायने यतः ।
तर्पणन्दीपनं युक्तिर्दशैते(ता) मन्त्रसंस्क्रियाः ॥
मन्त्राणां मातृकामध्यादुद्धारो जीवनं स्मृतम् ।

End:

जप्यमानस्य मन्त्रस्य गोपनन्त्वप्रकाशनम् ।
संस्कारा दश संप्रोक्तास्सर्वमन्त्रेषु गोपिताः ॥

Colophon:

इति दशविधसंस्काराः ॥

No. 7875. दुर्गाप्रकरणम्.
DURGĀPRAKARAṆAM.

Pages, 9. Lines, 10 on a page.

Begins on fol. 206*a* of the MS. described under No. 124.

This forms a portion of the Ākāśabhairavakalpa and contains the first three Upadēśas completely and the 4th incompletely. Treats of the Mantras addressed to the several manifestations of Durgā.

Beginning:

ततो रक्षाम्बिके दुर्गा सर्वातीतवरक्रमाम् ।
चराचरमयीं देवीं सर्वकामफलप्रदाम् ॥

* * * *

विविक्ता विविधा दुर्गा वीरमाहेश शूलिनी ।
तासां तु शूलिनी दुर्गा महाकारेति कीर्तिता ॥
अथवा सम्प्रवक्ष्यामि स्वात्मना करणेच्छया ।
अग्निदुर्गा महादुर्गा जलदुर्गा च नामतः ॥
पश्चात्तु शूलिनी दुर्गा [महाक्रूरे] अपवर्गविशेषतः ।
समाहितमना भूत्वा शृणु सर्वं वरानना(ने) ॥

End:

मनुः—

ओं नमः ह्रीं दुं ज्वल ज्वल शूलिनि त्वमिह पाहि भस्मां(स्मनामां) सदा समस्तरिपुदुष्टग्रह हुं फट् ॥

No. 7876. दूतीयजनमन्त्रप्रयोगः.
DŪTĪYAJANAMANTRAPRAYŌGAḤ.

Pages, 69. Lines, 8 on a page.

Begins on fol. 84*a* of the MS. described under No. 675
Incomplete.

Describes the manner in which the follwers of Śaktism should worship the women selected for the purpose of Śakti-worship. The idea seems to be that such a woman acts as a grace-seeking mediator between the worshipper and Dēvī.

Beginning:

आत्मपूजानन्तरं शिरसा श्रीगुरुं प्रणम्य--

देवनाथ गुरो स्वामिन् देशिक स्वात्मनाधिकम् ।
अनुज्ञान्देहि भगवन् त्वं दूतीयजनाय मे ॥

इति गुर्वाज्ञामादाय--

सर्वलक्षणसंपन्नां ब्रह्मविद्यादिदीक्षिताम् ।

दूतीः प्रातर्निमन्त्रितां सादरं स्वयं गत्वा प्रणम्य समाहूय पूजास्थाने मृद्वासने समुपवेश्य तस्य पादौ प्रक्षाल्य तां प्रणम्य कृताञ्जलिस्सन् भगवतीश्रीपरदेवतायजनार्थं त्वं दूती भूत्वा कृतार्थं मां कुरु इति प्रार्थ्य स्वासने उपविश्य कृताञ्जलिः ओं ऐं ह्रीं श्रीं ।

End:

अथ(त) ऊर्ध्वं न पूज्या स्यादित्याज्ञा परमेश्वरी ।
पूजिता चेद्वरारोहे तर्पणं निष्फलं भवेत् ॥
अर्चनेषु प्रयोक्तव्याः कामिन्यो भक्तचेतसः ।
सा यदा रजसा युक्ता तदा पूजा महाफलम् ॥
आत्मीयां च परां चैव पुष्पवन्तीं(युक्तां) प्रपूजयेत् ।
तत्र द्वेषपरो मूर्खो दारिद्र्यं समवाप्नुयात् ॥
अथ पूजाफलं वक्ष्ये उत्तरादुत्तरोत्तरम् ।

No. 7877. देवीसन्ध्यावन्दनविधिः.
DĒVĪSANDHYĀVANDANAVIDHIḤ.

Pages, 4. Lines, 16 on a page.

Begins on fol. 57*a* of the MS. described under No. 424.
Complete.

Deals with the manner of offering the daily prayers with a view to please Dēvī.

Beginning:

अथ प्रातस्सन्ध्याविधिः—

ऐं आत्मतत्त्वं स्वधा, क्लीं विद्यातत्त्वं स्वधा, सौः शिवतत्त्वं स्वधा—इत्याचम्य, बालया प्राणानायम्य, न्यासं कृत्वा, वामकरे जलं निक्षिप्य, लं वं रं यं हं इति पञ्चभूबीजैर्जलं विशोध्य, बिन्दुमुद्रायां त्रिपुरवागीश्वरीश्रीपादुकां पूजयामि इति मार्जनत्रयं कृत्वा शिष्टं जलमिडया आकृष्य पिङ्गलया विरेच्य आधारचतुर्दशमण्डले वाग्भवं तटिद्वर्णं ध्यात्वा बहिराकाशस्थाग्निमण्डले समावाह्य तदुद्भवां सन्ध्यां देवीं ध्यायेत् ।

End:

एवं ध्यात्वा ऐं क्लीं सौः त्रिपुरसुन्दरि विद्महे कामेश्वरि धीमहि । तन्नोऽनङ्गः प्रचोदयात् ॥ यथाशक्ति जपं कुर्यादिति सन्ध्याविधिः ॥

No. 7878. द्वादशारयन्त्रलक्षणम्.

DVĀDAŚĀRAYANTRALAKṢAṆAM.

Page, 1. Lines, 8 on a page.

Begins on fol. 188*a* of the MS. described under No. 119.

Complete.

Describes a form of the mystic diagram containing twelve compartments.

Beginning:

द्वादशारं लिखेत् पद्मं नववृत्तसमन्वितम् ।
तन्मध्ये कर्णिकां कुर्यात् द्वादशाङ्गुलिविस्तृतम् ॥
पञ्चाङ्गुलप्रमाणेन भ्रामयेत्प्रतिपङ्क्तितः ।

End:

कृष्णवर्णेन मतिमान् अक्षराणि न्यसेत्ततः ।
दलेष्वक्षरविन्यासो मन्त्राङ्गानि परिभ्रमात् ॥

No. 7879. धारणगोपालविधिः.
DHĀRAṆAGŌPĀLAVIDHIḤ.

Pages, 5. Lines, 16 on a page.

Begins on fol. 1*b* of the MS. described under No. 424.

Complete.

Gives the manner of offering prayers daily with a view to please Dhāraṇagōpāla, i.e., Śrī Kriṣṇa conceived as lifting up the Gōvardhana hill.

Beginning:

धारणस्य गोपालसन्ध्या । प्रत्यहं दिनादौ क्लीं कामदेवाय॰ विद्महे पुष्पबाणाय धीमहि। तन्नोऽनङ्गः प्रचोदयात् । इति कामगायत्र्या प्राणानायम्य मन्त्रन्यासपूर्वकं तयैव त्रिः संप्रोक्ष्य ॥

End:

ककुदंसे च हृत्पूर्वे पाणिपादतलेषु च ॥
जठरासनयोश्चैव स्थानान्यथा(यथास्थानं) क्रमान्न्यसेत् ।
ततः केशवादिन्यासान् कुर्यात् ततो मन्त्रन्यासः ॥

No. 7880. धूपाञ्जनविधिः.
DHŪPĀÑJANAVIDHIḤ.

Pages, 4. Lines, 3 on a page.

Begins on fol. 136*a* of the MS. described under No. 2848, wherein this is mentioned as Dūmāñjanavidhāna in the list of other works.

Incomplete.

Describes the manner of producing certain kinds of fume and of preparing certain kinds of unguent used for the purpose of driving away evil spirits from any person.

It is stated that certain incantations should be repeated during the process of picking out the herbs necessary to prepare the unguent, etc.

Beginning:

चराचरमये जगत्यखिललोकरोगापहं
परामृतचिरोदितं विविधधूपदिव्याञ्जनम् ।
अशेषविधविग्रहग्रहविकारशान्तिप्रदं
सुखाय कथयामि तच्छृणु निबोधमन्विच्छता ॥

* * * *

धूपश्चतुर्विधः प्रोक्तो दीपधूपोऽग्निधूपकः ।
सार्द्रकोऽनार्द्रकश्चेति सर्वबाधानिवृत्तये ॥

End:

निम्बतैलेन संसिच्य धूपयेन्नाशयेत्रचहम् ।
मुक्तयेत् क्षुद्रसम्भूतान् सु-२-भमरु . . कान्(!) ॥

No. 7881. धूमावतीकल्पः.
DHŪMĀVATĪKALPAḤ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 47*a* of the MS. described under No. 21 and not on fol. 65*a* as shown therein.

Complete.

Deals with the details connected with the repetition of the Dhūmāvatīmantra—*vide* No. 6447 as to the powers of the Mantra.

Beginning:

ईश्वर उवाच—

धूमावत्या महादेव्या नारसिंह ऋषिस्तथा ।
पङ्क्तिश्छन्दस्तथा देवी ज्येष्ठा देवी च देवता ॥
धूं बीजं तु ततश्शक्तिः स्वाहायोगस्तु निग्रहे ।

End:

अन्योन्यकलहः क्षिप्रं शत्रूणां जायते ध्रुवम् ॥

विलोमेन जपेनैव निवृत्तिस्स्यात्सहस्रशः ॥
नान्यमन्त्रे निवृत्तिस्स्यात्प्रयत्नेन कृतेऽम्बिके ॥

No. 7882. धूमावतीयन्त्रम्.
DHŪMĀVATĪYANTRAM.

Page, 1. Lines, 19 on a page.

Begins on fol. 45*a* of the MS. described under No. 2886 wherein this has been omitted to be shown among the other works.

Complete.

Deals with the Yantra relating to the Dhūmāvatīmantra.

Beginning :

धूमावत्याः नारसिंहः, पाङ्कः, ...
ध्यायन् कालाभ्र ।

प्रथमं धूं समुच्चार्य पश्चाद्धूमावती तथा ।
स्वाहेति मन्त्ररूपं तु सप्ताक्षरमुदीरितम् ॥

End :

ऋतुकोणस्थवृत्तान्तबीजं कोणे मनुं लिखेत् ।
कोणाग्रशूलके साध्यं ज्येष्ठायन्त्रमिहोच्यते ॥

No. 7883. धूम्रवाराहीमन्त्रकल्पः.
DHŪMRAVĀRĀHĪMANTRAKALPAḤ.

Pages, 6. Lines, 7 on a page.

Begins on fol. 23*a* of the MS. described under No. 5737.

Complete.

This is taken from Kālamṛtyutantra in Kālarātryāgama.

On the details connected with the repetition of the Dhūmravārāhīmantra which is considered to have the power of destroying one's enemies or of subjecting them to dire diseases such as epilepsy, etc.

Beginning:

मृत्युधूमे अङ्गुष्ठ, धूं धूं कालधूमे तर्जनी, धूं धूं मध्यमाभ्यां, नमः धूम्रवाराहि अनामिका, हुं फट् कनिष्ठिका, स्वाहा करतलकर-पृष्ठ, ओं धूं धूं मृत्युधूमे हृदयाय नमः, धूं धूं कालधूमे शिरसे स्वाहा.

* * * *

अथ ध्यानं प्रवक्ष्यामि वाराहीधूम्रसौम्यकम् ।
ध्यानेन सिद्धिमाप्नोति चिन्तितां रिपुनाशनम् ॥
नमस्ते धूम्रवाराहि वैरिप्राणापहारिणि ।

End:

त्रिसप्तमूलमन्त्रेण मन्त्रयित्वा तु भौमके ॥
स्थापयेच्छत्रुगेहे तु जपेदष्टसहस्रकम् ।
काकवक्त्रमते शत्रुरपस्मारेण संयुतः ॥

Colophon:

इति कालमृत्युतन्त्रे कालराज्यागमे उत्तराथर्वणास्त्रविद्या नाम द्वाविंशः पटलः समाप्तः ॥

No. 7884. धूम्रवाराहीमन्त्रोद्धारः.
DHŪMRAVĀRĀHĪMANTRŌDDHĀRAḤ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 9*a* of the MS. described under No. 5864.

Complete.

On the order in which the syllables constituting the Mantra should be repeated.

Beginning:

नवरत्नप्रियां देवीं नानालङ्कारभूषिताम् ।
नमामि शत्रुनाशार्थं वैरिमारणकारिणीम् ॥

पार्वत्युवाच—

कालरुद्र नमस्तुभ्यं कलाधर नमोऽस्तु ते ।
अधुना धूम्रवाराह्या मन्त्रयोगं वद प्रभो ॥

ईश्वर उवाच—

कालमृत्युभयं मन्त्रं प्राणिप्राणापहारकम् ।
मारणास्त्रमिदं देवि सर्वमन्त्रेषु गोपितम् ॥

*   *   *   *

धूं पूर्वं धूम्रशब्दं च वाराहीतिपदं वदेत् ।
हुंफट् स्वाहासमायुक्तं धूम्रवाराहिकामनुः ॥
चतुर्विंशतिवर्णोऽयं मन्त्रराजेश्वरेश्वरः ।
कालमृत्युरृषिः प्रोक्तः बृहती छन्द एव च ॥

End:

न वक्तव्यं न वक्तव्यं न वक्तव्यं कदा चन ।
शिष्यपापं गुरोर्देवि निश्चितं स्मृतिचोदितम् ॥

Colophon:

इति श्रीकालमृत्युतन्त्रे कालराञ्यागमे उत्तराथर्वणविद्या नाम एकविंश[ति]ः पटलः ॥

No. **7885.** नवग्रहकल्पः.

NAVAGRAHAKALPAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 9*b* of the MS. described under No. 6459.

Incomplete.

Gives particulars as to the kind of fuel to be used in the conduct of the fire-oblation in respect of the Navagrahas, and the Mantras, etc., to be used in the conduct of the worship.

Beginning :

अर्कसमिधमादित्याय, पलाशं सोमाय, खादिरमङ्गारकाय, अपामार्गं बुधाय ।

End :

बृहशु(च्छु)क्र(श)शनिस्सूर्यः त्रिष्टुप्छन्दसि मध्यमम्(:) ।
बुधेर(धस्त्व)नुष्टुप्छन्दस्यए(प्ये)तच्छन्दस्य(सि) लक्षणम् ॥

No. 7886. नवग्रहयन्त्रः.

NAVAGRAHAYANTRAḤ.

Pages, 6. Lines, 7 on a page.

Begins on fol. 46*a* of the MS. described under No. 2854.

Complete.

On the method of drawing the Yantra relating to the Navagrahamantra.

Beginning :

ईश्वर उवाच—

पूर्वरेखा दश प्रोक्ताः तिर्यग्रेखास्तथा दश ।
चन्द्रमावसुकोणेषु ग्रहयन्त्रं लिखेद्बुधः ॥
पूर्वपश्चिमवेधाश्च वेधाश्चोत्तरदक्षिणे ।
अग्नि[र्वा](वा)यव्य[द्द](दि)ग्वेधो नैरृतीशान्ययोस्तथा ॥
चतुष्कोणेषु नवसु नवकोष्ठेषु दृश्यते ।

End :

मध्येवर्तुलमण्डलेऽनलयमेशार्ङ्के(र्थे)शदेवेश्वर-
प्राचेतासुरवायुदिक्षु दिवसाधीशादिखेटान् क्रमात् ।
पश्चादीशदिगादिपद्मपरितो राशीन् वृषादीन् ततो
मेषान्ताननलाद्युङ्गानि च दिगीशान्तान् क्रमेणार्चयेत् ॥

Colophon :

नवग्रहयन्त्रम् ईशान्यादि समाप्तम् ॥

No. 7887. नवदुर्गापद्धतिः.
NAVADURGĀPADDHATIḤ.

Pages, 4. Lines, 20 on a page.

Begins on fol. 49*a* of the MS. described under No. 2961 and forms a portion of Bhairavayāmala shown among the other works given therein.

Complete.

On the manner of repeating the Mantra addressed to Navadurgā. This Mantra is believed to have the power of bringing other persons under one's control.

Beginning:

पुनरेकं प्रवक्ष्यामि कालिकाकर्षणं मनुः ।
प्रस्तं कृत्वा साध्यनाम सहस्रं रविवासरे ॥
निशाकाले जपेद्धीमानेकान्ते स्वस्तिकासने ।
नारीश्च स्वप्रियं वाथ पुरुषाकर्षणं भवेत् ॥

End:

भक्षणीयं प्रयत्नेन मोहनं द्रावकं भवेत् ।
मन्त्रितश्चैव तिलकं कृत्वा दर्शनमेव च ॥
स्त्रियो वा पुरुषो वाथ दर्शनात्तिलकस्य च ।
मोहनं गृह्यते लोके अत्याश्चर्यकरं तथा ॥

Colophon:

इति भैरवयामळे उमामहेश्वरसंवादे नवदुर्गापद्धतिः संपूर्णा ॥

No. 7888. नवरत्नमुद्रिका.
NAVARATNAMUDRIKĀ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 26*a* of the MS. described under No. 5660.

Complete.

Gives two methods of winning the favour of the Navagrahas. It is stated that the supplicant should wear a ring which

is set in a prescribed order with the several kinds of precious stones generally associated with the Navagrahas, the propitiatory **Mantras** being repeated while the stones are being set; or the supplicant may mentally dedicate to the Navagrahas an imaginary ring conceived to be set with the letters of the alphabet divided into nine groups corresponding to the nine kinds of precious stones.

Beginning:

श्रीसूर्यादिनवग्रहेभ्यो नमः ।

नवग्रहाधारः । अथ मातृकायां नवरत्नग्रहाणि नववर्गकाणि सकल-लोकान् धयति(न्ति) कर्तॄन् सङ्ग्रहेण उपदेक्ष्यामः—

विभजेन्मातृका यन्त्री नववर्गान् यथाक्रमम् ।
कळाः स्वरान् तथा स्पर्शान् कादिपञ्च यशान्ततः ॥

* * * *

सूर्येन्दुभौमज्ञगुरुभृगुमन्दाहिकेतवः ।
माणिक्यं मौक्तिकं चारु विद्रुमं गारुडं पुनः ॥

पुष्यरागं कनद्वज्रं नीलं गोमेधकं शुभम् ।
वैडूर्यं नव रत्नानि मुद्रान्ते कारयेत् सुधीः ॥

End:

इत्थं सूर्यस्य प्रागादिप्रादक्षिण्यक्रमेण नवरत्नखचितमुद्रिकां सकल-मनोरथसिद्धये नवग्रहरत्नमुद्रिकां धारयेत् । मुद्रिकाद्वयकलाभिर्विहितः नवग्रहानुग्रहार्थं मातृनववर्गजातनवग्रहाणां मन्त्राणामुपासकानामभीष्ट-सिद्धये । सूर्यन्ते—

आभा, कामा, गया, चारा, बुला, टव, डषं, णश ।
तसं, दाह, नळं, पक्षा इत्येते मुद्रालक्षणम् ॥

No. 7889. नवरात्रीकल्पः.
NAVARĀTRĪKALPAḤ.

Pages, 5. **Lines, 16 on a page.**

Begins on fol. 81*b* of the MS. described under No. 7739.

Complete.

On the method of the ceremonial repetition of Mantras during the festival called Navarātrī or Daśarā with a view to make them efficacious.

Beginning :

पार्वत्युवाच—

त्रिपुरान्तक सर्वेश त्रिकालज्ञानसागर ।
नवरात्रिपुरश्चर्याप्रयोगं वद शङ्कर ॥

* * * *

तत्प्रयोगं प्रवक्ष्यामि शृणु सर्वं च पार्वति ।
शुक्लप्रतिपदारभ्य तन्नवम्यां समापयेत् ॥
एकोत्तरसमृद्धिश्च तन्नवम्यां जपेत्सुधीः ।

End :

नवरात्रिपुरश्चर्या एवं विधिकृता यदि ।
सर्वान् कामानवाप्नोति दैवतैरपि दुर्लभान् ॥

* * * *

शिवरूपो विष्णुरूपो देवीरूपो न संशयः ।
जीवन्मुक्तस्स पूतात्मा कालीब्रह्ममयो भवेत् ॥

No. 7890. नागार्जुनयन्त्रः.
NĀGĀRJUNAYANTRAḤ.

Page, 1. **Lines, 8 on a page.**

Begins on fol. 188*a* of the MS. described under No. 119.

Gives the Ślōka containing the syllables to be written in the Yantra relating to the Nāgārjunamantra.

Beginning and **End :**

नागार्जुनयन्त्रश्लोकः—

नानारसतुलानाना नानाजाये वशे नना ।
एकैकहानिमिष्टार्थमेकादश कटक्रमात् ॥

No. 7891. नाथपारायणकारिका.

NĀTHAPĀRĀYAṆAKĀRIKĀ.

Page, 1. Lines, 10 on a page.

Begins on fol. 56*a* of the MS. described under No. 5647, wherein this is shown as Mantrapārāyaṇakramaḥ.

Complete.

Gives a list of the several Gurus called Nāthas recognised in the Śākta religion. The list is intended to serve as a help in repeating the names of the Gurus as ordained in that religion.

Beginning:

प्रकाशश्च विमर्शश्च आनन्दो ज्ञानमेव च ।
सत्यः पूर्णस्स्वभावश्च प्रतिभा सुभगा नव ॥

ततो मूलविद्यां प्रातरित्थं जपेत् । तद्यथा—

End:

प्राणायामत्रयमृष्यादिकरषडङ्गन्यासं च विधाय कृतं जपं देव्यै निवेद्य प्रणम्य स्तुत्वा सूर्यमण्डलाद्वह्निमण्डलाच्च मूलदेवीं वाग्भवेश्वरीं च हृदये मूलाधारे च विसृज्य श्रीगुरुं प्रणमेत् ॥

Colophon:

इति नाथपारायणजपः ॥

No. 7892. नामपारायणम्.

NĀMAPĀRĀYAṆAM.

Pages, 4. Lines, 7 on a page.

Begins on fol. 173*b* of the MS. described under No. 745, and not on 170*a* as shown therein.

On the method of repeating the names of Dēvī as consisting of the letters of the alphabet.

Beginning:

एवं सन्ध्याचतुष्टयं विद्योपासकानामावश्यकं तदङ्गमन्त्रपारायणम् । नामपारायणन्तु प्रातरादि पुनः प्रातरन्तं जपेत् । तत्रादौ साधको विविक्तदेशे नदीतीरे एकान्ते स्वगृहे वा स्वासने समास्थितं ह्रीं आधारशक्तिकमलासनाय नमः इत्यासनं संपूज्य ।

End:

सर्वेषु दिनेषु सम्भूय षट्त्रिंशदुत्तरसप्तशताधिकएकविंशतिसहस्रनामपारायणजपो भवति । ततः मूलमन्त्रैर्जपेदेनां गुरुपादुकाभक्तितः उत्तीर्णप्रार्थनाविद्यां च सकृत् सकृज्जप्त्वा पारायणस्तोत्रं पठेत् ॥

Colophon:

इति नामपारायणस्समाप्तः ॥

No. **7893.** नामपारायणविधिः.

NĀMAPĀRĀYAṆAVIDHIḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 79*b* of the MS. described under No. 3472, wherein this has been omitted to be shown among the other works.

Complete.

Subject: same as the above.

Beginning:

नामपारायणं कुर्यात् । तत्क्रमः—

नद्यां स्वगृहे वा आसनमास्तीर्य ह्रीं आधारशक्तिकमलासनायै नमः इत्युपविश्य गुरुगणपतिस्वेष्टदेवताः प्रणम्य प्राणायामपूर्वकं सङ्क्षेपतो भूशुद्धिभूतशुद्धिप्राणप्रतिष्ठान्तर्मातृकाबहिर्मातृका विन्यस्य कालचक्रन्यासं कुर्यात् ।

End:

अथ तत्तद्दिनवर्गमपि जपित्वा अनन्तरं तन्मासस्वरादारभ्य विसर्गान्तं जपित्वा अकारादितन्मासस्वरपर्यन्तं जपित्वा तत्सूक्तं जपेत् ॥

Colophon :

इति नामपारायणविधिः ॥

No. 7894. नारसिंहीमन्त्रः.

NĀRASIṀHĪMANTRAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 31*a* of the MS. described under No. 2854.

Complete.

71st Adhyāya of Ākāśabhairavakalpa.

On the details connected with the repetition of the **Mantra** addressed to Nārasiṁhī, one of the forms of Śakti.

Beginning :

श्रीशिव उवाच—

नारसिंहस्य मन्त्रस्य ऋषिस्सौरतरस्स्मृतः ।
छन्दः पङ्क्तिस्तथा देवी नारसिंही तु देवता ॥
रं बीजमथ फट्छक्तिः सर्वोच्चाटे नियोगकम् ।

* * * *

अश्वाधिरूढामतिभीमगात्रीमरातिवर्गानभिघातयन्तीम् ।
शिलाविभङ्गैर्विविधैः कुशाभिर्नमामि घोरां वरदां नृसिंहीम् ॥

End :

समस्तारिपुमुच्चाटयोच्चाटय स्वाहा ।
शरभेश्वरचक्रे तु क्रमान्मन्त्रं विलिख्य तु ॥
मध्यकोष्टद्वये वायुन्तत्रावाह्य यजेत्ततः ।
सहस्रं प्रजपेन्नित्यं पश्चाहान्निशि साधकः ॥
ग्रावाण(भि)पीडितश्शत्रुः क्षीणभोग्यो मृतप्रजाः ॥
दशाहाद्बन्धुभिस्सार्धं देशात्तु गतो भवेत् ॥

Colophon :

इत्याकाशभैरवकल्पे नारसिंहीमन्त्रो नाम एकसप्ततितमोऽध्यायः ॥

No. 7895. निकुम्बिलायागकल्पः.
NIKUMBILĀYĀGAKALPAḤ.

Pages, 20. Lines, 10 on a page.

Begins on fol. 1*a* of the MS. described under No. 4567.

Contains Paṭalas 1 to 5 ; 6th incomplete.

On the details connected with the repetition of the Pratyaṅgirāmantra. The Mantra derives the other name herein given from the fact that Indrajit used this Mantra in the sacrificial ceremony which he conducted at Nīkumbilā with the object of defeating Rāma and Lakṣmaṇa.

The following are the subjects dealt with in the various Paṭalas :—

१. अङ्गिराप्राशस्त्यम्.
२. राजदोषपरिहारः.
३. प्रत्यङ्गिराजपेतिहासः.
४. पापपरिहारोपायकथनम्.
५. आथर्वणजपविधिः.
६. शत्रुपलायनम्.

Beginning:

देवदेव महादेव सर्वज्ञ जगदीश्वर ।
केनोपायेन . . . . विविधापदि ॥
सामन्तराजपीडासु विषशस्त्राग्निपातने ।
परप्रयोगपीडासु सिंहव्याघ्रभयादिके ॥

* * * *

दुर्गावैनायकौ मन्त्रै सिध्येते तु कलौ युगे ।
ताभ्यामप्यङ्गिरायास्तु मन्त्रश्शीघ्रेण सिध्यति ॥
तस्मादिमं मनुं लोके ये जपन्ति नरोत्तमाः ।
तेषां जगत्त्रयीरक्षा शान्तिस्सञ्जायते जपात् ॥

End:

ब्राह्मणेभ्यो ददात्येव दक्षिणाश्च ददाति वै ।
एवं कृतं चेद्भूपाल सर्वत्र विजयो भवेत् ॥

Colophon:

इति निकुम्भिलायागकल्पे मन्त्ररहस्ये चतुर्थपटलः ॥

* * * *

भूतप्रेतपिशाचादिशिलाय(लयाय) ह्रीं विशेषतः ।
नान्यदेतत्समानं स्यात्परकृत्याप्रशान्तये ॥

No. 7896. नित्यपारायणजपक्रमः.

NITYAPĀRĀYAṆAJAPAKRAMAḤ.

Pages, 24. Lines, 29 on a page.

Begins on fol. 1*a* of the MS. described under No. 5507 Complete.

Deals with the details connected with the daily worship to be conducted in relation to Dēvī.

Treats of the following subjects:—

१. प्रातस्सन्ध्याविधिः.
२. माध्याह्नसन्ध्याविधिः.
३. सायंसन्ध्याविधिः.
४. तुर्यसन्ध्याविधिः.
५. कालनित्याविद्या.
६. कालचक्ररचनाक्रमः.
७. नाथपारायणकारिका.
८. तत्त्वपारायणजपः.
९. नित्यापारायणम्.
१०. मन्त्रपारायणप्रकारः.
११. मन्त्रपारायणोद्धारः.

Beginning:

सा चतुर्विधा प्रातर्मध्याह्नसायाह्नार्धरात्रभेदात् । तथाचोक्तं त्रिपुरार्णवे—

सन्ध्या चतुर्विधा ज्ञेया बाला कौमारयौवना ।
प्रौढा च निष्कला चेति सन्ध्यादेव्यः प्रकीर्तिताः ॥

प्रातःकाले महादेवी विद्या वागीश्वरी मता ।
कामेश्वरी च मध्याह्ने सायाह्ने पुरभैरवी ॥
मध्यरात्रे महादेवी ज्ञेया त्रिपुरसुन्दरी । इति ।

तत्र विधिवदाचम्य मूलविद्यया शिखां बद्ध्वा तयैव प्राणायामत्रयं कृत्वा मूलविद्यया ऋष्यादिकरषडङ्गन्यासान्तं कृत्वा स्वपुरतो धेनुमुद्रया जलममृतीकृत्य मूलविद्ययाष्टवारमभिमन्त्र्य तेन जलेन कुशैरकारादिक्षकारान्तैस्सबिन्दुभिः मातृकाक्षरैः प्रोक्ष्य मूलविद्यया च त्रिः प्रोक्ष्य ।

End:

तारं त्रिवारं भुवनं श्रियं मूलं ततः परम् ।
पूर्वोक्तबीजत्रितयमेकैकं प्रथमं पठेत् ॥
मातृकाक्षरमेकैकं शुद्धबिन्द्वादिभेदतः ।
कालच्यादिनाम्नामेकैकं सम्बुद्ध्यन्तं समुद्धरेत् ।
ततश्शक्त्यादिविद्यानामेकैकं पुरतो वदेत् ।
एवं क्रमेण कथितो मन्त्रस्सर्वसमृद्धिदः ॥
षष्टिस्सहस्राणि तथा सहस्रं द्विशताधिकम् ।
पारायणक्रमो ह्येषां मन्त्राणां कथितश्शुभः ॥

इति मन्त्रपारायणोद्धारः ॥

Colophon:

इति पारायणोद्धारबीजपारायणक्रमः समाप्तः ॥

No. 7897. नित्यापारायणम्.
NITYĀPĀRĀYAṆAM.

Pages, 2. Lines, 10 on a page.

Begins on fol. 57*a* of the MS. described under No. 5647, and forms a part of Mantrapārāyaṇakrama shown among the other works therein.

Complete.

Deals with the method of repeating the Mantras relating to the sixteen Nityas, who are the different manifestations of Śakti.

Beginning :

अथ नित्यापारायणम् ।

सायमाज्ञासरोजस्थां शतचन्द्रसमद्युतिम् ।
शक्तिबीजात्मिकां चापबाणपाशाङ्कुशान्विताम् ॥
युगनित्याक्षरां देवीं घटिकावरणाम्बिकाम् ।
चिन्तयित्वा भगवतीं नित्याभिः परिवारिताम् ॥

* * * *

इति ध्यात्वा मूदिननित्याहं सः अं कामेश्वरीनित्यामन्त्रमुच्चार्य कामेश्वरीनित्यारूपिणीश्रीमहात्रिपुरसुन्दरीश्रीपादुकां पूजयामि ।

End :

इति षोडशनित्याह क्रमेण विद्यात्मकत्वेन जपित्वा यापयेत् ॥

Colophon :

इति नित्यापारायणजपप्रकारः ॥

No. **7898.** निधिप्रदीपिका.
NIDHIPRADĪPIKĀ.

Pages, 30. Lines, 6 on a page.

Begins on fol. 101*b* of the MS. described under No. 5417, and not on fol. 101*a* as shown therein.

Complete.

Forms the 20th and the 21st Paṭalas of Siddhanāgārjunatantra. On the Mantras and recipes considered to be efficacious in enabling one to find out hidden treasures.

Beginning :

ज्ञानानन्दमयं देवं श्रीमहोग्रनृकेसरिम् (?) ।
हृदि ध्यात्वा प्रवक्ष्यामि यत्तत्सिध्यतु मे वचः ॥
निधिप्रदीपकं प्रोक्तं ग्रन्थं श्रीकण्ठशम्भुना ।
क्रियते सारवत्सारं सिद्धशाबरतन्त्रयोः ॥

* * * *

अथ वक्ष्ये महासिद्धौ नोक्तानि(तं हि) निखिलक्षणम् ।
सहायशोभनाकार्यं सप्त पञ्च त्रयोऽपि वा ॥
न सहायं न कर्तव्यं मन्त्राणां सिद्धिसाधनम् ॥
तत्रादौ लक्षणं वक्ष्ये सहायस्य समाहितः ॥

End:

ओं रक्ष स्वाहा—इति कालकर्णमन्त्रः ।
अथो पुष्पं ततो जाजी श्वेतार्कगिरिमल्लिका ।
वक्त्रे निक्षिप्य कवलं छिद्रं पश्यति मेदिनी ॥

Colophon:

इति श्रीसिद्धनागार्जुनतन्त्रे नागार्जुनसिद्धविरचिते एकविंशतिपटलः ॥

No. **7899.** नीलकण्ठत्र्यक्षरकल्पः.

NĪLAKAṆṬHATRYAKṢARAKALPAḤ.

Substance, palm-leaf. Size, 13⅜ × 1⅜ inches. Pages, 39. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is: Sāṅkhyāyanatantra 21*a*.

Adhyāyas 1 to 11 complete

On the details connected with the repetition of Nīlakaṇṭhamantra which consists of three syllables and is addressed to Nīlakaṇṭha or Śiva. The repetition of the Mantra is considered to have the power of removing the effect of poison and to ward off untimely death caused by epilepsy, etc.

Beginning:

वसिष्ठ उवाच—
देवदेव महादेव शिव सर्वज्ञ शङ्कर ।
केनोपायेन वै जन्तुः मुच्यते मृत्युसङ्कटात् ॥
रोगाद्वा विविधैः क्रूरैर्भूतापस्मारमारकैः ।
ग्रहैर्वान्यैर्महाघोरैः देवदैत्योपकारकैः ॥

महानागे दुष्टसङ्घे विषहालाहलादिभिः ।
अन्यैश्च विविधैर्भूतैराभिचारादिभिः कृतैः ॥
परैरुत्पादितैर्घोरैः कृत्यै रोगैरुपद्रवैः ।
मृत्युपाशादिभिश्चान्यैः मुच्यते केन शङ्कर ॥

ईश्वर उवाच —

शृणु गुह्यतमं विप्र शुचिराचम्य वाग्यतः ।
यस्य विज्ञानमात्रेण मृत्युं जग्या(जीया)त् सुदुर्जयम् ॥
महात्मकं महामन्त्रं सर्वोपद्रवनाशनम् ।
त्र्यक्षरं त्रिपदाद्यन्तं त्रिकालज्ञानहेतुकम् ॥
वक्ष्ये तं मुनिशार्दूल मन्त्रोद्धारादिकं क्रमात् ।
देवेश करुणासिन्धो मन्त्रस्यास्य महाद्युते ॥
ऋष्यादिमुद्राध्यानं च क्रमं चाख्यातुमर्हसि ।
देवर्षिस्त्वरुणः प्रोक्तस्त्रिष्टुप् छन्द उदाहृतः ॥
देवताहं महारुद्रो नीलकण्ठ इति स्मृतः ।
बीजं त्रिवृत्समाख्यातं मन्त्राद्यं शक्तिरुच्यते ॥
द्वितीयं कीलकं प्रोक्तं सर्वत्वे विनियुज्यते ।

End:

एवं कृते भवेत्सिद्धिर्वसिष्ठ जपतां वर ॥
पृष्टे सेवाविधिश्चो(धौ चो)क्ते मया ते ब्रह्मनन्दन ।
किं पुनस्तव चाख्येयं तत्पूजस्व वदाम्यहम् ॥

Colophon:

इति परमरहस्ये सञ्जीविनीविद्यायां पूर्वसेवाविधिर्नाम एकादशोऽध्यायः ॥

इति श्रीनीलकण्ठत्र्यक्षरीकल्पस्समाप्तः ॥

No. 7900. नीलकण्ठत्र्यक्षरकल्पः.

NĪLAKAṆṬHATRYAKṢARAKALPAḤ.

Pages, 27. Lines, 28 on a page.

Begins on fol. 150*b* of the MS. described under No. 7748.

Similar to the above. The eleventh Adhyāya is however different from the corresponding one in the MS. described above.

Does not contain the 10th Adhyāya.

१. मन्त्रोद्धारणम्.
२. ध्यानप्रकारः.
३. विनियोगप्रकारः विषादिमन्त्रप्रयोगश्च.
४. भूतशान्तिप्रकरणम्.
५ गर्भरक्षाकरप्रयोगः.
६. उन्मादापस्मारहरणम्.
७. षट्कर्मप्रयोगः.
८. शान्तिहोमविधिः.
९. देवतार्चनाविधिः.
११. सञ्जीविनीमन्त्रोद्धारः.

See under the previous number for the beginning.

End:

नीलकण्ठाखिलेशान महाहालाहलाशन ।
मुञ्च मामाशु महतो मृत्युपाशाद्दयानिधे ॥
इयं सञ्जीविनी नाम सर्वाभीष्टप्रदायिनी ।
नास्तिकायातिदुष्टाय न देयं यस्य कस्य चित् ॥
इदमायुष्करं पुण्यं सर्वारिष्टविनाशनम् ।
सर्वसौभाग्यदं नृणां सदा जप्यमिदं द्विज ॥

Colophon:

इति श्रीनीलकण्ठत्र्यक्षरविद्यायां परमरहस्ये सञ्जीविनीमन्त्रोद्धारं नामैकादशोऽध्यायः ॥

No. 7901. नृसिंहमन्त्रोद्धारः.

NṚSIṀHAMANTRODDHĀRAḤ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 22*b* of the MS. described under No. 6090, and not on fol. 21*b* as shown therein.

Complete.

The 8th Adhyāya of Atharvaṇarahasya.

On the order of arrangement of the syllables constituting the Narasiṁhamantra which is considered to have the power of neutralising the harmful effects of other Mantras.

Beginning:

श्रीलक्ष्मीरुवाच —
देवदेव महादेव नरसिंह जगत्पते ।
परमन्त्रनिवारः स्यात् केनोपायेन मे वद ॥
श्रीनृसिंह उवाच —
शृणु देवि प्रवक्ष्यामि मम मन्त्रमभीष्टदम् ।
ग्रहमारणमन्त्रं च जपेदावश्यकं प्रिये ॥
आदौ वेदादिमुच्चार्य नृसिंहं तारकं तथा ।
परमन्त्रप्रदं चैव प्रध्वंसनकरं परम् ॥
नृसिंहाय ततः पश्चात् वह्निजायेति उ(चो)द्धरेत् ।
षोडशाक्षरमन्त्रेण परमन्त्रविघातनम् ॥
ऋषिः कपिलविष्णुश्च छन्दोऽतिजगती तथा ।
नृसिंहो देवता चेति क्षकारं बीजमेव च ॥
वह्निशक्तिस्ततश्चैव औकारं कीलकं तथा ।
सर्वापत्तारणं चेति विनियोगः प्रकीर्तितः ॥

End:

उग्रास्यं रक्तकेशं प्रलयशिखिनिभं सोमसूर्याग्निनेत्रं
द्वात्रिंशद्बाहुदण्डे दधतमसिगदाशङ्खचक्राब्जशार्ङ्गम् ।
कापालं ब्रह्मदण्डं हुतवहसदृशं प्रज्वलत्पावकाक्षं
क्षां क्षीं क्षौं बीजरूपं नरहरिवपुषः पातु मां नारसिंहम् ॥

* * * *

पलायन्ते यथा नागाः पक्षिराजस्य दर्शनात् ।
सत्यं सत्यं यथा सत्यं नृसिंहस्मरणं प्रिये ॥
गोपनीयं प्रयत्नेन सर्वकार्यार्थसिद्धिदम् ।
सर्वान् कामानवाप्नोति नात्र कार्या विचारणा ॥

Colophon:

इत्यथर्वणसारे स्तम्भोद्भवे मार्कण्डेयनारदसंवादे श्रीनृसिंहमन्त्रोद्धारं नाम अष्टमोऽध्यायः संपूर्णः ॥

No. **7902.** नृसिंहयन्त्रः.

NṚSIṀHAYANTRAḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 39*b* of the MS. described under No. 3056.

Complete.

On the method of drawing the Yantra relating to the Narasiṁhamantra.

Beginning:

वृत्तं षट्कोणं पुनर्वृत्तम् अष्टदलमष्टकोणं वर्तुलं षोडशदलं वृत्तं तन्मध्ये नृसिंहबीजं तत्परितः ईशान्यादिचतुर्दिक्षु नेत्राक्षराणि इ ई उ ऊ तदधस्तात् धर्तुः इति त्र्यक्षरम् । आहत्य वृत्तमध्ये सप्ताक्षराणि ततः परं षट्कोणम् ।

End:

वज्रनखाय विद्महे तीक्ष्णदंष्ट्राय धीमहि । तन्नो नृसिंहः प्रचोदयात् । ततो वर्तुलं ततष्षोडशदलम् । एकस्मिन् दले द्वे अक्षरे, मालामन्त्रः,

उग्र वीर महावीर सर्वदैत्यनिबर्हण ।
सर्वत्र सर्वदा तिष्ठ दुष्टान्नाशय पाहि माम् ॥

Colophon:

इति नृसिंहयन्त्रस्समाप्तः ॥

No. **7903.** पञ्चचक्रविधानम्.

PAÑCACAKRAVIDHĀNAM.

Pages, 6. Lines, 15 on a page.

Begins on fol. 272*b* of the MS. described under No. 424, wherein this is shown as Pañcacakranirdēśa in the list of other works.

Complete.

Deals with the classification of the objects selected for worship by the Śāktēyas.

Beginning:

देवदेव महादेव सर्वविद्याविशारद ।
कौळिकानां हितार्थाय चक्रमेव वद प्रभो ॥

ईश्वर उवाच—

चक्रं पञ्चविधं प्रोक्तं श्रीतन्त्रे रुद्रयामळे ।
विधिना पूजयेच्चक्रं सौख्यमोक्षप्रदायकम् ॥
राजचक्रं महाचक्रं देवचक्रमथापरम् ।
वीरचक्रं चतुर्थं स्यात् पशुचक्रन्तु पञ्चमम् ॥

End:

या काचित्तिष्ठते चक्रे माता च भगिनी स्नुषा ।
दुहिता च तथा भार्या सर्वं माहेश्वरा(रेऽ)र्पयेत् ॥
महेश्वरो यदा भुक्ते(ङ्क्ते) मुक्तिः स्याद्वेदवादतः ।
तस्य संसर्गमात्रेण निर्वाणपदवी भवेत् ॥

Colophon:

इति श्रीरुद्रयामले उमामहेश्वरसंवादे पञ्चचक्रनिरूपणं नाम षष्ठ-[मो](ष्ठो)ऽध्यायः ॥

No. **7904.** पञ्चमुखहनुमद्यन्त्रोद्धारः.

PAÑCAMUKHAHANUMADYANTRŌDDHĀRAḤ.

Pages, 7. Lines, 18 on a page.

Begins on fol. 320*a* of the MS. described under No. 5477, and forms a portion of Mantramālikā included in the list of other works given thereunder.

Complete.

On the method of drawing the Yantra relating to the Pañcamukhahanumanmantra. At the end is given the method of

preparation of an unguent, which, when used as a *tilaka*, or forehead-mark is considered to have the power of enticing all people and making them spellbound.

Beginning:

हनुमद्यन्त्रम्—

प्रथमं वृत्तं तदुपरि त्रिकोणं तद्बहिर्वर्तुलं तदुपरि अष्टपत्रं . .

अथ यन्त्रं प्रवक्ष्यामि सर्वकामार्थसिद्धये ।
आदौ यन्त्रं समालिख्य त्रिकोणं वर्तुलं भवेत् ॥
बहिरष्टदलं पश्चात्तद्बाह्ये द्वादशारकम् ।
षोडशारं ततः पश्चात् द्वात्रिंशद्दलसंयुतम् ॥

End:

विष्णुक्रान्तामच्छनीलीं श्वेतां च गिरिकर्णिकाम् ।
एषां मूलं समुद्धृत्य गोरोचनसमन्वितम् ॥
कन्याहस्तेन निष्पेष्य तिलकं तेन कारयेत् ।
त्रैलोक्यमोहनं चैतत् किमु लोकजनस्य वै ॥

Colophon:

इति पञ्चमुखहनुमत्कल्पं सम्पूर्णम् ॥

No. **7905.** पञ्चमुखहनूमद्यन्त्रोद्धारः.

PAÑCAMUKHAHANŪMADYANTRŌDDHĀRAḤ.

Page, 1. Lines, 19 on a page.

Begins on fol. 18*b* of the MS. described under No. 2886.

Complete.

Similar to the above.

Beginning:

अथ यन्त्रं प्रवक्ष्यामि सर्वकामार्थसिद्धये ।
आदौ चन्द्रं समालिख्य त्रिकोणं वर्तुलं भवेत् ॥

अष्टपत्रं समालिख्य तद्बाह्ये द्वादशारकम् ।
षोडशारन्ततः पश्चात् द्वात्रिंशद्दलमेव च ॥

End:

चतुष्षष्टिदलान्तेषु मालामन्त्रं लिखेत्क्रमात् ।
परितः शेषवक्त्रांश्च भूपुरेषु समालिखेत् ॥

हं हनूमते पञ्चमुखाय स्वाहा । सीतापतये रामाय हन हन हुं फट् स्वाहा ॥

No. 7906. पञ्चमुखहनुमद्यन्त्रोद्धारः.

PAÑCAMUKHAHANUMADYANTRŌDDHĀRAḤ

Pages, 3. Lines, 4 on a page.

Begins on fol. 141*a* of the MS. described under No. 29.

Complete.

Similar to the above. Contains also two lines in Telugu describing the appearance of the Yantra.

Beginning:

षट्कोणं वलयं चैव दशद्वयदलानि च ।
वृत्तद्वययुतत्रिंशच्छदानि पुरभूयुतम् ॥
पञ्चास्यहनुमन्ताख्यं(न्नाम) यन्त्रं विद्वेषनाशनम् ।

End:

इति विलिख्य तदुपरि भूमण्डलं विलिख्य प्रणवेन वेष्टा ॥

Colophon:

इति पञ्चमुखहनुमद्यन्त्रं संपूर्णम् ॥

No. 7907. पञ्चाक्षरयन्त्रः.

PAÑCĀKṢARAYANTRAḤ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 112*b* of the MS. described under No. 5683, and forms a portion of Pañcākṣarīvidyā shewn among the other works therein.

Complete.

On the method of drawing the Yantra relating to the Śiva-pañcākṣarīmantra.

Beginning:

अथ शैवकल्पान्तरोक्तयन्त्रमुच्यते--

तत्रादौ षट्कोणमण्डलं लिखित्वा तदन्तः साध्ययुक्तं प्रासादबीजं विलिख्य षट्कोणेषु प्रणवशक्तिसहितान् पञ्चाक्षरवर्णान् कोणविवरेषु षडङ्गमन्त्रान् संलिख्य ।

End:

एतद्यन्त्रं जपहोमादिना पूजितं धारयेत् ।
आयुरारोग्यैश्वर्यसर्वसंपत्सर्वरक्षाभुक्तिमुक्तिफलानि भवन्ति ॥

No. 7903. पञ्चाक्षरीमन्त्रविधानम्.

PAÑCĀKṢARĪMANTRAVIDHĀNAM.

Pages, 4. Lines, 8 on a page.

Begins on fol. 90*a* of the MS. described under No. 3680.

Complete.

On the arrangement of the syllables constituting the Śiva-pañcākṣarīmantra and on the manner of repeating it.

Beginning:

अथ वक्ष्ये महेशस्य मन्त्रान् सर्वसमृद्धिदान् ।
यैः पूर्वमृषयः प्राप्ताः शिवसायुज्यमञ्जसा ॥
हृदयं वपरं साक्षि लान्तो मान्तानितो मरुत् ।
पञ्चाक्षरो मनुः प्रोक्तस्ताराद्योऽयं षडक्षरः ॥
वामदेवो मुनिश्छन्दः पङ्क्तिरीशोऽस्य देवता ।
षड्भिर्वर्णैः षडङ्गानि कुर्यान्मन्त्रस्य देशिकः ॥

End:

निर्मिता शङ्खमणिभिः कुरुते कीर्तिमक्षयाम् ।
गजदन्तैर्विरचिता माला स्यान्मुक्तये नृणाम् ॥

No. 7909. पञ्चाक्षरीविद्याकल्पः.
PAÑCĀKṢARĪVIDYĀKALPAḤ.

Pages, 14. Lines, 9 on a page.

Begins on fol. 106*a* of the MS. described under No. 5683.

Complete.

On the details connected with the worship of the Śivapañcākṣarīmantra.

Beginning:

अथ उक्तहृल्लेखाशक्तेः पार्वत्यात्मकत्वात् पार्वत्या मायाशबलितब्रह्मभूता . . . . , . . शैवमन्त्रन्यासपूजाप्रकारोपेताः प्रकाश्यन्ते ।

तत्रादौ श्रीमच्छैवपञ्चाक्षरी विद्या निगद्यते । नमःशब्दश्चतुर्थ्यन्तशिवशब्दश्च पञ्चाक्षरी विद्या ।

End:

यत्किञ्चित्प्रार्थयेद्देवं जपेदयुतमादरात् ।
सर्वान् कामानवाप्नोति पुरुषो नात्र संशयः ॥

Colophon:

इति पञ्चाक्षरीविधानं सम्पूर्णम् ॥

No. 7910. पराप्रासादमन्त्रोद्धारः.
PARĀPRĀSĀDAMANTRŌDDHĀRAḤ.

Pages, 14. Lines, 6 on a page.

Begins on fol. 137*a* of the MS. described under No. 673.

Complete. Forms a portion of Kulārṇava.

On the order of arrangement of the syllables constituting the Parāprāsādamantra; contains also the Nyāsa connected with the Mantra.

Beginning:

श्रीदेव्युवाच—

कुळश श्रोतुमिच्छामि श्रीप्रासादपरामनुम् ।
मन्त्रराजं वदेशान न्यासध्यानादिभिः सह ॥

ईश्वर उवाच—

शृणु देवि प्रवक्ष्यामि यन्मां त्वं परिपृच्छसि ।
अस्य श्रवणमात्रेण निराकारः प्रजायते ॥

* * * *

श्रीप्रासादपरामन्त्रो भुक्तिमुक्तिफलप्रदः ।
पराप्रासादमन्त्रस्तु ह्यादिरुक्तः कुलेश्वरि ॥
प्रकाशानन्दरूपत्वात्प्रत्यक्षफलदानतः ।
प्रसन्नचित्तरम्यत्वात्प्रसिद्धार्थनिरूपणात् ॥
प्राक्तनाघप्रशमनात्प्रणतार्तिनिवारणात् ।
प्रासादकरणाच्छीघ्रं प्रासादमनुरीरितः ॥

End:

ऊर्ध्वाम्नायप्रयोगश्च पराप्रासादचिन्तनम् ।
महाषोढापरिज्ञानं नाल्पस्य तपसः फलम् ॥
इति ते कथितो मन्त्रोद्धारन्यासादिकं प्रिये ।
समासेन कुळेशानि किं भूयः श्रोतुमिच्छसि ॥

Colophon:

इति श्रीकुलार्णवे सर्वागमोत्तमे महारहस्ये श्रीप्रासादमन्त्रोद्धारन्यासकथनं नाम चतुर्थोल्लासः ॥

No. 7911. पराशरसंहिता.

PARĀŚARASAMHITĀ.

Substance, palm-leaf. Size, $16\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 644. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Contains Paṭalas 1 to 65

The fols. 91 to 105, 193 to 199 and 202 to 208 are left unwritten. Corresponding to these portions, Paṭalas 25 (end), 26, 27, 28 (beginning), 54, 55, 56, 57 are wanting

The work treats of Hanumanmantra and is attributed to Parāśara.

Said to have been transcribed by Cinta Pērusāstrin from the MS. of Gōvindappa Nāyaka, Raja of Cinnakōṭa, on Tuesday the 12th day of the bright fortnight in the month of Caitra in the year Saumya.

Contains the following Paṭalas :—

१. मन्त्रोपदेशलक्षणकथनम्.
२. पञ्चमुखहनुमन्मन्त्रोद्धारकथनम्.
३. हनुमन्मन्त्रमाहात्म्यम्.
४. आञ्जनेयस्तोत्रकथनम्.
५. सोमदत्तनीलचरित्रकथनम्.
६. हनुमज्जन्मकथनम्.
७. सुवर्चलाद्वादशाक्षरीप्रभावः.
८. ध्वजदत्तचरित्रकथनम्.
९. ध्वजदत्तचरित्रकथनम्.
१०. व्याधचरित्रकथनम्.
११. सुवर्चलाहनुमद्द्वादशाक्षरीमहिमानुवर्णनम्.
१२. सुवर्चलाद्वादशाक्षरीमहिमा.
१३. ध्वजदत्तचरित्रकथनम्.
१४. ध्वजदत्तचरित्रकथनम्.
१५. विजयचरित्रकथनम्.
१६. विजयचरित्रकथनम्.
१७. हनुमन्मन्त्रसन्ध्याविधिः.
१८. स्नानसन्ध्याप्रकारः.
१९. षट्पल्लवप्रयोगाविधिः.
२०. कपिलचरित्रकथनम्.
२१. कपिलचरित्रकथनम्.
२२. कश्यपचरित्रकथनम्.
२३. हरिशर्मचरित्रकथनम्.
२४. सप्ताक्षरीमन्त्रप्रभावः.
२५. हनुमन्मालामन्त्रोद्धारः.
२६. मालामन्त्रकथनम्.
२७. पम्पासरोवर्णनम्.
२८. नारदहनुमत्संवादः.
२९. देवाश्वासनम्.
३०. त्रिशूलवधकामत्रिशूलवधप्रतीक्षणम्.
३१. त्रिशूलरोमवधः.
३२. हनुमत्प्रादुर्भावः.
३३. रक्तरोमवधः.
३४. सुमुखचरित्रकथनम्.
३५. मैन्दचरित्रकथनम्.
३६. हनुमन्मन्त्रान्तरोद्धारः.
३७. मालामन्त्रप्रभावः.
३८. यवनाश्वचरित्रकथनम्.
३९. हनुमद्विग्रहप्रतिष्ठाकथनम्.

४०. हनुमद्विग्रहप्रतिष्ठाकथनम्.
४१. पर्वदिवसपूजाविधानम्.
४२. वीरहनुमन्मन्त्रप्रभावः.
४३. हनुमद्भक्तकथनम्.
४४. मैरावणमायाप्रकटनम्.
४५. पाताललङ्काप्रवेशकथनम्.
४६. हनुमद्वर्णनम्.
४७. मैरावणवधः.
४८. गरुडगर्वापहरणम्.
४९. हनुमत्पूजासाधनम्.
५०. भीमसेनचरित्रकथनम्.
५१. पुरुषमृगहरणोपायः.
५२. मानसिकपूजाविवरणम्.
५३. विश्वरूपदर्शनम्.
५४. भविष्यद्ब्रह्मभावकथनम्.
५५. मालास्तोत्रजपादिलक्षणम्.
५६. स्वप्नहनुमन्मन्त्रप्रभावः.
५७. मन्त्रसंस्कारविवेककथनम्.
५८. चक्रध्यानप्रकरणम्.
५९. श्रीविद्याप्रशंसनम्.
६०. आञ्जनेयावतारभक्तकथनम्.
६१. मुद्रालक्षणकथनम्.
६२. हनुमद्विग्रहप्रकारकथनम्.
६३. होमप्रकारकथनम्.
६४. राजाभिषेकप्रकारकथनम्.
६५. गजाश्वसंरक्षणाग्निजलस्तम्भनकथनम्.

Beginning:

श्रीजानकीपतिं रामं भ्रातृभिर्लक्ष्मणादिभिः ।
सहितं वरदं वन्दे रत्नसिंहासने स्थितम् ॥
एकदा सुखमासीनं पराशरमहामुनिम् ।
मैत्रेयः परिपप्रच्छ तपोनिधिमकल्मषम् ॥
भगवन् योगिनां श्रेष्ठ पराशर महामते ।
किञ्चिद्विज्ञातुकामोऽस्मि तन्ममानुग्रहं कुरु ॥

* * * *

न शीघ्रसिद्धिदा मन्त्राश्चिरकालफलप्रदाः ।
लक्ष्मीनारायणी विद्या भवानीशङ्करात्मिका ॥

सीताराममहाविद्या पञ्चवक्त्रहनूमतः ।
विद्या चतुर्थी संप्रोक्ता नृसिंहानुष्टुभाभिधा ॥

* * * *

Colophon:

इति श्रीपराशरसंहितायां पञ्चमुखहनुमन्मन्त्रविवरणे पराशरमैत्रेयसंवादे मन्त्रोपदेशलक्षणकथनं नाम प्रथमः पटलः ॥

End:

बलिप्रदानशीलस्सन् जपेन्मन्त्रं समाहितः ॥
जपेत सुचिरं कालमरोगी श्रीनिवासकः ।
पुष्पौघादिभिर्युक्तः महावंशप्रवर्तकः ॥

Colophon:

इति श्रीपराशरसंहितायां पञ्चमुखहनुमन्मन्त्रविवरणे पराशरमैत्रेयसंवादे गजाश्वसंरक्षणाग्निस्तम्भनजलस्तम्भनकथनं नाम पञ्चषष्टितमः पटलः ॥

No. **7912.** पराशरसंहिता.

PARĀŚARASAṀHITĀ.

Substance, paper. Size, 12⅛ × 7⅞ inches. Pages, 339. Lines, 26 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Ṣōḍaśyaṣṭōttaraśatanāmāni 171*b*, Tattvaprakāśikā (Stutisūktimālāvyākhyā) 181*a*.

Paṭalas 1 to 65.

Same as the above.

No. **7913.** पापशुद्धिप्रकारः.

PĀPAŚUDDHIPRAKĀRAḤ.

Page, 1. Lines, 19 on a page.

Begins on fol. 14*a* of the MS. described under No. 2886.

Complete.

This forms the 6th Paṭala in the Āñjanēyakalpa of the Sudarśanasaṁhitā.

The mere repetition of the Mantra relating to Āñjanēya unaccompanied by rituals is considered to have the power of removing certain kinds of sin.

Beginning :

पापशुद्धिमथो वक्ष्ये पूजाहोमौ तथा विना ।
स्मरणादेव मन्त्रस्य पापसंहारकारणम् ॥
सन्न्यासी च तपस्वी च गुरोराज्ञावलम्बकः ।
मन्त्रं गृहीत्वा विधिवत् जपेत्स सुसमाहितः ॥

End :

अपात्रदानस्वीकार्य(रः)पुष्पिणीगमनं तथा ।
तत्पापं विलयं याति अष्टोत्तरशतेन च ॥

Colophon :

इति सुदर्शनसंहितायामाञ्जनेयकल्पे षष्ठः पटलः ॥

No. 7914. पाशविमोचनमन्त्रः.
PĀŚAVIMŌCANAMANTRAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 22*b* of the MS. described under No. 2854.

Complete. 55th Adhyāya of Ākāśabhairavakalpa.

On the details connected with the repetition of the Pāśavimōcanamantra which is considered to have the power to extricate one from the three kinds of bondage known among the Śaivites as Mala, Māyā and Karma.

Beginning :

श्रीशिवः—

अथान्यं संप्रवक्ष्यामि मन्त्रं पाशविमोचनम् ।
पूर्ववद्दृष्टिभावादिमन्त्रभेद मि(इ)होच्यते ॥

प्रथमन्तु विलोमेन व्याहृतिं प्रणवन्तथा ।
ध्रुवासुत्वेत्यृचं पश्चात् स्वरादिव्याहृतिन्तथा ॥

End:

अविश्वासो न कर्तव्यः कृते सर्वं विनश्यति ।
तस्मात्सर्वप्रयत्नेन जपेत्सिध्यति निश्चयः ॥

Colophon:

इत्याकाशभैरवकल्पे पाशविमोचनं नाम पञ्चपञ्चाशत्तमोऽध्यायः ॥

No. **7915.** पाशुपतास्त्रमन्त्रोद्धारः.
PĀŚUPATĀSTRAMANTRŌDDHĀRAḤ.

Pages, 3. Lines, 9 on a page.

Begins on fol. 32*a* of the MS. described under No. 21.

Complete.

On the order of arrangement of the syllables constituting the Pāśupatāstramantra.

Beginning and **End:**

अथ शैवपाशुपतमन्त्रोद्धारणक्रम उच्यते । श्रीगुरुवन्दनादिप्राणाया-मत्रयानन्तरं, स च शकारलकारचतुर्थस्वरबिन्द्वात्मकबीजात्मकः पशुपतये हुंफडितिवह्निजायायुक्तषडलान्तः । लद्वन्द्वान्तःप्रणवपूर्वकम् ॥

Colophon:

इति मन्त्रोद्धारक्रमः ॥

No. **7916.** पिण्डगोपालयन्त्रम्.
PIṆḌAGŌPĀLAYANTRAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 140*b* of the MS. described under No. 5417.

Complete.

On the method of drawing the Yantra relating to the Piṇḍagōpālamantra.

Beginning :

आदौ षट्कोणं विलिख्य तन्मध्ये वर्तुलं वर्तुलमध्ये क्ष्रौं विलिखेत् । षट्कोणेषु क्लीं कृष्णाय स्वाहा—इति कृष्णषडक्षरं लिखेत् ।

End :

तद्बाह्ये वृत्तं क्रों—इति अङ्कुशबीजेन वेष्टयेत् ।
तद्बाह्ये वृत्तं सर्वेषु मन्त्रेषु प्रत्यक्षराणां बिन्दुं लिखेत् ॥

Colophon :

इति गोपालयन्त्रस्समाप्तः ॥

No. **7917.** पिताम्बरापद्धतिः.

PĪTĀMBARĀPADDHATIḤ.

Pages, 9. Lines, 16 on a page.

Begins on fol. 75*a* of the MS. described under No. 7739.

Complete ; forms a portion of Jayadrathayāmalatantra.

On the details connected with the repetition of the Mantra, which is addressed to the goddess Pītāmbarī, also known as Bagalā.

Beginning :

अस्य श्रीपीताम्बरीबगलामुखीकवचस्य महादेव ऋषिः, अनुष्टुप् छन्दः, नास्त्रं वाचं छन्दः, श्रीबगलामुखी देवता . . . . .

तत्रादौ यन्त्रोद्धारणम्—

बिन्दुत्रिकोणषट्कोणमष्टारं च ततः परम् ।
षोडशारं ततो देवि ततो भूबीजमालिखेत् ॥

End :

आलिखेच्चतुरः पादनखाग्रतोऽथ समन्वितः ।
अन्योन्यमिलितत्वेन तत ऊर्ध्वं समन्विता ॥
वामपादस्य सन्धी द्वौ द्वौ पादौ परिकल्पयेत् ।
नामस्ति(नुक्ति)रस्य शाखा(नाशा)न्ता वाग्गतिस्तम्भनं परम् ॥

Colophon :

इति जयद्रथयामलतन्त्रे भैरवकल्पे पीताम्बरापद्धतिस्समाप्तः ॥

No. **7918.** पीताम्वराबगलामुखीपद्धतिः.

PĪTĀMBARĀBAGALĀMUKHĪPADDHATIḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 77*a* of the MS. described under No 235. Complete.

Similar to the above.

Beginning :

अस्य श्रीपीताम्बरबगळामुखीमहामन्त्रस्य नारदभगवानृषिः, कालभैरवो वा ऋषिः, उष्णिक् छन्दः,

* * * *

अथार्चनक्रमः। प्रातरुत्थाय स्मरणादिकं कृत्वा बाह्यमभ्यन्तरे वाचं कृत्वा बालाबीजत्रयेण विद्यामायाशिवतत्त्वानि शोधयामि स्वाहा—

इति प्रत्येकमुच्चार्याचम्य ओं ह्रीं श्रीं पक्षसेवाधिपतये माणिभद्राय कीलय कीलय स्वाहा—इति दन्तधावनं कृत्वा।

End :

अन्योन्यमिलितत्वेन तत ऊर्ध्वे समन्विता ॥
वामपाद(स्य)सन्धी द्वौ द्वौ पादौ परिकल्पयेत् ।
नानुक्तिरस्य नाशान्ता वाग्गतिस्तम्भनं परम् ॥

Colophon :

इति जयद्रथयामळतन्त्रे भैरवकल्पे पीताम्बरापद्धतिः समाप्ता ॥

No. **7919.** पुरुषसूक्तयन्त्रोद्धारः.

PURUṢASŪKTAYANTRŌDDHĀRAḤ.

Page, 1. Lines, 19 on a page.

Begins on fol. 6*a* of the MS. described under No. 2886. Complete.

On the method of drawing the mystical diagram in which the syllables of the Puruṣasūkta are written.

Beginning :

षट्कोणकर्णिकामध्ये तारं साध्यसमन्वितम् ।
सुदर्शनष(ड)र्णश्च षट्सु कोणेषु सन्धिषु ॥
तदङ्गानि चतुष्पत्रे केसरेषु क्रमेण च ।
गोपालकचतुर्वर्णान् मन्त्रस्यैकैकमक्षरम् ॥

End :

हैयङ्गवीने प्रविलिख्य यन्त्रं त्रिवारमेतत्प्रविजप्य सूक्तम् ।
प्रातस्समद्यात्वनिता विदग्धं पुत्रं प्रसूते कमलाक्षतुल्यम् ॥

क्लीं कृष्ण क्लीं इति चतुर्वर्णः ओन्नमो भगवते सुदर्शनाय इति द्वादशार्णः ।

* * * *

ओन्नमो भगवते महासुदर्शनाय हुं फट् स्वाहा इति सुदर्शनद्यष्टवर्णः । एवं पुरुषसूक्तयन्त्रम् ॥

No. 7920. पुरुषसूक्तविधानम्.

PURUṢASŪKTAVIDHĀNAM

Pages, 6. Lines, 7 on a page.

Begins on fol. 157*b* of the MS. described under No. 7758.

Complete.

On the details connected with the repetition of the Puruṣasūktamantra.

Beginning :

स्नानादि विधिवत्कृत्वा देवार्चनगृहं व्रजेत् ।
स्थित्वा बहिर्द्वारपालपूजां कुर्यात्समाहितः ॥

* * * *

मृद्वासनयुतां रम्यां कर्णिकां पूजयेत्ततः ।
एवंविधासने विष्णुं श्रिया युक्तं प्रपूजयेत् ॥
पुरुषसूक्तस्य मन्त्रस्य ऋषिर्नारायणो भवेत् ।
पुरुषो देवतानुष्टुप्छन्दोऽस्यास्त्रिष्टुबुच्यते ॥
तारं नमो भगवते पुरुषाय हृदि न्यसेत् ।
मूर्ध्नि न्यसेत्तथैवोक्त्वा सहस्रशिरसे ततः ॥

End:

आह्वामन्त्रासनार्घ्यं पदसलिलमथाचामपुंसूक्तयुक्त–
स्नानं वस्त्रोपवीते मलयजकुसुमे धूपदीपौ क्रमेण ।
मध्वादिः पर्क आदावुपरि च सलिलं पायसाद्यन्नजातं
ताम्बूलं राजपूजा परिणुतिनमनोद्वासनं विष्णुपूजा ॥

No. 7921. पुरुषसूक्तश्रीसूक्तप्रयोगः.
PURUṢASŪKTAŚRĪSŪKTAPRAYŌGAḤ.

Pages, 13. Lines, 15 on a page.

Begins on fol. 191*a* of the MS. described under No. 1197, wherein this is shown as Puruṣasūktahōma among the other works.

Complete.

On the details connected with the repetition of the Puruṣasūkta and Śrīsūkta, and also with the method of performing the fire-offering accompanied by the repetition of the Mantra.

Beginning:

अथ सन्तानयन्त्रप्रसङ्गात् यन्त्रसारोक्तं सन्तानकरं पुरुषसूक्तयन्त्रमपि लिख्यते ।

षट्कोणकर्णिकामध्ये तारं साध्यसमन्वितम् ।
सुदर्शनषडर्णञ्च षट्सु कोणेषु सन्धिषु ॥

* * * *

सहस्रशीर्षेतिषोडशर्चस्य साध्यनारायण ऋषिः, अनुष्टुप् छन्दः, श्रीभगवान् पुरुषो देवता; ओं बीजं, नमः शक्तिः,

* * *

मानसिकपञ्चोपचारान् कृत्वा न्यासप्रकारः ॥

* * * *

अथ श्रीसूक्तन्यासस्य आनन्दकर्दमचिक्लीतेन्दिरासुता ऋषयः,

* * * *

चरुं पुरुषसूक्तेन श्रपयेत् पुत्रकाम्यया। होममिति शेषः। अयं होमस्सन्तानार्थमेव भवति।

हुत्वाग्निं विधिवद्भक्त्या ऋग्भिः षोडशभिर्बुधः।
कृताञ्जलिपुटो भूत्वा स्तुवन्नाशीः प्रयोजयेत् ॥

End:

चतुर्दश्या बलिं कृत्वा पञ्चदश्या प्रदक्षिणम्।
षोडश्योद्वासनङ्कुर्यात् शेषकर्माणि पूर्ववत् ॥

No. 7922. प्रणवकल्पः.
PRAṆAVAKALPAḤ.

Pages, 11. Lines, 7 on a page.

Begins on fol. 92*a* of the MS. described under No. 582.

Contains the 18th Paṭala of Prapañcasāra and the 7th Adhyāya of Vāsiṣṭha-Laiṅgōpapurāṇa.

On the details connected with the repetition of the Praṇava-mantra, Ōm, and of the manner of worshipping God with that Mantra.

Beginning:

अथ प्रणवसंज्ञकं प्रतिवदामि मन्त्रं परं
सजापमपि सार्चनं सहितक्लृप्ति सोपासनम्।
अशेषदुरितापहं विविधकामकल्पद्रुमं
विमुक्तिफलसिद्धिदं विमलयोगिसंसेवितम् ॥
आद्यस्वरस्समेतोऽम(श)रेण सधसप्तमश्च बिन्दुयुतः।
प्रोक्तः स्यात् प्रणवमनुः त्रिमात्रिकस्सर्वमन्त्रसमवायी ॥

* * * *

Colophon:

इति प्रपञ्चसारे अष्टादशः पटलः ॥

End:

ओङ्कारेणैव पोतेन संसाराब्धिं तरेद्विजः ।
प्रणवेन प्रदीपेन स्वात्मानं ब्रह्म पश्यति ॥
वर्णाश्रमपरिभ्रष्टा ये नरा मूढचेतसः ।
तेऽपि पापार्णवं त्यक्त्वा ज्ञानं लब्ध्वा दिवं ययुः ॥
तस्मात्सर्वप्रयत्नेन सादरं सर्वदा मुने ।
अस्याभ्यासेन चात्मानमाश्रयान्यक्रमं त्यजेत् ॥

Colophon:

ओं इत्युपपुराणे वासिष्ठलैङ्गे सप्तमोऽध्यायः ॥

No. **7923.** प्रणवपञ्चाक्षरीयन्त्रम्.

PRAṆAVAPAÑCĀKṢARĪYANTRAM.

Pages, 5. Lines, 5 on a page.

Begins on fol. 174*a* of the MS. described under No. 5417.

Complete.

On the method of drawing the Yantra relating to the Śiva-Pañcākṣarīmantra which has the Praṇava prefixed to it.

Beginning:

आन्ध्रभाषारूपः प्रथमम् ।

End:

ओं ह्रौं शिवास्त्राय हुं फट् नमः, ओं क्लीं पशु हुं पाशुपतास्त्राय हुं फट् नमः, ओं छें छिं छुं छुरिकास्त्राय हुं फट् नमः, ओं ह्रौं अघोरास्त्राय हुं फट् नमः ॥

Colophon:

इति पञ्चाक्षरीयन्त्रस्समाप्तः ॥

Mr. Sreenivasa Rangachari, V. R.

Ranga

Ranga

No. 7924. प्रणवमातृकाभुवनेश्वरीमन्त्रविधानम्.
PRAṆAVAMĀTṚKĀBHUVANĒŚVARĪMANTRA-VIDHĀNAM.

Pages, 2. Lines, 11 on a page.

Begins on fol. 94*b* of the MS. described under No. 5683.

Incomplete.

On the significance and the method of repetition of the Praṇavamantra, Ōm, which is here taken to signify the identity of Ātman and Prakṛti. In this sense this Praṇava-mantra is called Bhuvanēśvarīmantra, as the universe is considered to have sprung from Prakṛti.

Beginning:

अथ सकलमन्त्रस्फूर्त्यापादकाः प्रणवमातृकाभुवनेश्वरीमन्त्रा उपासितव्या इति तेषामुपासनक्रमः कथ्यते ।

उक्तश्च—प्रणवा मातृका देवी ह्लेखीत्यमृतत्रयम् ।
विपिनं सर्वमन्त्राणामित्याह भगवान् शिवः ॥

End:

अहमिति सर्वसाक्षी प्रत्यगात्मा उच्यते । तयोस्सामानाधिकरण्येन ईशत्वमुक्तम् । अस्यार्थस्य स्पष्टतया वाचकः प्रथमः । अस्पष्टतया वाचको द्वितीय इति प्रथममन्त्रोऽवशिष्यते । उभयस्यापि महावाक्यार्थबोधकत्वमस्त्येव ॥

No. 7925. प्रतापहनुमत्कल्पः.
PRATĀPAHANUMATKALPAḤ.

Pages, 19. Lines, 17 on a page.

Begins on fol. 70*b* of the MS. described under No. 5755.

Complete.

Gives the order of arrangement of the syllables constituting the Pratāpahanumanmantra, and also other details connected with the repetition of the Mantra.

Contains the following eight Paṭalas :—

१. मन्त्रोद्धारविधिः.	५. होमविधानम्.
२. मन्त्रजपविधानम्.	६. नानाप्रयोगविधानम्.
३. मन्त्रविधानम्.	७. स्नानसन्ध्याविधिः.
४. रोगशान्तिकरणम्.	८. प्राणायामविधिः.

Beginning :

जगदङ्कुरकन्दाय सच्चिदानन्दमूर्तये ।
गलिताखिलभेदाय नमश्शान्ताय तेजसे ॥

* * * *

मन्त्रोद्धारं प्रवक्ष्यामि मन्त्रमाहात्म्यमेव च ।
मन्त्रसङ्ग्रहणं चैव श्रूयतां कमलेक्षणे ॥
आदौ तु प्रणवो माया ओं नमो भगवते पदम् ।
ततः प्रकटसंयुक्तं ततः पराक्रमाय च ॥

Colophon :

इति श्रीसुदर्शनसंहितायां प्रतापहनुमन्मन्त्रोद्धारविधिर्नाम प्रथमः पटलः ॥

End :

प्राणायामत्रयं पूर्वं कृत्वा सर्वेषु कर्मसु ।
एतद्धनूमन्माहात्म्यं किं भूयश्श्रोतुमिच्छसि ॥

Colophon :

इति श्रीमत्सुदर्शनसंहितायां प्रतापहनुमन्मन्त्रविधानप्राणायामविधिः अष्टमः पटलः ॥

No. 7926. प्रत्यङ्गिराकल्पः.

PRATYAṄGIRĀKALPAḤ.

Pages, 41. Lines, 7 on a page.

Begins on fol. 37*a* of the MS. described under No. 4338.

This contains the Digbandhana, Kṛtyāsūkta and other details prescribed in relation to the use of Pratyaṅgirāmantra ; and is said

to be mainly extracted from the Mahālakṣmīratnakōśa, being the 60th, 68th and 70th chapters thereof.

Beginning:

अथर्वणभद्रकाली—

अस्य श्रीअथर्वणभद्रकालीमहामन्त्रस्य अङ्गिरा ऋषिः, गायत्री छन्दः, भद्रकाली देवता; क्षं बीजं, ह्रीं शक्तिः, फट् कीलकं,

खट् फट् जहि महाकृत्ये विधूमाग्निसमप्रभे ।
देवि देवि महादेवि मम शत्रून् विनाशय ॥

* * * *

अनन्तरं दिग्बन्धनमन्त्रप्रारम्भः—

तयोर्मे पुरस्तात् पावकेनेह कर्मणा । इन्द्रस्तं देवो राजा जम्भयतु जृम्भयतु स्तम्भयतु नाशयतु मोहयतु शोषयतु दाहयतु साधयतु ध्वंसयतु ।

End:

सर्वापमृत्युनिवारणं भवति । सर्वग्रहदोषा नश्यन्ति । वन्ध्या पुत्रं लभते । सती तीर्थमयीं सा विष्णुपदीं प्राप्नोति सरक्तमङ्गुलीयकं दद्यात् ॥

Colophon:

इति प्रत्यङ्गिराकल्पस्समाप्तः ॥

No. 7927. प्रत्यङ्गिराकल्पः.

PRATYAṄGIRĀKALPAḤ.

Pages, 50. Lines, 9 on a page.

Begins on fol. 32*a* of the MS. described under No. 4567, and not on fol. 25*a* as shown therein.

Complete.

On the details connected with the repetition of the Pratyaṅgirāmantra.

Lengar

Lengar

Beginning:

देवदेव महादेव सर्वज्ञ जगदीश्वर ।
प्रत्यङ्गिरारहस्यं च ब्रूहि मे वद शङ्कर ॥

* * * *

अहं ते कथयिष्यामि शृणु पार्वति सुव्रते ।
त्वयोक्तानां क्रिया लोके प्रोक्तः प्रत्यङ्गिरामनुः ॥

End:

ये द्रुह्यादजवो मह्यं मम्नक दायीय दुर्मदा । आविध्यैतान् शोचिषा-विध्य तान् वैवस्वतस्य सदनं यमस्य ॥

Colophon:

अङ्गिराऋचस्समाप्ताः ॥

No. 7928. प्रत्यङ्गिराकल्पः.

PRATYAṄGIRĀKALPAḤ.

Pages, 79. Lines 25 on a page.

Begins on fol. 84*a* of the MS. described under No. 2961.

Complete.

Similar to the above.

Beginning:

यां कल्पयन्तीत्यसौ ऋषिः, कृत्यानुष्टुप्, शीर्षन्वा(ण्व)तीत्यग्निः, कृत्यानुष्टुप्, व(ये)नधिष्ठे(दिष्टे)हाभिवर्तस्वेत्य(न)योर्विष्णुः, कृत्या गायत्री, यस्त्वाकृत्ये दूर्वासः, कृत्यानुष्टुप् क्षिप्रं कृत्ये महादेवः, कृत्यानुष्टुप् ।

End:

मन्त्रेण करहृदयन्यासः । ध्यानम् । प्रत्यङ्गिराऋक्समुदायस्य नवसहस्रजपः । आद्येन दशांशहोमः । त्रिंशत्सहस्रं वा जपः ॥

No. 7929. प्रत्यङ्गिराकल्पः.

PRATYAṄGIRĀKALPAḤ.

Pages, 4. Lines, 8 on a page.

Begins on fol. 14*b* of the MS. described under No. 21, where the work has been shown as beginning on fol. 25*b* in consequence

of blank fols. in the MS. having been taken into account in calculating the number of fols.

Complete.

Similar to the above.

Beginning :

अथातः प्रत्यङ्गिराकल्पं व्याख्यास्यामः—

एतैरेव महापातकोपपातकेभ्यः प्रमुच्यते । एताभिरेव त्रिरात्रमुदुम्बरदण्डं पुरुषमात्रं धारयन् जपेत् । सर्वशत्रून् मारयति । एतेनैव विधानेन यक्षराक्षसभूतप्रेतपिशाचानपि मोहयेत् ।

End :

समाहितमना भूत्वा सहस्रं जपेत् । दीर्घायुर्भवति—इत्याह रैप्पलादयः ॥

Colophon :

इति प्रत्यङ्गिराकल्पः ॥

No. **7930.** प्रत्यङ्गिराप्रयोगः.

PRATYAṄGIRĀPRAYŌGAḤ.

Pages, 17. Lines, 16 on a page.

Begins on fol. 26*a* of the MS. described under No. 7739.

Complete.

Similar to the above.

Beginning :

अथ प्राथमिकं यन्त्रराजं वक्ष्ये यथाक्रमम् ।

अथ याङ्कत्रयम्—

अथ भूमन्दिरं लिख्य तद्बाहिर्भूगृहं लिखेत् ।

अन्तर्भूकोणकोणे च बाह्यकोणे लिखेत्क्रमात् ॥

End :

कार्पासबीजलवणैर्हुनेदष्टसहस्रकम् ॥

सूर्यविलोकनं कुर्वन् अष्टविंशतिसङ्ख्यया ।
जपेन्मन्त्री प्रसन्नात्मा वृष्टिस्तम्भो भवेद्ध्रुवम् ॥

No. 7931. प्रत्यङ्गिराप्रयोगपद्धतिः.

PRATYANGIRĀPRAYOGAPADDHATIḤ.

Pages, 22. Lines, 8 on a page.

Begins on fol. 45*b* of the MS. described under No. 124 and not on 45*a*, as shown therein.

Complete.

Similar to the above.

Beginning :

ब्राह्मे मुहूर्ते उत्थाय शौचादिकं निर्वर्त्य शुद्धवस्त्रं परिधाय भस्मस्नानं कृत्वा शुचिर्भूत्वा स्वासने उपविश्य सहस्रदलकमले स्वशिरसि गुरुं ध्यायेत् ।

सहस्रदलपङ्कजे सकलशीतरश्मिप्रभं
महागुरुपदाम्बुजं विमलगन्धपुष्पाक्षतम् ।
प्रसन्नवदनेक्षणं सकलदेवतारूपिणं
स्मरेच्छिरसि हंसकं तदभिधानपूर्वङ्गुरुम् ॥

एवं ध्यात्वा मानसोपचारैरुपचर्य गुरुपादुकामन्त्रं यथाशक्ति जपित्वा निवेद्य कमले इष्टदेवतां स्मृत्वा न्यासध्यानपूजान्तं विधाय ।

End :

अष्टोत्तरसहस्रन्तु जपेत्संयोज्य भैरवम् ।
मायाबहिश्च तद्यन्त्रं तापयेत्सितिवह्निना ॥
कामज्वरसमाक्रान्तामानयेत्साध्यकामिनीम् ।
निरुध्य यदि नायाति म्रियते नात्र संशयः ॥

No. 7932. प्रत्याङ्गिरायन्त्रकल्पः.
PRATYAṄGIRĀYANTRAKALPAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 16*b* of the MS. described under No. 21 wherein this has been shown as beginning on fol. 27*b*, certain blank leaves in the MS. having been taken into account.

Incomplete.

On the method of drawing the Yantra relating to the Pratyaṅgirāmantra.

Beginning :

बीजं मध्ये नृसिंहं प्रण भुवनाधीश्वरीबललिख्य
कोणं तं नारसिंहं[वि]लिखतु सृणिगुणैर्हुम्फडर्णं स्वबीजम् ।
ज्वालेत्यारभ्य वर्णान् विलिखतु गुणशः शेषमन्ते दलेषु
चाष्टस्वावीतवृत्तं तदुपरि वसुधाकोणमष्टत्रिशूलम् ॥

* * * *

अथ यन्त्रक्रमं वक्ष्ये चत्वारिंशद्दचामपि ।
गुह्याद्गुह्यतमं ज्ञेयं न देयं यस्य कस्य चित् ॥

End :

अन्तर्भूमन्दिरं लिख्य तद्बाहिर्भूगृहं लिखेत् ।
अन्तर्भूकोणकोणे च बाह्यकोणान्तिकक्रमात् ॥

No. 7933. प्रत्यङ्गिरायन्त्रकल्पः.
PRATYAṄGIRĀYANTRAKALPAH.

Pages, 16. Lines, 9 on a page.

Begins on fol. 37*a* of the MS. described under No. 124.

Complete.

Similar to the above.

Beginning :

. . . (अथ यन्त्रक्रमं वक्ष्ये) चत्वारिंशद्दचामपि ।
गुह्याद्गुह्यतमं ज्ञेयं न देयं यस्य कस्य चित् ॥

अगस्त्य उवाच—

कीदृग्विधाय दातव्यं तन्नो ब्रूहि पितामह ।

पितामहः—

गुरुभक्तियुजे कर्मभीताये(या)स्तिकवृत्तये ॥
जितक्रोधाय दातव्यमधुना किमिहोच्यते ।
यन्त्रसङ्ग्रहणादेव क्षयं गच्छन्ति शत्रवः ॥
मन्त्रतन्त्रप्रयोगाश्च वक्ष्यन्ते क्रमशो मुने ।

याङ्कल्पयन्तीत्यस्य

अथ प्राथमिकं यन्त्रराजं वक्ष्ये यथाक्रमम् ॥

End:

नमो निरङ्कुशैश्वर्यगुणायागण्यशक्तये ।
हेरम्बायाम्बिकेयाय विघ्नसङ्घातघातिने ॥
सहस्राराम्बुजारूढं कोटिसोमार्कसन्निभम् ।
सत्यानृतानन्दपदं भुक्तिमुक्तिप्रदं भवेत् ॥
श्रीमन्नाथपदद्वन्द्वपद्मं शिरसि संदधे ।
पापच्छेदक्षयं हंसवर्णयुक्तस्वरूपिणि ॥
प्रत्यङ्गिरामनोन्यासध्यानपूजादिकक्रमः ।
संप्रदायानुसारेण संक्षेपाल्लिखितं मया ॥

No. **7934.** प्रत्यङ्गिरायन्त्रोद्धारः.

PRATYAṄGIRĀYANTRŌDDHĀRAḤ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 57*b* of the MS. described under No. 4338. Similar to the above.

Beginning:

वृत्तं षट्कोणमालिख्य मध्ये बीजं नृसिंहकम् ।
साध्यादिमन्त्रन्यासांश्च[तत्रैव]विलिखेद्दतुकोणके ॥

नृसिंहबीजमुल्लिख्य तच्चतुर्दिक्षु पाशकम् ।
हुम्फट् क्रों इति चालिख्य ततोऽष्टदलमालिखेत् ॥
तद्दलेषु ऋचां वर्णान् चतुरश्चतुरो लिखेत् ।
दलाग्रेषु च मन्त्रार्णान् क्रमेण विलिखेद्बुधः ॥

End:

आलिख्य यन्त्रमेतत्तु धारयेद्यो यथाविधि ।
कृत्यादिभयनिर्मुक्तः स जीवेच्छरदां शतम् ॥

No. **7935.** प्रत्यङ्गिरायन्त्रोद्धारः.

PRATYAṄGIRĀYANTRŌDDHĀRAḤ.

Pages, 2. Lines, 10 on a page.

Begins on fol. 24*b* of the MS. described under No. 4338. Similar to the above.

Beginning:

अथ यन्त्रोद्धारः—
त्रिकोणवेदपत्राष्टपत्रषोडशपत्रके ।
भूपुरेण युते यन्त्रे प्रदद्यान्मायया सह ॥
आग्नेयकोणत्रितये शिववाराहमाधवान् ।
अर्चयेत् स्वस्वमन्त्रैस्तु प्रोच्यन्ते मनवस्तु ते ॥
प्रणवो मनुचन्द्राद्यं गगनं हृदयं शिवाम् ।
मारुतश्शिवमन्त्रोऽयं सप्तार्णशिवपूजने ॥

End:

इत्थं जपादिभिस्सिद्धे मन्त्रेऽस्मिन् धनसञ्चयैः ।
कुबेरसदृशो मन्त्री जायते धनवन्दितः ॥

Colophon:

इति प्रत्यङ्गिरायन्त्रं संपूर्णम् ॥

No. 7936. प्रत्याङ्गिरासूक्तप्रयोगः.

PRATYAṄGIRĀSŪKTAPRAYŌGAḤ.

Pages, 7. Lines, 16 on a page.

Begins on fol. 71*b* of the MS. described under No. 7739.

Complete.

On the details connected with the repetition of the Pratyaṅgirā hymn; at the end a few stanzas relating to the Pratyaṅgirā-yantra are added.

Beginning:

अस्य श्रीप्रत्याङ्गिरासूक्तमन्त्रस्य द्वात्रिंशदृचामनुष्टुप् छन्दः, अव ब्रह्मेत्येकपदा गायत्री, यो न इति त्रिष्टुप्, प्रत्यृचं कृत्या देवता, कालाग्निरुद्रस्य महादेवः कृत्या वा ।

End:

त्रिकोणमादौ संलिख्य तद्बाह्ये वर्तुलं लिखेत् ।
तस्मिन्नष्टदलं पद्मं तद्बाह्ये तु महीगृहम् ॥
मूलमन्त्रस्य वर्णानां चतुष्कं प्रतिपत्रके ।
तद्यन्त्रं धारयेद्धीमान् सर्वकर्मसु साधनम् ॥

ओं शान्तिश्शान्तिश्शान्तिः ॥

No. 7937. प्रत्याङ्गिरासूक्तप्रयोगः.

PRATYAṄGIRĀSŪKTAPRAYŌGAḤ.

Pages, 14. Lines, 7 on a page.

Begins on fol. 43*a* of the MS. described under No. 3491.

Incomplete.

Similar to the above.

Beginning:

यथा विद्युदग्निः रुद्रः पङ्क्तिः यथा प्रतिशुक्रेत्यादित्यस्तवः परमात्मानुष्टुप् यो नस्त्वो अरणो इति गायत्री . . . .

दन्तधावनमादौ तु स्ना(क्त्)त्वाचम्य यथाविधि ।
आपो हि ष्ठा हिरण्येति पवमानेति चात्मनः ॥

End:

कृत्यानुष्टुप्, असपत्नं पुनस्तं नः दानवः, अभय(यं)विष्णुर्गायत्री परि(रेहि)कृत्येमा उष्णिक् कश्यपो बृहती, अभ्यक्ताक्ता अथ वो वायुरनुष्टुप्, एवं त्वमग्निः कृत्यानुष्टुप् ब्रह्मा वसवः.

No. 7938. प्रत्यङ्गिरासूक्तव्याख्यानम्.

PRATYAṄGIRĀSŪKTAVYĀKHYĀNAM.

Pages, 14. Lines, 11 on a page.

Begins on fol. 25*a* of the MS. described under No. 4567.

Incomplete.

This is a commentary on the Pratyaṅgirāsūkta which consists of thirty Vedic Ṛks in praise of Pratyaṅgirā.

Beginning:

यां कल्पयन्ति = यां देवतां स्वभा(वा)दप्रेरितां परे कल्पयन्ति = अस्मद्बाधनव्यापारसमर्थां कुर्वन्ति जपहोमध्यानैरुत्पादयन्तीत्यर्थः ।

नोऽरयः शत्रवः । क्रूरामुग्रां शत्रुबाधनयोग्यामाकारेण । स्त्रियमिव तां ब्रह्मणापनिर्णुद्मः येनोत्पादितासि मज्जिघांसया तां ब्रह्म(णा) ब्रह्म वेदो ब्रह्म तपो ब्रह्म ज्ञानं च शाश्वतमिति प्रयोगात् वेदेन मन्त्रलक्षणेन निर्णुद्मः निकृष्येतोऽन्यत्र प्रेरयामः ।

End:

अस्यास्मद्रिपोः किमपि वस्तुजातं मोच्छिषः नोच्छोषयसि । द्वि-पदं द्विपद्वर्गं पुरुषानाय्यादि मनुष्यजातं मोत किञ्चिच्चतुष्पदम् । उत-शब्दः अपद्य किञ्चित् द्विचतुष्पादजातम्.

No. 7939. प्रपञ्चसारविवरणम्.
PRAPAÑCASĀRAVIVARAṆAM.

Pages, 212. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 6667.

Contains Paṭalas 1 to 22 and 24 to 35. Breaks off in the 36th Paṭala, and wants beginning and end for the 24th and 22nd Paṭalas, respectively.

This is a commentary on the Prapañcasāra, which is a work by Śaṅkarācārya dealing with Mantras, Yantras, Prayōgas, etc., occurring in the various Āgamas.

The subjects dealt with herein are given below : –

१. गर्भवासक्रमकथनम्.
२. वर्णनिष्पत्तिकथनम्.
३. ४. मन्त्राणां विश्वयोनित्वकथनम्.
५. ६. साङ्गोपाङ्गदीक्षा.
७. मातृकाविधानम्.
८. प्राणाग्निहोत्रादिकथनम्
९. त्रैपुरमन्त्रप्रशंसा.
१०. भुवनेश्वरीमन्त्रः.
११. द्वादशगुणितविधानम्.
१२. श्रीमन्त्रनिरूपणम्.
१३. क्रियाशक्तिप्रधानमन्त्रभेदः.
१४. दुर्गाविधानम्.
१५, १६. त्रिगुणात्मकसूर्यादिमन्त्रः.
१७. गणेशमन्त्रः.
१८. काममन्त्रः.
१९. मोक्षमन्त्रः.
२०. अष्टाक्षरविधिः.
२१. अष्टाक्षरविधानभेदः.
२२. द्वादशाक्षरविधानम्.
२४. वराहविधानम्.
२५. नृसिंहविधानम्.
२६. विष्णुपञ्जरविधिः.
२७. शैवविधानम्.
२८. दक्षिणोर्ध्ववक्त्रादिशैवमन्त्रः.
२९. दक्षिणोर्ध्ववक्त्रादिशैवमन्त्रः.
३०. गायत्रीविधानम्.
३१. आग्नेयमन्त्रः.
३२. लवणमन्त्रः.
३३. प्रणवशक्तिप्रासादयोगादिः

३४. नानाविधमन्त्रविशेषविधिः.

३५. प्राणप्रतिष्ठामन्त्रः.

३६. पुत्रोत्पत्तिकरप्रयोगविशेषः.

Beginning:

अवर्णविग्रहं देवं वर्णविग्रहवार्जितम्।
वर्णविग्रहवेत्तारं नमामि स्तौमि संश्रये ॥

इह खलु लोकानुग्रहैकरसतया कृतशरीरपरिग्रहो भगवान् शङ्कराचार्योऽपरोक्षीकृतपरदेवतात्मतत्त्वः परमां विभूतिकाष्ठां प्राप्तस्स्वयमेकाकी संपदा लज्जमानो दुःखी कृतजनकारुण्याक्रान्तमानसश्च संस्तदनुग्रहाय समस्तागमसारसङ्ग्रहप्रपञ्चागमसारसङ्ग्रहरूपं ग्रन्थश्चिकीर्षुरभिमतसकलप्रयोजनसिद्धये प्रथमतः परदेवतातत्त्वानुस्मरणमाशीर्लक्षणञ्च मङ्गलमाचरन् ग्रन्थादौ औपयिकं विषयादिकमप्यर्थात्सूचयति—अकचटतपयाद्यैरित्यादिना। शारदा वश्चेतसः परिशुद्धिं वितरत्वित्यन्वयः। चित्तादिसङ्घातव्यतिरिक्तायाश्शारदायास्सत्त्वे सिद्धे संभवतीयमाशीः।

*　　　*　　　*　　　*

Colophon:

इति प्रपञ्चसारविवरणे प्रथमः पटलः ॥

End:

अष्टदलगभुक्तौ साध्यादिकमालिख्य पाशाङ्कुशान्तां संवेष्टच याद्यष्टकमष्टदलेषु लिखित्वा अवशिष्टेन बहिस्संवेष्टच भूपुरद्वये पाशाङ्कुशौ लिखेदिति—यन्त्रविधिः।

Colophon:

इति श्रीप्रपञ्चसारविवरणे पञ्चत्रिंशत्पटलः ॥

उक्तमन्त्रानुष्ठानयोगपुत्रोत्पत्तिकरं प्रयोगविशेषं वक्तुमारभते—अथ सन्तानेति। न केवलं

*　　　*　　　*　　　*

तद्गुरुर्मातामहः तत्पितृद्वयं मातुःपितामहमातुःप्रपितामहलक्षणम् ।
एवं पितॄणां पक्षनवकं हुत्वा देवभागेन देवहोमः कर्तव्य इत्याह—
कलायुतैरिति ॥

No. 7940. प्रपञ्चसारसङ्ग्रहः.

PRAPAÑCASĀRASAṄGRAHAḤ.

Substance, palm-leaf. Size, 19 × $1\frac{5}{8}$ inches. Pages, 180. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

To the end of Śrīvidyāpañcadaśākṣarīnyāsavidhi.

Incomplete.

A work containing the essence of the Prapañcasāra of Śaṅkarācārya; by Girvāṇēndra, a disciple of Viśvēśvarasarasvatī who was a disciple of Amarēndrasarasvatī. It is stated by the author that the Mantras, Tantras and Yantras dealt with in Sanatkumārīya, Mantrakalpāntara, Mantrasārakramadīpikā, Śāradātilaka, Mantradēvatāprakāśikā, etc., have been included in this work, and that the composition is planned after the commentary called Satsampradāyasarvasva.

Beginning:

नत्वा श्रीशङ्कराचार्यममरेन्द्रयतीश्वरम् ।
कुर्वे प्रपञ्चसारस्य सारसङ्ग्रहमुत्तमम् ॥

तत्र प्रपञ्चसारे यद्यच्छङ्कराचार्यैरुक्तं मन्त्रयन्त्रप्रयोगादि तत्सर्वमपि सारभूतमेव तथापीदानीं मन्दप्रज्ञानां विस्तरशो ज्ञातुमनुष्ठातुञ्चाशक्यत्वादत्यन्तोपकारभूतत्वेन तत्सारतरन्तदल्पग्रन्थेनैव यथा सर्वमन्त्रयन्त्रतन्त्रसारग्रहणं स्यात् तथा सर्वतस्सारं गृहीत्वा मया सत्संप्रदायसर्वस्वाभिधव्याख्यानोक्तमार्गेण वक्ष्यते । तत्र पुनः प्रसङ्गात् तत्र तत्र मन्त्रकल्पान्तरे मन्त्रसारक्रमदीपिकासनत्कुमारीयशारदातिलकमन्त्रदेवताप्रकाशिकादौ यद्यन्मन्त्रतन्त्रयन्त्राद्युक्तं तदपि किञ्चित्किञ्चिद्वक्ष्यते ।

तत्र प्रपञ्चसारे प्रथमं तावत् क्षीराब्धौ शेषपर्यङ्कशायिनं महाविष्णुं प्रति ब्रह्मादिभिः त्रिभिः मूर्तिभिः स्वेषामुत्पत्त्यादिविषयः प्रश्नप्रकारः प्रथमे पटले निरूपितः ।

See under the next number for the end.

No. 7941. प्रपञ्चसारसङ्ग्रहः.
PRAPAÑCASĀRASAṄGRAHAḤ.

Substance, paper. Size, $12\frac{3}{8} \times 7\frac{3}{4}$ inches. Pages, 501. Lines, 24 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Prapañcasārasaṅgrahaśēṣa 251*b*, Sudarśanasaṁhitā 266*a*, Śaivasiddhāntarahasya 267*b*, Prapañcasārasaṅgrahasūcī 271*b*.

Complete.

Same subject as in the above.

See under the previous number for the beginning.

End :

रम्यमप्युज्ज्वलमपि मनसोऽपि समीप्सितम् ।
लोकविद्वेषणं वेषं न गृह्णीयात् कदाचन ॥
इत्याचारपरस्सम्यगाचार्यं सम्यगर्चयेत् ।
कृतकृत्यस्स वै शिष्यः परत्रेह च नन्दति ॥

Colophon :

इति श्रीप्रपञ्चसारसङ्ग्रहे द्वात्रिंशः पटलः ॥ समाप्तश्च ॥

No. 7942. प्रपञ्चसारसङ्ग्रहः.
PRAPAÑCASĀRASAṄGRAHAḤ.

Pages, 64. Lines, 19 on a page.

Begins on fol. 81*a* of the MS. described under No. 2886.

Incomplete.

Contains Paṭalas 24 to 32.

Same as the above.

No. 7943. प्रपञ्चसारसङ्ग्रहः.
PRAPAÑCASĀRASAṄGRAHAḤ.

Pages, 45. Lines, 21 on a page.

Begins on fol. 364*a* of the MS. described under No. 1800.

Incomplete.

Same as the above.

No. 7944. प्रपञ्चसारसङ्ग्रहशेषः.
PRAPAÑCASĀRASAṄGRAHAŚĒṢAḤ.

Pages, 14. Lines, 18 on a page.

Begins on fol. 122*b* of the MS. described under No. 2886, wherein this has been omitted to be shown in the list of other works.

Complete.

A supplement to the work entitled Prapañcasārasaṅgraha described above giving details of procedure regarding certain Mantras not dealt with in the Prapañcasārasaṅgraha.

Beginning:

अथ प्रपञ्चसारसङ्ग्रहोक्तमन्त्रप्रसङ्गात् अन्येऽपि केचिन्मन्त्रा लिख्यन्ते—

गृत्समद ऋषिः, त्रिष्टुप् छन्दः, रुद्रो देवता । मा त्वा रुद्र शुक्राधा मा नमोभिः इत्यृक् ज्वरशान्तिकृत् ।

End:

आकाशशशिभ्यां बिन्द्वर्धचन्द्राभ्यां संयुतं सिद्ध्यै इति स्वरूपम् । हृदयं नमः पदं ह्रीं सिद्ध्यै नम इति मन्त्रस्वरूपम् ॥

इत्यक्षमालाजपविधिः ॥

इति प्रपञ्चसारसङ्ग्रहमन्त्रप्रसङ्गात् लिखितमन्त्राः समाप्ताः ॥

Colophon:

इति श्रीमदमरेन्द्रसरस्वतीशिष्यश्रीविश्वेश्वरसरस्वत्याः प्रियशिष्येण गीर्वाणेन्द्रसरस्वत्या सङ्गृहीतः प्रपञ्चसारसङ्ग्रहः समाप्तः ॥

शङ्करश्चामरेन्द्रश्च विश्वेश्वर इति त्रयम् ।
पुनातु मामकीं बुद्धिमाचार्यात्कृ(र्यकृ)पया मुदा ॥
अमरेन्द्रयतेः शिष्यो गीर्वाणेन्द्रस्य योगिनः ।
तस्य विश्वेश्वरः शिष्यो गीर्वाणेन्द्रोऽहमस्य तु ॥
शिष्यः प्रपञ्चसारस्य व्यदधां सारसङ्ग्रहम् ।
एनं दृष्ट्वाखिलास्सन्तः सन्तुष्टाः सन्तु सन्ततम् ॥

No. **7945.** **प्रपञ्चसारसङ्ग्रहशेषः.**

PRAPAÑCASĀRASAṄGRAHAŚĒṢAḤ.

Pages, 28. Lines, 24 on a page.

Begins on fol. 251*b* of the MS. described under No. 7941.

Incomplete.

Same as the above.

No. **7946.** **प्रपञ्चसारसङ्ग्रहसूची.**

PRAPAÑCASĀRASAṄGRAHASŪCĪ.

Pages, 6. Lines, 26 on a page.

Begins on fol. 271*b* of the MS. described under No. 7941.

Complete.

Gives the contents of the Prapañcasārasaṅgraha.

Beginning:

ग्रन्थक्रमनिर्णयः । मन्त्रशब्दार्थविवरणम् । दीक्षाफलप्रशंसा । ग्रन्थकर्तृप्रतिज्ञा । गुरुणा शिष्यस्योपदेशक्रमः । पद्मासनस्वस्तिकासन-विधिः ।

End:

सन्तानयागविधिः । शङ्करनारायणविधानम् । वन्ध्यात्रयनिवृत्ति-करणम् । रेणुकामन्त्रविधिः । गुरुशिष्यलक्षणम् ।

Colophon:

समाप्तम् ॥

No. 7947. प्रयोगरत्नावलिः.
PRAYŌGARATNĀVALIḤ.

Pages, 49. Lines, 24 on a page.

Begins on fol. 61*b* of the MS. described under No. 2961.

On the rites to be observed, the places to be resorted to for repeating Mantras, the diet to be used and such other details as are considered necessary for securing the efficacy of Mantras.

Contains the following Paṭalas :—

१. परिभाषा.
२. संस्कारलक्षणम्.
३. त्रिविधगन्धाष्टकविधिः.
४. छिन्नादिलक्षणम्.
५. पल्लवप्रकरणम्.
६. सिद्धसाध्यसिद्धारिकथनम्.
७. ग्रथितादिभेदनिरूपणम्.
८. षट्कर्मविधिः.
९. मालालक्षणम्.
१०. अङ्गुल्यादिमालाफलम्.
११. क्षेत्रादिलक्षणम्.
१२. आहारनियमः.
१३. गुरुशिष्यलक्षणम्.
१४. सप्तोपायकथनम्.
१५. अजपामन्त्रकथनम्.
१६. होमविधिः.

Beginning:

वटमूलनिवासस्थं दक्षिणामूर्तिमीश्वरम् ।
साङ्ख्यं सदाशिवं दत्तात्रेयं येगिनमव्ययम् ॥

* * * *

पार्वत्युवाच—

विश्वेश्वर विरूपाक्ष नीलकण्ठ सदाशिव ।
जपस्थानानि वद मे सर्वशास्त्रविशारद ॥

स्त्रीचापल्यादहं देव पृच्छामि त्वां कृपाकर ।
वात्सल्येन च वक्तव्यं मयि पाशुपतार्चित ॥

ईश्वर उवाच—

सिद्धक्षेत्रं समाश्रित्य कूर्मचक्रं निरीक्षयेत् ।
विना कूर्मेण चक्रेण न भवेत्सिद्धिरेव च ॥

ईशाग्निरक्षोवायव्यदिक्षु रेखाः समालिखेत् ।
कुबेरेन्द्रयमास्वेवं वारुणान्तं समालिखेत् ॥
ईशकोणं विहायेन्द्रकोणमारभ्य तत्र वै ।
स्वरौ द्वौ द्वौ समालिख्य सप्त वर्गान्समालिखेत् ॥

* * * *

Colophon:

इति प्रयोगरत्नावल्यां प्रति(परि)भाषाख्यः प्रथमः पटलः ॥

End:

अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात्कारुण्यभावेन रक्ष रक्ष महेश्वरि ॥

इति नमस्कृत्य ममाग्न इत्यनुवाकसर्वोपस्थानार्थे नमस्कारं कृत्वा चिदग्निदेवतामात्मन्युद्वासयामि नम इत्युद्वास्य तद्भस्म तिलकं कुर्यात् । तस्मिन् होमखण्डे द्वाषष्टिमन्त्राः ॥

Colophon:

इति प्रयोगरत्नावल्यां होमविधिर्नाम षोडशः पटलः ॥

No. 7948. प्राणप्रतिष्ठाकल्पः.

PRĀṆAPRATIṢṬHĀKALPAḤ.

Pages, 15. Lines, 5 on a page.

Begins on fol. 8*b* of the MS. described under No. 6414, and not on fol. 98*a* as shown therein

Complete.

On the details connected with the ceremonial of consecrating and pouring life into images of deities by the repetition of certain Mantras.

Beginning:

प्राणप्रतिष्ठा—

प्राणानायम्य एवङ्गुणविशेषणविशिष्टायां शुभतिथौ प्रतिष्ठाकर्तुरायुरारोग्यैश्वर्याभिवृद्ध्यर्थं . . . . . प्राणप्रतिष्ठां करिष्ये—

इति सङ्कल्प्य प्राणानां ग्रन्थिरसीति उत्तिष्ठ ब्रह्मणस्पते—इति मन्त्रान् जपित्वा देवस्य तैलाभ्यङ्गं कृत्वा पञ्चगव्यैरभिषिच्य ।

End:

आचार्यो ब्रह्म ऋत्विजः यथाशक्ति दक्षिणावस्त्रादिभिरलङ्कृत्य दीनान्धकृपणेभ्यो यथाशक्ति दत्वा ब्राह्मणभोजनं च दद्यात् । स्वयं सकुवल(टु)म्बस्सन् ब्राह्मणैराशीर्भिर्मोदमानस्सन् सुखं वसेत् ॥

Colophon:

इति प्राणप्रतिष्ठाकल्पः ॥

No. 7949. बगलाकल्पः.

BAGALĀKALPAḤ.

Pages, 134. Lines, 18 on a page.

Begins on fol. 1*a* of the MS. described under No. 2444.

Complete 36 Paṭalas.

Contains the details connected with the worship of the deity known as Bagalā and also with the repetition of the Mantras addressed that deity.

Contains the following Paṭalas :—

१. शत्रुसंहारकविद्यानिरूपणम्.
२. दीक्षाविधिः.
३. अभिषेकविधिः.
४. मन्त्रसन्ध्याविधिः.
५. एकाक्षरीबगलाकथनम्.
६. कुण्डलक्षणम्.
७. मन्त्रोद्धारः.
८. षट्त्रिंशदक्षरीप्रयोगः.
९. यन्त्रोद्धारकथनम्.
१०. यन्त्रप्रयोगः.
११. तर्पणप्रयोगः.
१२. बगलागायत्री.
१३. पूजाविधिः.
१४. अर्चनविधिः.
१५. पञ्चास्त्रस्तम्भनविद्या.
१६. पञ्चास्त्रकथनम्.
१७. शताक्षरीप्रयोगः.
१८. होमविधिः.

१९. शतवर्ममन्त्रप्रयोगः.
२०. मन्त्रोद्धारः.
२१. एकाक्षरीबगलाजपः.
२२. बगलास्त्रविद्या.
२३. बगलास्त्रमन्त्रप्रयोगः.
२४. बगलामन्त्रमालिकालक्षणम्.
२५. बगलाचतुरक्षरी.
२६. बगलाचतुरक्षरीप्रयोगः.
२७. बगलाहोमप्रयोगः.
२८. स्तम्भनविद्याप्रयोगः.
२९. बगलाहृदयमन्त्रयन्त्राणि.
३०. बगलाष्टाक्षरीमन्त्रः.
३१. बगलाष्टाक्षरीप्रयोगः.
३२. बगलोपसंहारविद्या.
३३. बगलोपसंहारयन्त्रः.
३४. बगलान्यासविधिः.
३५. चम्पकन्यासः.
३६. मन्त्रसंस्क्रिया.

Beginning:

गम्भीरां सुमदोन्मत्तां स्वर्णकान्तिसमप्रभाम् ।
चतुर्भुजां त्रिनयनां कमलासनसंस्थिताम् ॥

* * * *

पीतासनसमारूढः पीतध्यानपरायणः ।
दशांशेन कृतो होमः पीतद्रव्यसुशोभितैः ॥

कुण्डं सलक्षणं कृत्वा मेखलात्रयशोभितम् ।
योनिं वितस्तिमात्रेण षट्कर्माणि च साधयेत् ॥

* * * *

मध्येसुधाब्धि मणिमण्टपरत्नवेद्यां
सिंहासनोपरिगतां परिपीतवर्णाम् ।
पीताम्बराभरणमाल्यविभूषिताङ्गीं
देवीं नमामि धृतमुद्गरवैरिजिह्वाम् ॥

कैलासशिखरासीनं गौर्या वामाङ्कसंस्थितम् ।
भारतीपतिवाल्मीकिशेषसन्नुतमिष्टदम् ॥

* * * *

ईश्वर उवाच—

साधु साधु महाप्राज्ञ क्रौञ्चच्छेदनकोविद ।
ब्रह्मप्राणं विना शत्रोः संहारं संभवेत्कलौ ॥
तद्विद्याञ्च प्रयच्छामि त्रिषु लोकेषु दुर्लभाम् ।
पुत्रो देयः शिरो देयं न क्ष(दे)यं यस्य कस्य चित् ॥
ब्रह्मास्त्रस्तम्भिनी विद्या स्तब्धमायामनुस्तथा ।
प्रवृत्तिरोधिनी विद्या बगळा च कुमारक ॥
मन्त्रजीवनविद्या च प्राणप्रज्ञापहारिका ।
षट्कर्माधारविद्या च एते पर्यायवाचकाः ॥
षट्प्रयोगाश्रिता विद्या षड्विद्यागमभूषिता ।
स्तम्भनेन विना शान्तिर्वश्यञ्चैव तु तद्विना ॥

* * * *

Colophon:

इति षड्विद्यागमे साङ्ख्यायनतन्त्रे प्रथमपटलः ॥

End:

संस्कारदशसङ्केताः सर्वमन्त्रेषु गोपिताः ।
विकृता सम्प्रदायेन मन्त्रिणां सिद्धिदायिनी ॥

Colophon:

इति षड्विद्यागमे साङ्ख्यायनतन्त्रे षट्त्रिंश[ति]ः पटलः ॥

* * * *

ह्रीं ऐं ग्लैं एं श्रीं क्लीं ह्रीं एं ह्रीं स्वाहा॥

एतच्छताक्षरी ॥

Colophon:

इति बगलाकल्पं सम्पूर्णम् ॥

No. 7958. बगलाकल्पः.
BAGALĀKALPAḤ.

Pages, 8. Lines, 9 on a page.

Begins on fol. 222*b* of the MS. described under No. 124.

Incomplete.

Similar to the above.

Beginning:

अम्बां पीताम्बराढ्यामरुणकुसुमगन्धानुलेपां त्रिनेत्रां
गम्भीरां शत्रुजिह्वां समकुचयुगळां चारुबिम्बाधरोष्ठीम् ।
. . द्विजं (बिभ्राणां) पानपात्रं धृतशरधनुषीं वक्त्रगर्वाधिरूढां
देवीं संस्तम्भरूपामविरळवसनां मण्डिताङ्गां नमामि ॥
नमस्ते वृषभारूढ नमः पन्नगभूषण ।
बगळास्त्रं महामन्त्रं प्रयोगान् वद शङ्कर ॥

End:

सर्वविद्याकर्षिणीं च सर्वप्रज्ञापहारिणीम् ।
भजेऽहश्चास्त्रबगळां सर्वाकर्षणकर्मसु ॥

मनुः—ह्रीं लुं ग्लौं ह्रीं बगळामुखि मम शत्रून् ग्रस ग्रस खादि खादि भक्ष भक्ष शोणितं पिब पिबं बगळामुखि ह्रीं ग्लौं लुं ह्रीं लुं लुं.

No. 7959. बगलाचक्रोद्धारः.
BAGALĀCAKRŌDDHĀRAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 136*b* of the MS. described under No. 673.

Complete.

Gives the method of drawing the Cakra relating to the Mantra and the manner of arranging the Bījākṣaras in the Cakra.

Beginning:

बगळोद्धारः—

त्रिकोणमृतुकोणञ्च वसुकोणं ततः परम् ।
तत्र षोडशसंयुक्तं चतुरश्रं ततः परम् ॥

त्रिकोणमध्ये ह्रींकारं तद्बाह्ये प्रणवं लिखेत् ।
षट्कोणे बादिसान्तश्च वादिभान्तश्च मस्तके ॥

End:

द्रावणं बोधनश्चैव वश्यं ताडनपीडनम् ।
शोषणं दाहनश्चैव सप्तोपायाः प्रकीर्तिताः ॥

No. 7960. बगलाचक्रोद्धारः.

BAGALĀCAKRŌDDHĀRAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 35*a* of the MS. described under No. 5987.

Complete.

Same as the above.

No. 7961. बगलापूजाक्रमः.

BAGALĀPŪJĀKRAMAḤ.

Pages, 14. Lines, 16 on a page.

Begins on fol. 96*a* of the MS. described under No. 7739.

Complete.

Deals with the manner of propitiating Bagalā by worshipping the Yantra relating to Bagalāmantra.

Beginning:

पूजार्थं यागमण्टपमाविशेत् । अथ द्वारपूजा--

धात्रे नमः, गङ्गायै नमः, यमुनायै नमः, द्वारश्रियै नमः, देव्यै नमः—इति पुष्पाक्षतानभ्यर्च्य . . . .

बिन्दुत्रिकोणषट्कोणमष्टपत्रं तु षोडशम् ।
वृत्तं भूपुरसंयुक्तं बगलायन्त्रं प्रशस्यते ॥

End:

ललाटे तिलकं धृत्वा पात्रादिकं सर्वमाघ्राय विमृज्य नाहं कर्ता इत्युक्त्वा सर्वकुमारीः ब्राह्मणांश्चोपचारेण परितोष्य ॥

Colophon:

इति नारदीये बगलापूजा सम्पूर्णा ॥

No. **7962.** बगलाप्रयोगः.

BAGALĀPRAYŌGAḤ.

Pages, 5. Lines, 16 on a page.

Begins on fol. 79*a* of the MS. described under No. 7739.

Complete.

Deals with the details connected with the repetition of the Bagalāmantra.

Beginning:

एवङ्गुण–तिथौ मम सर्वाभीष्टफलसिद्ध्यर्थं श्रीब्रह्मास्त्रबगलापरमेश्वर्यम्बादेवतामुद्दिश्य श्रीबगलापरमेश्वरीदेवताप्रीत्यर्थं बगलापरमेश्वर्यम्बामन्त्रानुष्ठानमहं करिष्ये ।

End:

पुनर्न्यासं कृत्वा आवाहनादिषण्मुद्रा दर्शनीयाः । पूर्वोक्तं पूजयेत् । ततष्षोडशोपचारपूजां कृत्वा समुद्वासयेत् ॥

No. **7963.** बगलामन्त्रकल्पः.

BAGALĀMANTRAKALPAḤ.

Pages, 23. Lines, 16 on a page.

Begins on fol. 83*b* of the MS. described under No. 7739.

Complete.

Describes the procedure to be adopted in the repetition of the Bagalâmantra.

Beginning:

श्रृणु पार्वति वक्ष्यामि उपचारमनून् क्रमात् ।
बगलामन्त्रसिद्धिस्तु षोडशैरुपचारकैः ॥

तप्तकाञ्चनसङ्काशां स्वर्णभूषणभूषिताम् ।
चतुर्भुजां पीतवस्त्रां पीतचन्द्रार्धशेखराम् ॥

End:

मूलेन यथाशक्ति जपेत् । पुनर्न्यासध्यानं कुर्यात् ।

*   *   *   *

विद्यालक्ष्मीस्सर्वसौभाग्यलक्ष्मीः पुत्रान् सम्यग्राज्यामिष्टार्थसिद्धिम् ।
मानं श्रेयो वश्यमारोग्यवाचं प्राप्तं सर्वं भूतलं साधकेन ॥

Colophon:

श्रीबगलास्तवस्सम्पूर्णः ॥

No. **7964.** बडबानलभैरवमन्त्रः.

BAḌABĀNALABHAIRAVAMANTRAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 29*a* of the MS. described under No. 2854.

Complete.

This is the 64th Adhyāya of Ākāśabhairavakalpa. Gives the details connected with the Baḍabānalabhairavamantra.

Beginning:

वदामि ते महादेवि बडबानलभैरवम् ।
सर्वलोकैकसंहारकारणं दारुणं परम् ॥

अस्य देवस्य मन्त्रस्य ऋषिर्ब्रह्माथ उच्यते ।
छन्दस्तु गायत्री देवो बडबानलभैरवः ॥

प्रं बीजं च ततस्स्वाहा शक्तिर्योगस्तु वाहने ।
प्रामित्यादिकराङ्गस्य न्यासं ध्यानमनन्तरम् ॥

End:

यमुद्दिश्य जपेन्मन्त्री सहस्रं मासाननः (यतमानसः)।
त्रिरात्रं निशितं देवो निहन्त्याशु न संशयः ॥

Colophon:

इति आकाशभैरवकल्पे बडबानलभैरवमन्त्रो नाम चतुष्षष्टितमोऽध्यायः ॥

No. **7965.** बालाचक्रपूजाक्रमः.
BĀLĀCAKRAPŪJĀKRAMAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 132*a* of the MS. described under No. 673.

Complete as found in the Bhairavayāmala.

On the manner of conducting the worship of the Cakra dedicated to Bālā, one of the manifestations of Śakti.

Beginning:

हेतवे जगतामेव संसारार्णवसेतवे ।
प्रभवे सर्वविद्यानां दक्षिणामूर्तये नमः ॥

सुधासागरमध्ये तु कल्पवृक्षवनान्तरे ।
मणिद्वीपे महासौख्ये चिन्तामणिगृहाङ्गणे ॥

इन्द्रादिलोकपालैश्च परिवारैश्च सेविताम् ।
सरस्वत्या च लक्ष्म्या च सिंहासनवरे स्थिते ॥

बिन्दुत्रिकोणषट्कोणं वृत्तमष्टदलं युगम् ।
भूपुरद्वयसंयुक्तं चिन्मयं चक्रमाश्रये ॥

End:

एता दलाग्रे नित्यान्ताः पूजनीया यथाक्रमम् ॥
इन्द्रादिलोकपालांश्च पूजयेद्भूपुरेषु च ॥

एवं क्रमेण पूजान्तां देवीं बालां च सर्वदा ।
नित्यं यः पूजयेद्भक्त्या स विद्वा(न्) नात्र संशयः ॥

Colophon:

इति भैरवयामळे महेश्वरसंवादे बालास्तवस्सम्पूर्णः ॥

No. 7966. बालग्रहरावणीयशास्त्रम्.

BĀLAGRAHARĀVAṆĪYAŚĀSTRAM.

Pages, 4. Lines, 9 on a page.

Begins on fol. 92*a* of the MS. described under No. 21.

Complete.

On the Mantra which is considered to be efficacious in removing from children the effects of evil Grahas or spirits. Gives also the manner of propitiating the Graha or spirit which is supposed to annoy children during the first 11 days, months or years after birth. Three pages before the beginning of this work contain details relating to the Yantra connected with this Mantra.

Beginning:

वरप्रसादं गोकर्णे लब्ध्वा रावणसूरिणः ।
कृतः कुमारतन्त्रोऽयं तत्प्रवक्ष्ये समासतः ॥

प्रथमादिवसे मासे वर्षे वा सुनन्दना नाम मातिरि (?) बालान् गृह्णाति । तया गृहीतः प्रथमं ज्वरस्स्यात् । गात्रभेदप्रकोपं वा अशनं च न गृह्णाति स्तनद्वेषं करोति । बलिं तस्य प्रवक्ष्यामि येन मुञ्चते मातरिः ।

End:

ओं नमो नारायणाय प्रज्वालितहस्ताय हन हन रोदय रोदय मव मव मर्दय मर्दय पातय पातय प्रें प्रें हन हन दुष्टसर्वान् नाशय मातरि हुं फट् स्वाहा—इति बालमन्त्रः । धूपादि पूर्ववत् ॥

Colophon:

इति रावणीयं बालपुस्तकं सम्पूर्णम् ॥

No. 7967. बालामन्त्रोद्धारः.

BĀLĀMANTRODDHĀRAḤ.

Pages, 2. Lines, 21 on a page.

Begins on fol. 126*b* of the MS. described under No. 2378.

Complete.

The 17th Kalpa of Tripurāsiddhānta.

Gives the arrangement of the syllables constituting the Bālāmantra.

Beginning :

श्रीदक्षिणामूर्तिरुवाच—

अङ्गमन्त्रं प्रवक्ष्यामि बालाया आद्यमिष्टदम् ।
यस्य श्रवणमात्रेण अश्वमेधफलं लभेत् ॥

* * * *

अस्य मन्त्रस्य देवः श्रीदक्षिणामूर्तिरीश्वरः ।
छन्दः पङ्क्तिरिति प्राहुः देवी त्रिपुरसुन्दरी ॥

End :

एवं ध्यात्वा जपेन्मन्त्रं त्रिलक्षं पुरतो नरः ।
दशांशहवनं कुर्यात्तद्दशांशन्तु तर्पयेत् ॥
एवं सिद्धस्य मन्त्रस्य प्रयोगान् शृणु पार्वति ।
षट्सहस्रं जपेन्नित्यं मन्त्रमेकाग्रमानसः ॥

* * * *

सर्वान् कामानवाप्नोति त्रैलोक्येनापि दुर्लभान् ॥

Colophon :

इति महात्रिपुरासिद्धान्ते बालामन्त्रप्रयोगकथनं नाम सप्तदशः कल्पः ॥

No. **7968.** बालामन्त्रोद्धारः.

BĀLĀMANTRŌDDHĀRAḤ.

Page, 1. Lines, 14 on a page.

Begins on fol. 103*b* of the MS. described under No. 5673.

Forms the 17th Kalpa of Tripurāsiddhānta. Incomplete.

Same as the above.

No. 7969. बीजकोशः.

BĪJAKŌŚAḤ.

Pages, 11. Lines, 29 on a page.

Begins on fol. 48*b* of the MS. described under No. 5482.

Forms the 5th Paṭala of Mantrakōśa, a work composed by Dakṣiṇāmūrti.

Complete.

Gives the Bījākṣaras relating to the several deities and also the names of the deities connected with the various Mātṛkāvarṇas and Bījākṣaras.

Beginning:

प्रणम्याखिलभूषाढ्यं शिवयालिङ्गितं शिवम् ।
नानाग्रन्थान् विलोक्याहं बीजकोशं तनोमि च ॥

भिन्नारहस्ये—

लक्ष्मीः पद्मा हरिणाक्षी सरोरुहनिवासिनी ।
कमला रुक्मिणी चैव नारायणप्रियापि च ॥
लक्ष्मीबीजानि सप्तैवं कृत्रिमान्यव(प)राणि च ।

इति लक्ष्मीबीजोद्धारः । ह्रीम् ।

* * * *

अथ वर्णानां बीजोद्धारः त्रिपुरातिलके—

आत्मबीजमकारं च स्वान्तं हृद्बीजमेव च ।
मानसं च मनोजं वै पैतामहमिति स्मृतम् ॥

End:

वर्णानां देवदेवेशि कोशं प्रोक्तं मया शिवे ।
नानायन्त्रयुतं देवि सर्वागम (समा)श्रितम् ॥

Colophon:

इति दक्षिणामूर्तिविरचिते मन्त्रकोशे वर्णकोशाख्यं नाम पञ्चमपटलः ॥

* * * *

शारदापटले ग्रन्थे त्रैलोक्यप्रथिते शिवे ।
ह्रस्वबीजं सामबीजं शिखरं पुष्करं तथा ॥

No. 7970. बीजकोशः.
BĪJAKŌŚAḤ.

Pages, 8. Lines, 8 on a page.

Begins on fol. 11*a* of the MS. described under No. 5854.

Complete.

Same as the above.

No. 7971. बीजकोशः.
BĪJAKŌŚAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 227*a* of the MS. described under No. 124.

Complete.

Similar to the above.

Beginning:

अकारं कूर्मबिजं तु आकारं पाशबीजकम् ।
इकारं मायाबीजं तु महामाया ईकारकम ॥
उकारं फलबीजं तु ऊकारोच्चाटनं भवेत् ।
एकारं बलश्रीबीजमैकारं पुरुषबीजकम् ॥

End:

संहारं तु सकारं च हकारं शिवबीजकम् ।
शकारं शक्तिबीजं तु क्षकारं क्षिप्रबीजकम् ॥

No. 7972. बीजकोशः.
BĪJAKŌŚAḤ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 28*a* of the MS. described under No. 5864, wherein this is included in Bījanighaṇṭu 23*a* mentioned in the list of other works given therein.

Complete.

Similar to the above.

Beginning:

ओं श्रीं ह्रीं क्रों आं ह्रौं ह्रं ह्रां . . . .

ओं ह्रीं श्रीं—ओं प्रणवं, श्रीं लक्ष्मीबीजं, ह्रीं मायाबीजं, भुवनेश्वरीबीजं, लक्ष्मीबीजं, क्रों अङ्कुशबीजम् ।

End:

क्षकारं क्षेत्रबीजं च वृक्षबीजं नृसिंहकम् ।
अकारादिक्षकारान्तं समासः(सात्) परिकीर्तितः ॥

No. 7973. बीजनिघण्टुः.
BĪJANIGHAṆṬUḤ.

Substance, paper. Size, 8 × 6⅜ inches. Pages, 12. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 7*a*. The other works herein are Subhagōdaya 1*a*, Āmnāyastōtra 16*a*.

Paṭalas 1 to 3 complete, 4th incomplete.

Gives the characteristics of the Bījākṣaras of the various Mantras, and the effects of repeating those Mantras with the addition of the Bījākṣaras, etc. In the colophon, this work is mentioned as Prayōgaratnākara.

Contains the following Paṭalas :—

१. तत्तन्मन्त्रबीजस्वरूपफलशक्तिः
२. तत्तद्वर्णानां बीजत्वकथनम्.
३. तत्तन्मन्त्रबजिदेवतारूपशक्तिकथनम्.
४. तत्तन्मन्त्रबीजानामङ्गत्वोक्तिः.

Beginning:

वान्तं यान्तयुत्तं बिन्दुवामनेत्रेण संयुतम् ।
श्रीबीजमिति तत्प्रोक्तं सर्वकर्मफलप्रदम् ॥
श्रीं श्रीं श्रीं—सर्वकर्मफलप्रदमेतत् ।
ककारं वादिसंयुक्तं महामायासमान्वितम् ।
बिन्दुना सहितं देवि बीजं कन्दर्पमुच्यते ॥

मादनं बीजमेतद्धि कृष्णं मोहनमन्त्रकम् । क्लीं क्लीं क्लीं ।

* * * *

Colophon:

इति प्रयोगरत्नाकरे प्रथमः पटलः ॥

End:

इति प्रयोगरत्नाकरे तृतीयः पटलः ॥

सं मेदः, हं प्राणः, ळं जीवः दुग्धवर्णः क्षं शुक्लस्थलम्—इत्यादिबीजानि । कोचित्—

* * * *

ओ औ पादौ ऌॡ कर्णौ इई नेत्रे ऋॠ भुजौ ।
एऐ देह इति प्रोक्तो यन्त्रस्याङ्गानि वै क्रमात् ॥

No. **7974.** बीजनिघण्टुः.

BĪJANIGHAṆṬUḤ.

Pages, 5. Lines, 29 on a page.

Begins on fol. 53*b* of the MS. described under No. 5482, wherein this has been induded in Bījakōśa 48*b*, shown among the other works therein.

Complete.

Similar to the above.

Beginning:

समस्तबीजप्रणवस्य कारणं नमामि देवं प्रणवान्तरास्थितम् ।
अवर्णसंभूतविवर्णवर्णगं स्वशक्तिसंक्षोभकरं परं हरिम् ॥

अथातस्सम्प्रवक्ष्यामि वर्णभेदविधिं परम् ।
मन्त्राणामुद्भवं चैव वर्णानां च समुद्भवम् ॥

अकारादि क्षकारान्तं वेत्ति(वित्त) पञ्चाशदक्षरम् ।
एते वर्णाः प्रशस्यन्ते कामितार्थप्रदायकाः ॥

End:

लकारमात्मतत्त्वं स्याद्रक्ताभं च सुखप्रदम् ।
विद्यातत्त्वं क्षकारं स्यात् क्षीराभं च सुखप्रदम ॥

इत्येते अधिदेवाश्च फलं वर्णक्रमेण तु ।
अकारादि क्षकारान्तं वर्णा एवं प्रकीर्तिताः ॥

Colophon :

इति बीजकोशस्समाप्तः ॥

No. **7975.** बीजनिघण्टुः.
BĪJANIGHAṆṬUḤ.

Pages, 2. Lines, 10 on a page.

Begins on fol. 227*a* of the MS. described under No. 124.

Incomplete.

Same as the above.

No. **7976.** बीजनिघण्टुः.
BĪJANIGHAṆṬUḤ.

Pages, 4. Lines, 8 on a page.

Begins on fol. 9*a* of the MS. described under No. 5584.

Complete.

Same as the above.

No. **7977.** बीजनिघण्टुः.
BĪJANIGHAṆṬUḤ.

Pages, 2. Lines, 19 on a page.

Begins on fol. 43*a* of the MS. described under No. 2886, wherein this has been omitted to be shown among the other works.

Complete.

Similar to the above.

Beginning :

अकारं ब्रह्मदैवत्यं श्वेतं सर्ववशङ्करम् ।
सर्वज्ञत्वं मनोज्ञत्वं कामरूपत्वमम्बिके ॥
आकारं तु परा शक्तिः श्वेतमाकर्षसिद्धितम् ।
इच्छासिद्धिस्स्वा(भे)स्ससिद्धिः रससिद्धिर्वरानने ॥

End :

चूडामन्त्रयुतं मन्त्वं यो जपेदेवमम्बिके ।
सर्गादिपञ्चकार्याणां कर्ता भवति निश्चयः ॥

Colophon :

इत्याकाशभैरवकल्पे ब्राह्मीमन्त्रं नाम षट्षष्टितमोऽध्यायः ॥

No. 7984. भद्रकालीमन्त्रकल्पः.

BHADRAKĀLĪMANTRAKALPAḤ.

Pages, 3. Lines, 17 on a page.

Begins on fol. 82*a* of the MS. described under No. 5574.

Complete.

This is the 28th Adhyāya of Ākāśabhairavakalpa. The repetition of this Mantra is supposed to enable one to enjoy all worldly happiness and to become merged after death in Śiva.

Beginning :

भद्रकाल्यास्तु मन्त्रस्य सद्योजात ऋषिः स्मृतः ।
ततस्तु जगती छन्दो भद्रकाली तु देवता ॥
ह्रीङ्कारं बीजमित्युक्तं स्वाहा शक्तिरतः परम् ।
मोक्षे च विविधे कार्ये विनियोगो वरानने ॥

End :

अनु भुक्त्वा महाभोगान् अप्रमेयाननर्गलान् ।
बान्धवैस्सह देहान्ते भर्गसायुज्यमाप्नुयात् ॥

Colophon :

इति श्रीआकाशभैरवकल्पे शरभसाल्वीये भद्रकाळीप्रयोगविधिर्नाम अष्टाविंशोऽध्यायः ॥

No. 7985. भुवनेश्वरीकच्छपुटम्.

BHUVANĒŚVARĪKACCHAPUṬAM.

Pages, 77. Lines, 20 on a page.

Begins on fol. 65*a* of the MS. described under No. 7593.

Paṭalas 1 to 10 complete, 11th incomplete.

Deals with the Bhuvanēśvarīmantra, its Yantra, Cakra, etc. This Mantra is believed to have the power to subjugate one's enemies or to annoy them in various ways.

Contains the following Paṭalas :—

१. ध्रुवाध्रुवविलेखनम्.
२. वश्यमोहनविवरणम्.
३. स्तम्भनाक्रियाविवरणम्.
४. उच्चाटनाक्रियाविवरणम्.
५. आकर्षणाक्रियाविवरणम्.
६. विद्वेषणाक्रियाविवरणम्.
७. मारणक्रियाविवरणम्.
८. यन्त्राक्रियाबिवरणम्.
९. यन्त्रन्यायविवरणम्.
१०. भुवनेश्वरीचक्रम्.
११. लेखनक्रमः.

Beginning :

श्रृणु श्रीभुवनेश्वर्याः पुरुषार्थफलप्रदम् ।
करुणापूर्णकल्लोललहरीरूपपेशलम् ॥
महत्कच्छपुटं शास्त्रं दृष्टं प्रत्यक्षमद्भुतम् ।
महाराज्ञपिदाम्भोजध्यानामृतानिषेविणाम् ॥
सद्य एव समस्तार्थफलदं स्मरणादपि ।
यद्यत्कामफलं लोके मानुषे तस्य तस्य हि ॥
कर्माणि सन्ति रत्नानि रत्नानि च महार्णवे ।
संप्रदायविशेषज्ञैः कर्तव्यान्यनपायवत् ॥
विख्याता त्रिविधं लोके यन्त्रमन्त्रौषधात्मकम् ।
वदामि प्रथमं देवि यन्त्रं कक्षपुटं तव ॥
मन्त्रदिक्कालहोरादिकर्माष्टकविशेषता ।
वश्यश्च मोहनश्चैव स्तम्भनोच्चाटने तथा ॥

* * * *

Colophon :

इति भुवनाधिपत्याः कच्छपुटशास्त्रे ध्रुवाध्रुवविलेखनं नाम प्रथमः पटलः समाप्तः ॥

End:

इति श्रीभुवनाधिपत्याः कक्षपुटशास्त्रे यन्त्रन्यायविवरणं नाम नवमः पटलः ॥

बिन्दुनादसमायुक्तं गुह्याम्बाबीजमुच्यते ।
पञ्चस्वरयुतं सै(चैव) गुरुबीजं प्रकीर्तितम् ॥
सा तं(न्तं) बिन्दुयुतं पञ्चमस्वरयुतं विद्वेषणमुदाहृतम् ।
विसर्गान्तं सादियुतं हुताशनसमान्वितम् ॥
मनुस्वरं बिन्दुयुतं नारासिंहाभिधानकम् ।
यान्तं पाशयुतं बिन्दुं रामबीजं प्रकीर्तितम् ॥

No. **7986.** भुवनेश्वरीकच्छपुटम्.
BHUVANĒŚVARĪKACCHAPUṬAM.

Pages, 8. Lines, 7 on a page.

Begins on fol. 118*a* of the MS. described under No. 54!7.

Complete.

Similar to the above.

Beginning:

राज्यं वीरो बलिर्यज्वा योगी गावो ययो(यू)रुरुः ।
एकोऽप्यष्टौ ततः स्थानेष्वेतेषु संलिखेत् ॥
आद्येन लक्ष्यते वीथीरुत्तरेण तथा गृहम् ।
ध्रुवाष्टकमिदं चक्रं समं सर्वेषु कर्मसु ॥
* * *
कक्षपुटीमिति ख्यातं चक्रं षट्कर्मवित्तमैः ।
रेखाग्रेषु लिखेच्छूलान् ह्रीङ्कारेण च संयुतान् ॥
तत्र शूलस्य पार्श्वेषु पाशाङ्कुशौ च विन्यसेत् ।

End:

अञ्जनम्—

ओं नमो भूतनाथाय क्षेत्रपालकाय भैरवाय
डाकिन्यावेशयावेशय सकलभूतनाथाय स्वाहा ॥

No. 7987. भुवनेश्वरीकच्छपुटम्.
BHUVANEŚVARĪKACCHĀPUṬAM.

Pages, 5. Lines, 7 on a page.

Begins on fol. 58*a* of the MS. described under No. 5924. Incomplete.

Similar to the above.

Beginning :

देवदेव जगन्नाथ कालान्तक कृतान्तक ।
बीजपूर(रूप)मतङ्गाख्यमहापीठोपरि स्थिता[ः] ॥
समस्तविश्वसन्त्राणप्रवीण करुणानिधे ।
विज्ञानसाधकेन्द्राणां स्तम्भनिग्रहकारिणाम् ॥

* * * *

अस्य कक्षपुट वक्ष्ये शृणु सर्वाङ्गसुन्दरि ।
उत्तराभिमुखो भूत्वा बाणरेखास्समालिखेत् ॥
मेषकर्कितुलापूर्वं धनुषो मकरस्तुला ।
मिथुनो मेषपश्चम्या इत्येते ध्रुवसंज्ञकाः ॥

End :

अरुणमरुणभासं माल्यदामाङ्गरागं
स्वकरविततपाशं पुष्पबाणेक्षुचापम् ।
मणिमयमकुटाद्यैर्दीप्तमाकल्पजालै—
ररुणनलिनसंस्थं चिन्तयेदग्नियोनिम् ॥

No. 7988. भुवनेश्वरीकल्पः.
BHUVANEŚVARĪKALPAḤ.

Pages, 20. Lines, 20 on a page.

Begins on fol. 218*a* of the MS. described under No. 581.

Similar to the above.

Contains the following Paṭalas :—

१. मन्त्रोद्धारक्रमः.	६. आकर्षणम्.
२. ध्यानलक्षणम्.	७. विद्वेषणम्.
३. मन्त्रसाधनम्.	८. मन्त्रजपफलकथनम्.
४. सम्पत्प्रयोगः.	९. अन्तर्यागः.
५. वश्यप्रकरणम्.	१० बहिर्यागः.

Beginning:

शिव उवाच—

प्रणम्य देवमीशानं सर्वलोकमहेश्वरम् ।
सर्वज्ञं सर्ववरदं सर्वकारणकारकम् ॥
वदामि कल्पं मन्त्रस्य भुवनाधिपतेः स्फुटम् ।
धर्मार्थकाममोक्षाणां सिद्धये शङ्कराकृतिम् ॥
मन्त्रोद्धारक्रमं चैव मन्त्रमाहात्म्यवर्णनम् ।
मन्त्रसंस्करणं चैव तथा मन्त्रस्य साधनम् ॥

End:

प्रदक्षिणत्रयं कुर्यात् दण्डवत्प्रणमेत्सुधीः ।
निवेदयित्वा चात्मानं मूलमन्त्रेण पादयोः ॥
दद्याद्दक्षिणभागं तु स्वगुरुं पूजयेद्बुधः ।
मनुं स्मृत्वा तथानुज्ञां प्राप्य चात्मनि रोपयेत् ॥

Colophon:

इति दशमः पटलः ॥

No. **7989.** भुवनेश्वरीकल्पः.

BHUVANĒŚVARĪKALPAḤ.

Pages, 16. Lines, 6 on a page.

Begins on fol. 14*a* of the MS. described under No. 5600.

Complete.

Same as the above.

No. 7990. भूततन्त्रम्.
BHŪTATANTRAM.

Pages, 64. Lines, 6 on a page.

Begins on fol. 16*a* of the MS. described under No. 5639.

This Mantra is addressed to Siva and is supposed to be efficacious in driving away evil spirits and in curing dangerous diseases.

Contains the following 17 Paṭalas:—

१. भूतभेदः.
२. ग्रहलक्षणम्.
३. दिग्बन्धनम्.
४. दिग्बन्धनभेदः.
५. देवशाबरकथनम्.
६. मन्त्रोद्धारक्रमः.
७. कालीमयमन्त्रः.
८. मुद्रायन्त्रप्रकारः.
९. संहारसङ्केतमुद्राविवरणम्.
१०. रुद्रमन्त्रः.
११. भूतत्रासकमन्त्रमुद्राकथनम्.
१२. मृत्युञ्जयमन्त्रोद्धारः.
१३. दक्षिणामूर्तिमन्त्रोद्धारः.
१४. भूतत्रासाञ्जनम्.
१५. भूतयोगकथनम्.
१६. बलिप्रकारः.
१७. बलिलक्षणम्.

Beginning:

श्रीकण्ठमनघं शान्तं भैरवं भीमविक्रमम् ।
नमः कृत्वा प्रवक्ष्यामि भूततन्त्रं सुपावनम् ॥
आनन्दकाननावासं योगानन्दपरायणम् ।
दिगम्बरं कुमारश्च नत्वा वटुकमादरात् ॥
नमो नमस्तेऽस्तु त्रिलोचनाय
नमो नमस्ते त्रिदशार्चिताय ।
नमो नमस्तेऽस्तु त्रिशूलधारिणे
नमो नमस्तेऽस्तु दिगम्बराय ॥

यक्षराक्षसगन्धर्ववेतालब्रह्मरक्षसः ।
शाकिनीडाकिनीभूतपिशाचोत्पत्तिमेव च ॥
तस्य संस्थानभेदश्च कलौ स्त्रीपूजनैः कथम् ।
आवेशलक्षणञ्चैव निग्रहाधिकमेव च ॥

* * * *

Colophon:

इति श्रीभैरवागमे प्रथमः पटलः ॥

End:

मन्त्रेण निक्षिपेद्भस्म पूर्वोक्तं कालिकाह्वयम् ॥
स्वस्थादेशो भवेद्भूता आवदन्ति शुभाशुभम ।
तेनैव स्वस्थमाप्नोति शिवस्य वचनं यथा ॥

Colophon:

इति श्रीभैरवागमे भूततन्त्रे बलिलक्षणं नाम सप्तदशः पटलः ॥

No. **7991.** भूततन्त्रम्.
BHŪTATANTRAM.

Substance, palm-leaf. Size, 13¾ × 1¼ inches. Pages, 6. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 25*a*. The other works herein are Siddhikarayōgaviśēṣāḥ 1*a*, Yantracintāmaṇi 13*b*, Yakṣiṇīmantraviṣaya 18*a*, Viṣatantra 27*b*, Yakṣiṇīmantravidhāna 34*b*.

Complete.

Similar to the above.

Beginning:

भूततन्त्रं प्रवक्ष्यामि समासेन निबोधत ।
देवद्विजातिर्यो मोहात् निन्दत्यधिकमोक्षतः ॥
अमानुषवपुश्चैष देवादिग्रहपण्डितः ।
मानुषाणां निवेशेन देवा यक्षा भुजङ्गमाः ॥

पितृगन्धर्वरक्षांसि यावत्प्रविशयन्त्यमुम् ।
लक्षये स्थानविज्ञानवाक्चेष्टाबलपौरुषैः ॥
पुरुषं पौरुषं यत्र तत्र भूतग्रहं भवेत् ।
भूत[स्य] रूपप्रकृतिभिर्भाषा(जा)त्यादिचेष्टितैः ॥
यस्यानुकारं कुरुते (ते)नाविष्टन्त[न्त]मादिशेत् ।

End:

सर्वग्रहविमोक्षणार्थं शुण्ठीनृमूत्रमागधीपक्वार्कदलैस्तु नश्यतो मन्त्री गृहफणिपिशाचपीडां वृश्चिकविषं विनाशयति ।
ईश्वरं द्वादशभुजं नाथमार्यावलोकिनम् ।
सर्वव्याधिचिकित्सार्थं जपन् सर्वग्रहान् जयेत् ॥

Colophon:

इति शास्त्रादर्शे भूततन्त्रस्समाप्तः ॥

No. 7992. भैरवमन्त्रकल्पः.

BHAIRAVAMANTRAKALPAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 28*a* of the MS. described under No. 2854 and not on 28*b* as shown therein.

Sixty-first Adhyāya of Ākāśabhairavakalpa.

Gives the details of the procedure to be adopted in repeating the Bhairavamantra.

Beginning:

श्रीशिव उवाच—
अथ वक्ष्यामि देवेशि भैरवस्य महात्मनः ।
रक्षण्या(नां)समस्तानां मन्त्रं सर्वार्थसिद्धये ॥
महाभैरवमन्त्रस्य वामदेव ऋषिः स्मृतः ।
अनुष्टुप् च तथा छन्दः देवता वटुकः शिवः ॥

End:

अनुक्तानामथो यन्त्रस्य उपरिकश्च(?) ।
साध्यमालिख्य तत्पश्चात् कुर्याद्यन्त्रं प्रयोगकम् ॥

Colophon:

इत्याकाशभैरवकल्पे भैरवमन्त्रं नाम एकषष्टितमोऽध्यायः ॥

No. 7993. भैरवमन्त्रोद्धारः.
BHAIRAVAMANTRŌDDHĀRAḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 169*a* of the MS. described under No. 5661, wherein this has been shown as Bhairavakavaca.

Complete.

Gives the order of arrangement of the syllables constituting the Bhairavamantra.

Beginning:

मेरुपृष्ठे समासीनं देवदेवं त्रियम्बकम् ।
शङ्करं परिपप्रच्छ पार्वती परमेश्वरम् ॥

* * * *

शङ्कर उवाच--

शृणु देवि महामन्त्रमापदुद्धारहेतुकम् ।
सर्वदुःखप्रशमनं सर्वशत्रुविनाशनम् ॥

* * * *

प्रणवं पूर्वमुद्धृत्य देवीप्रणवमुच्यते ।
बटुकायेति वै पश्चात् आपदुद्धारणाय च ॥
कुरुद्वयं ततः पश्चात् वटुकाय पुनः क्षिपेत् ।

End:

सहजानन्दनाथाय न्यसेन्नेत्रत्रये तथा ।
निस्सीमानन्दनाथाय अस्त्रे चैवात्र विन्यसेत् ॥
एवं न्यासविधिं कृत्वा यथावत्तदनन्तरम् ।
ध्यानं तस्य प्रवक्ष्यामि यथा ध्यात्वा पठेन्नरः ॥

* * * *

करकलितकपालः कुण्डली दण्डपाणिः
तरुणतिमिरनीलव्यालयज्ञोपवीती ।
क्रतुसमयसपर्याविघ्नविच्छेदहेतुः
जयतु वटुकनाथः सिद्धिदस्साधकानाम् ॥

No. 7994. मदनगोपालसन्ध्याविधिः.

MADANAGŌPĀLASANDHYĀVIDHIḤ.

Pages, 2. Lines, 18 on a page.

Begins on fol. 1*a* of the MS. described under No. 424.

Complete.

On the manner of performing the daily ablutions using the Madanagōpālamantra for the purpose.

Beginning:

श्रीमदनगोपालसन्ध्याविधिरुच्यते । प्राणानायम्य श्रीमदनगोपालमुद्दिश्य श्रीमदनगोपालकृष्णप्रीत्यर्थं गोपालसन्ध्यामुपासिष्ये—जलमध्ये अष्टदलपद्मं संस्थाप्य दक्षिणहस्तेन हृदयमन्त्रेण मन्त्रस्तु क्लीमिति जलमादाय तज्जलं शिरोमन्त्रेण क्लीमिति वामहस्ते निक्षिप्य ।

End:

न्यासपूर्वकं सपरिवारं देवं हृदये उद्वास्य तर्पणसङ्ख्यया जपं कुर्यात् । मूलेन पञ्चविंशतिवारजप्तजलेन प्रोक्ष्याचम्य ॥

Colophon:

इति सन्ध्याविधिः ॥

No. 7995. मन्त्रकल्पः—आन्ध्रटीकासहितः.

MANTRAKALPAḤ WITH TELUGU ṬĪKĀ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 22*a* of the MS. described under No. 5832, wherein this has been shown as Satrumṛtyuharamantra among the other works.

Complete.

Describes the eleven ways in which the syllables of a Mantra may be intermingled with those of the names of objects towards which the Mantra is directed, so as to produce special Mantra-formulas to be used in such Prayōgas (application) as Vaśya (bringing people under one's control), etc. It is stated that if one has recourse to these methods in relation to any Mantra one can realise all his objects.

Beginning:

पार्वत्युवाच—

नीलकण्ठ विरूपाक्ष नमः पाशुपतार्चित ।
ग्रन्थितादिप्रयोगश्च वद मे करुणाकर ॥

ईश्वर उवाच—

साध साधु महादेवि जय पन्नगकङ्कणे ।
ग्रन्थितादिप्रयोगश्च मन्त्राणां निधिकारणम् ॥
ग्रन्थितं सम्पुटं ग्रस्तं समस्तञ्च विदर्भितम् ।
तच(थाचा)क्रान्तमाद्यन्तं गर्भस्थं सर्वतो वृतम् ॥
तथा युक्तिविदर्भश्च विदर्भग्रथितन्तथा ।
इत्येवं(का)दशधा मन्त्राः प्रयुक्तास्सर्वसिद्धिदाः ॥

End:

पञ्च भूतबीजानि—लं हं यं रं वं, पाशाङ्कुशबीजानि—आं क्रों, दिक्पालबीजानि—लं रं लँ षं श्रीं यं ह्रीं चां, श्रोत्रबीजानि—ङं ऊं ॥

No. **7996.** मन्त्रकल्पसूत्रः.

MANTRAKALPASŪTRAḤ.

Substance, paper. Size, $10\frac{7}{8} \times 4\frac{5}{8}$ inches. Pages, 50. Lines, 9 on a page. Character, Dēvanāgari. Condition, good. Appearance, new.

This is a code of rituals for the guidance of the worshippers of Dēvī.

Beginning:

ओं अथातो दीक्षां व्याख्यास्यामो भगवान् परमशिवभट्टारकः श्रुत्वाष्टादशाविधास्सर्वाणि दर्शनानि लीलया तत्तदवस्थापन्नः प्रणीय सविमत्या भगवत्या भैरव्या स्वाविभिन्नया पृष्टः पञ्चभिर्मुखैः पञ्चाम्नायपरमार्थस्वरूपान् प्रणिनाय ।

End:

स सर्वेषु यज्ञेषु यष्टा भवति । यं यं क्रतुमधीते तेन तेनास्येष्टं भवतीति हि श्रूयते ।

इत्युपनिषद्—इति हि शिवम् ॥

* * * *

Colophon:

दुष्टक्षत्रियकुलकालान्तकरेणुकागर्भसम्भूतमहादेवप्रधानाशिष्यश्रीपरशुरामभार्गवमहोपाध्यायमहाकुलाचार्यनिर्मितं कल्पसूत्रं समाप्तम् ॥

No. 7997. मन्त्रदेवताप्रकाशिका.

MANTRADĒVATĀPRAKĀŚIKĀ.

Pages, 237. Lines, 25 on a page.

Begins on fol. 71*a* of the MS. described under No. 5482.

Gives the names of the deities to whom the Mantras mentioned in Prapañcasāra, etc., are addressed, and also deals with the details of procedure to be adopted in repeating the various Mantras.

The following are the first 29 Paṭalas of the work :—

१. ब्रह्मविद्योपदेशः.
२. मन्त्रपरीक्षा.
३. दीक्षोपोद्घातः.
४. दीक्षाविधानम्.
५. पुरश्चरणाद्यनुष्ठानप्रकारः.
६. जपादिविधानम्.
७. देवपूजाप्रकारः.
८. होमविधिः.
९. प्रणवमातृकाविधानम्.
१०. भुवनेश्वर्युपासना.

११. शिवपञ्चाक्षरीविद्या.
१२. दक्षिणामूर्तिमन्त्रः.
१३. त्र्यम्बकमन्त्राराधनम्.
१४. नीलकण्ठमन्त्रविधानम्.
१५. महागणपतिध्यानम्.
१६. गणपतिमन्त्रभेदः.
१७. नारायणाष्टाक्षरमन्त्रविधिः.
१८. नारसिंहमन्त्रभेदः.
१९. वराहहयग्रीववेदव्यासमन्त्राः.
२०. सुदर्शनमन्त्रभेदः.
२१. गोपालवामनमन्त्राः.
२२ श्रीराममन्त्राः.
२३. श्रीभूमिमन्त्रः.
२४. योगीश्वर्यादिविधानम्.
२५. त्वरिताविधानम्.
२६. दुर्गाविधानम्.
२७. नवग्रहमन्त्रः.
२८. नवग्रहमन्त्रः.
२९. आग्नेयमन्त्रः.

This MS. however contains the first Paṭala incomplete and Patalas 5 to 29.

Beginning:

ओङ्कारात्माक्षरादिन् बहुवनाशिवचिद्दक्षिणामूर्तिचिन्ता-
रत्नत्रैयम्बकोद्यत्स्मृतिहरणमहागाणपत्यादिरूपिन् ।
अष्टार्णद्वादशार्णप्रियनृहरितनो श्रीवराहाख्यचाक्रिन्
कृष्णात्मन्राम विष्णो विविधगुणलसच्छक्तिभास्वन्नमोऽस्तु ॥

* * * *

अथ प्रपञ्चसारादिमन्त्रशास्त्रानुसारतः ।
गुरूपदिष्टमन्त्राणां देवतादि प्रकाश्यते ॥

तत्र मन्त्रशब्देन स्वार्थमननमात्रेण सर्वानर्थव्रातात् साधकं मन्तारं त्रायत इति उत्पादितेन ब्रह्मात्मैक्यबोधस्वरूपा ब्रह्मविद्योच्यते ।

* * * *

Colophon:

इति मन्त्रदैवतप्रकाशिकायां पञ्चमः पटलः ॥

End:

इयमेका सङ्ख्या । एवं चतुश्शतचतुश्चत्वारिंशत्सङ्ख्यया आज्येन पायसेन होमं तर्पणं च कुर्यात् । संवादादिकार्यसिद्धिर्भवति ॥

Colophon:

इति मन्त्रदेवप्रकाशिकायामाग्नेयाख्यैकोनात्रिंशः पटलः समाप्तः ॥

No. **7998.** मन्त्रदेवताप्रकाशिका.

MANTRADĒVATĀPRAKĀŚIKĀ.

Substance, palm-leaf. Size, $14\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 336. Lines, 6 on a page. Character, Telugu. Condition, good Appearance, old.

Contains Paṭalas 1 to 24 only.

Same as the above.

No. **7999.** मन्त्रदेवताप्रकाशिका.

MANTRADĒVATĀPRAKĀŚIKĀ.

Pages, 90. Lines, 9 on a page.

Begins on fol. 51*a* of the MS. described under No. 5682.

Contains Paṭalas 1 to 8 complete and 9 incomplete

Same as the above.

No. **8000.** मन्त्रदेवताप्रकाशिका.

MANTRADĒVATĀPRAKĀŚIKĀ.

Substance, palm-leaf. Size, $12\frac{7}{8} \times 4$ inches. Pages, 115. Lines, 13 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 37*a*. The other work herein is Āmnāyastava 1*a*.

Contains Paṭalas 1 to 15 only.

Same as the above.

No. **8001.** मन्त्रनिग्रहः.

MANTRANIGRAHAḤ.

Page, 1. Lines, 19 on a page.

Begins on fol. 41*b* of the MS. described under No. 2886 and is included in Ākāśabhairavakalpa 38*a* shown among the other works therein.

Complete.

Forms the 19th Adhyāya of Ākāśabhairavakalpa. It is stated that an evil-doer should be punished by an act of revenge, and that certain kinds of persons may be so punished without fear of committing any sin thereby.

Beginning:

शिवः—

निग्रहं धर्मं वक्ष्यामि मन्त्राणां सर्वदायक ।
उचितानुचितं वेत्तुमुपायं सिद्धिहेतुकम् ॥
क्रियां परमुपारभ्य क्रियान्ते योऽयमत्र तु ।
तं प्रतिक्रियया जेतुं कालेनापि विचारयेत् ॥

End:

एतद्रहस्यं सुबुधस्समीक्ष्य क्रियाविधानं स करोति लोके ।
तदेव नूनं शरभेश्वराज्ञा नान्यत्र सर्वं विपरीतमेति ॥

Colophon:

इत्याकाशभैरवकल्पे एकोनविंशोऽध्यायः ॥

No. 8002. मन्त्रपल्लवविषयः.

MANTRAPALLAVAVIṢAYAḤ.

Pages, 16. Lines, 6 on a page.

Begins on fol. 33*a* of the MS. described under No. 5541 and not on fol. 27*a* as shown therein.

Complete.

Gives the different ways in which a Mantra may be repeated and the effects of repeating them in those particular ways. Gives also the manner of drawing the mystic diagrams relating to the various Mantras.

Beginning:

ग्रथितं सम्पुटीकरणम्—

षट्कर्मविषयीभूतं मन्त्रहोमं यथागमम् ।
विनियोगञ्च मन्त्राणां यथावन्मे तथा शृणु ॥

पल्लवीयो यथा मन्त्रः यथावत्सम्पुटन्तथा ।
विदर्भं ग्रथितश्चैव ऊहनीयं यथाक्रमम् ॥
मन्त्रान्ते साध्यनामन्तु स्थापनं पल्लवन्तथा ।
सम्पुटं नाम पार्श्वद्वये बीजविक्षेपणन्तथा ॥

End:

स्थापनं वृक्षमूले पूर्वोक्तक्रमेण वृक्षमूले निस्थाप्य मनुं जपेत् । भौमवारे रात्रौ प्राणप्रतिष्ठाजपतर्पणहोमादितत्तत्क्रियावृत्तिमौक्तिकोप्त्याभास्यसङ्ख्या २९३ एतेषाञ्च पुनः महातटाकजलस्य कूलातिक्रमणस्येयं सङ्ख्या २३९ वर्षप्रतिबन्धकस्य सङ्ख्या १९९.

No. 8003. मन्त्रपल्लवविषयः.

MANTRAPALLAVAVIṢAYAḤ.

Page, 1. Lines, 3 on a page.

Begins on fol. 20*a* of the MS. described under No. 5828.

Complete.

Gives the directions to be followed by one who uses the various Mantra-prayōgas such as Vaśya, etc., as well as the Mantra-formulas to be specially added in relation to these Prayōgas.

Beginning and End:

पूर्वे चाभिमुखं वश्यमाग्नेयाकर्षणं तथा ।
दक्षिणे मारणं विद्यात् नैरृत्यां स्तम्भनं तथा ॥
पश्चिमे धनकामं स्यात् वायव्योच्चाटनं तथा ।
उत्तरे शान्तिकर्माणि ईशान्ये पुत्रकामुकः ॥
वषट् वश्यं फडुच्चाटे हुं द्वेषे खे च मारणे ।
स्वाहा पुष्टिस्स्वधा तुष्टिरित्येते मन्त्रपल्लवाः ॥

No. 8004. मन्त्रपारायणप्रकारः.

MANTRAPĀRĀYAṆAPRAKĀRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 57*b* of the MS. described under No. 5647.

Complete.

Gives the procedure to be adopted in repeating the different Mantras addressed to Dēvī.

Beginning:

अथ मन्त्रपारायणप्रकारः—

माया कुण्डलिनी = कुमारीत्यसि । माया ह्रीं, कुण्डलिनी ऐं, क्रिया क्लीं, मधुमती अकारादिक्षकारान्ता शुद्धा, बिन्दुयुक्ता, विसर्गयुक्ता, बिन्दुविसर्गयुक्ता—चतुर्विधा मातृका, काली, कला, मालिनी, मातङ्गी, विजया, जया, भगवती, देवी, शिवा, शाम्भवी १० शक्तिः । सौः । शङ्करवल्लभा ।

End:

मू । क्लीं आं कालि सौः ह्सौः स्हौः हं स इति शुद्धा ।
मू । क्लीं आं कालि सौः ह्सौः स्हौः हं स इति बिन्दुः ।

* * * *

एवं प्रकारेणोत्तरत्रापि योजनीया ॥

Colophon:

इति मन्त्रपारायणप्रकारः ॥

No. 8005. मन्त्रपारायणविधिः.

MANTRAPĀRĀYAṆAVIDHIḤ.

Pages, 4. Lines, 4 on a page.

Begins on fol. 119*b* of the MS. described under No. 5600.

Complete.

Similar to the above.

Beginning:

मन्त्रपारायणं करिष्य इति सङ्कल्प्य, अस्य श्रीमन्त्रपारायणमहामन्त्रस्य दक्षिणा—षिः, पङ्क्तिश्छन्दः, श्रीमहात्रि—ता; क ९ बीजं, ह ६ शक्तिः, स ४ कीलकं, मम त्रि—गः ।

End:

हं सः ह्रीपिन्यै नमः । हं सः । ४-१९-८ अ आ ४ इ ई—
क्षं पादुका—हं सः ॥

Colophon:

इति मन्त्रनामपारायणस्समाप्तः ॥

No. 8006. मन्त्रपारायणोद्धारः.

MANTRAPĀRĀYAṆŌDDHĀRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 57*b* of the MS. described under No. 5647.

Complete.

Gives the order of arrangement of the syllables constituting the different Mantras addressed to Dēvī.

Beginning:

तारं त्रिवारं भुवनं श्रियं मूलं ततः परम् ।
पूर्वोक्तबीजत्रितयमेकैकं प्रथमं पठेत् ॥

End:

एवं क्रमेण कथितो मन्त्रस्सर्वसमृद्धिदः ॥
षष्टिस्सहस्राणि तथा सहस्रं द्विशताधिकम् ।
पारायणक्रमो ह्येषां मन्त्राणां कथितश्शुभः ॥

Colophon:

इति मन्त्रपारायणोद्धारः ॥

No. 8007. मन्त्रमहोदधिः.

MANTRAMAHŌDADHIḤ.

Substance, paper. Size, $8\frac{1}{8} \times 5\frac{3}{8}$ inches. Pages, 20. Lines, 15 on a page. Character, Telugu. Condition, good. Appearance, new.

First Taraṅga complete.

Contains various Mantras, with their Yantras, etc., and also deals with the details of procedure to be observed in repeating them.

Beginning:

आदौ देवं वशीकर्तुं पुनश्चरणमाचरेत् ।
तीर्थादौ निर्जनस्थाने भूमिग्रहणपूर्वकम् ॥
नवधा तां भरां कृत्वा पूर्वादिषु समालिखेत् ।
कोष्ठेषु सप्तवर्गांश्च लं क्षां मध्ये तथा स्वरान् ॥

End:

जपाद्दशांशो होमः । तद्दशांशेन तर्पणम् । तद्दशांशेन अभिषेकः । तद्दशांशेन विप्रभोजनम् ।

इसि पञ्चाङ्गं पुरश्चरणमिति कनीयान् पक्षः । अभिषेकवर्जो मध्यमः । तर्पणाभिषेकवर्जः त्र्यङ्ग उत्तमः ।

होमदशांशात् द्विजभोजनमिति । किं बहुना बहुब्राह्मणभोजने देवताप्रसादो भवेदिति ॥

Colophon:

इति मन्त्रमहोदधौ प्रथमस्तरङ्गः ॥

No. 8008. मन्त्रमहोदधिः.

MANTRAMAHŌDADHIḤ.

Pages, 32. Lines, 24 on a page.

Begins on fol. 175*a* of the MS. described under No. 5507.

Incomplete. Up to Mālāsaṁskāra.

Similar to the above.

Beginning:

मार्कण्डेय उवाच—

भवं युद्धमभूद्घोरं रौद्रं दैत्यबलैस्सह ॥

नृसिंहस्यागतं भूतैर्नारासिंहैरनेकशः ।
दैत्याः केऽपि हतास्तत्र केचिद्भीताः पलायिताः ॥
तं दृष्ट्वातीव संक्रुद्धो हिरण्यकशिपुः स्वयम् ।

* * * *

उपास्यते नृसिंहाख्यं ब्रह्म वेदान्तगोचरम् ।
भये पालितसंसारच्छेदहेतुं जगद्गुरुम् ॥
ओं नमश्श्रीनृसिंहाय वज्रदंष्ट्राय वज्रिणे ।
वज्रदेहाय वज्राय नमो वज्रनखाय च ॥

End:

त्वं माले सर्वदेवानां प्रीतिदा शुभदा भव ।
शिवं कुरुष्व मे भद्रे यशो वीर्यं च सर्वदा ॥
इति मालां नमस्कृत्य रहसि स्थापयेत् ।

Colophon:

इति मालासंस्कारः ॥

No. 8009. मन्त्रयन्त्रक्रियाभेदविधानम्.

MANTRAYANTRAKRIYĀBHĒDAVIDHĀNAM.

Pages, 2. Lines, 19 on a page.

Begins on fol. 41*b* of the MS. described under No. 2886, and is included in Akāśabhairavakalpa shown among the other works therein.

Complete.

The Mantra dealt with herein is addressed to Śiva, and is supposed to have the power of destroying one's enemies. The Yantra and the details of procedure to be adopted in repeating the Mantra are also described here.

Beginning:

शिवः—

सजलजलजनीलं चाष्टबाहुं द्विनेत्रं द्विविधचटुलपक्षं दीप्यमानोर्ध्वकेशम् ।
मनसिनिहितकोपस्पन्दमानाधरोष्ठं सकलरिपुविनाशं साळुवेशं नमामि ॥

कृत्वा साध्यचतुष्पथो(थे)ऽस्थि(नि)चयेपूत्कृष्टकां कृत्तिकां
हन्नस्यात्व(तस्यास्त्वान) कंवऽस्त्र(वस्तु) भूषण[युत] सुमाल्यपाङ्गनैश्चन्दनैः ।
आभ(भू)ष्य स्वकरेण मूर्ध्नि निको(क)(टे)स्पृष्ट्वा शतं मारुतं
जप्त्वा मन्त्रसहस्रकं च विधिवत्स्वङ्गेन तां पीडयेत् ॥

* * * *

Colophon:

इत्याकाशभैरवकल्पे एकविंशोऽध्यायः ॥

End:

महारोगज्वरक्षुद्रभूतकृत्रिमशान्तये ।
इतराण्यपि भूतानि धावन्ति बलिदर्शनात् ॥
ओं नमो भगवते श्मशानरुद्राय . . . . .
क्रचां क्रचां सर्वभोग्यं देहि देहि स्वाहा ॥

Colophon:

इत्याकाशभैरवकल्पे मन्त्रयन्त्रक्रियाभेदो नाम त्रयोविंशोऽध्यायः ॥

No. 8010. मन्त्रविद्या.
MANTRAVIDYĀ.

Pages, 12. Lines, 8 on a page.

Begins on fol. 25*a* of the MS. described under No. 673.

Complete.

Describes the method of drawing the Yantra relating to Śrīvidyā, and gives also the difference between the three kinds of Cakra connected therewith, the Saṁhāra, Sṛṣṭi and Sthiti Cakras.

Beginning:

चिद्रूपाममलामम्बां त्रिपुराख्यां सदाशिवाम् ।
हृदि ध्यात्वा प्रवक्ष्यामि यत्तत्सिध्यतु मे वचः ॥

* * * *

उक्तवानादराद्देवशाबरानथ वैदिकान् ।
इतः परं मन्त्रविद्यां वद मे करुणाकर ॥

ईश्वरः—

साधु साधु महेशानि सर्वमन्त्रविशारदे ।
अत्यन्तगोपनीया सा यन्त्रविद्या तु भूतले ॥

* * * *

निशाकाले समासीनो निजान्तर्ध्यानपूर्वकम् ।
पूर्वोक्तवल्लिखेद्यन्त्रं बीजयुक्तं सुपावनम् ॥

तत्कर्णिकामध्यगतां मूलमूर्तिं सुपूजयेत् ।
षोडशैरुपचारैश्च अर्चयित्वा तथाज्ञया ॥

* * * *

पार्वत्युवाच—

नमस्ते देवदेवेश करुणाकर शङ्कर ।
श्रीविद्यायन्त्रभेदानि वद मे परमेश्वर ॥

ईश्वर उवाच—

यन्त्रोद्धारं प्रवक्ष्यामि तस्य बीजानि पार्वति ।
तस्यैव चोपसंहारं नानाशान्त्यादिकं तथा ॥

End:

अर्चयेदुक्तमार्गेण मण्डलं साधकोत्तमः ।
तत्तात्सिद्धिमवाप्नोति नात्र कार्या विचारणा ॥

इति परमरहस्यसारयन्त्रं सुरवरसिद्धमुनीन्द्रपूजनश्च ।
नरवरवशवर्तिकारि यन्त्रं नमत नराघनिहन्तृ यन्त्रराजम् ॥

Colophon:

इति स्थितिचक्रः समाप्त ॥

No. 8011. मन्त्रसञ्जीवनम्.
MANTRASAÑJĪVANAM.

Page, 1. Lines, 25 on a page.

Begins on fol. 65*b* of the MS. described under No. 5482, wherein this has been omitted to be shown among the other works.

Incomplete.

Gives the manner of repeating Mantras, in general, so as to make them effective.

Beginning:

अथ ते वर्णयिष्यामि सञ्जीवनमनुं प्रिये ।
एषामुच्चार्य(र)मात्रेण मन्त्रस्सिद्धिप्रदो भवेत् ॥
बालाया देवि त्र्यक्षर्याश्शक्तिमादौ पठेत्सुधीः ।
सञ्जीवनाख्यमन्त्रोऽयं दिव्यो मन्त्रस्य सिद्धये ॥

End:

सिद्धविद्या महाश्यामा सर्वदोषविवर्जिता ।
जप्या सिद्धौ सदा सद्भिर्ब्रह्मविद्भिर्मुमुक्षुभिः ॥

No. 8012. मन्त्रसारः.
MANTRASĀRAḤ.

Pages, 57. Lines, 10 on a page.

Begins on fol. 107*a* of the MS. described under No. 6667.

Complete in 13 Paṭalas.

Gives the details of procedure in connection with the repetition of the various Mantras. The work is introduced as a discourse between Dāmōdara, son of Nīlakaṇṭha of Bharadvājagōtra, and his disciple Saṅkara of Vasiṣṭhagōtra of Muktisthala village.

Contains the following Paṭalas:—

१. वाग्देवीमन्त्रभेदविधानम्.
२. धन्वन्तरिमन्त्रविधानम्.
३. इन्द्रमन्त्रादिविधानम्.
४. इन्द्राणीमन्त्रविधिः.
५. स्वयंवरमन्त्रविधिः.
६. अश्वारूढादिमन्त्रविधिः.
७. वीरभद्रमन्त्रविधिः.
८. हनुमन्मन्त्रविधानम्.

९. गारुडमन्त्रविधानम्.
१०. दुर्गाविधिः.
११. शरभेश्वरविधानम्.
१२. कोलमुखीमन्त्रविधानम्.
१३. कार्तवीर्यार्जुनविधानम्.

Beginning :

महितमुक्तित(फ)लायद(यित)मिष्टदं महिषमूर्ध्नि लसत्पदपङ्कजम् ।
मनसि मे मधुसूदनसोदरं लसतु धाम महेश्वरजीवितम् ॥
अथैकदा सुखासीनं ध्यायन्तं ब्रह्म शाश्वतम् ।
कृतहोमार्चनाजापस्वाध्यायाद्यखिलक्रियम् ॥
भस्मोद्धूलितसर्वाङ्गं त्रिपुण्ड्रोज्ज्वलमस्तकम् ।
अक्षमालाकृतोत्तंसग्रैवेयवलयान्वितम् ॥

* * * *

अवतीर्णे मुनेर्वंशे भरद्वाजस्य धीमतः ।
नाम्ना दामोदर इति प्रसिद्धं तपसां निधिम् ॥
नीलकण्ठात्मजं साक्षात् नीलकण्ठमिवापरम् ।
कुण्डालयस्थश्रीकण्ठपादाब्जैकपरायणम् ।
उपागत्य गुरुं शिष्यं कृतपादाभिवन्दनम् ॥
मुक्तिस्थलग्रामलसद्गेहेनजकलाभिधे ।
जातो महिषमर्दिन्यास्समीपे विप्रसंकुले ॥
वसिष्ठवंशजो नाम्ना शङ्करोऽतिप्रियो गुरोः ।

* * * *

अधुना श्रोतुमिच्छामि मन्त्रान् गुह्यतमानपि ।
स्वैस्स्वैर्विधानैस्सहितैः प्रयोगैश्च पृथग्विधैः ॥
वैदिकांस्तान्त्रिकांश्चैव ब्रूहि मे ब्रह्मवित्तम ।

* * * *

Colophon :

इति मन्त्रसारे वाग्देवीमन्त्रभेदविधानं नाम प्रथमः पटलः ॥

End:

यन्त्रमेतत्समुद्दिष्टं सर्वरक्षाकरं परम् ।
कृतवीर्यजमभ्यर्च्य यन्त्रेऽस्मिन् प्रजपेन्मनुम् ॥
नष्टद्रव्यस्य लाभाय चोरैरपहृतस्य च ।
संस्थापितं यन्त्रमेतत् विधिना भवनाङ्गणे ॥
पदार्थानां समस्तानां रक्षां कुर्याद्दिवानिशम् ।
उद्धरेत्कार्तवीर्याय विद्महे च ततः परम् ॥
महाबलायेति ततो धीमहीति तथोच्चरेत् ।
तद्वत्तन्नोऽर्जुन इति वदेद्भूयः प्रचोदयात् ॥
गायत्री कार्तवीर्यस्य चतुर्विंशतिरक्षरा ।
चोरारिव्यालबेतालक्रिमिकीटाद्युपद्रवान् ॥
विनाशयति किंचाथ हृद्यां लक्ष्मीं प्रयच्छति ।
पूजाविधिस्सकललोकमहेश्वरस्य संक्षेपतो निगदितं कृतवीर्यसूनोः ।
रक्षाकरो ह्यखिलधान्यधराधनाद्यैः स्फीतां प्रयच्छति रमामचलां नराणाम् ॥

Colophon:

इति मन्त्रसारे कार्तवीर्यार्जुनविधानं नाम त्रयोदशः पटलः ॥
मन्त्रसारस्समाप्तः ॥

No. 8013. मन्त्रहोमभेदविधानम्.
MANTRAHŌMABHĒDAVIDHĀNAM.

Page, 1. Lines, 19 on a page.

Begins on fol. 41*b* of the MS. described under No. 2886 and is included in Ākāśabhairavakalpa shown among the other works therein.

Complete.

Gives the manner of performing the different kinds of Hōma or fire-offering in relation to the Mantra addressed to Śarabhēśvara. The performance of these Hōmas is considered to have the power of warding off evil-spirits, and of removing diseases such as fever, etc.

Beginning:

शिवः—

वदाम्यशेषं शृणु होमभेदक्रियाविधानं गिरिराजकन्ये ।
नूनं महाभूतपिशाचरोगज्वरादिदुष्टाघविमोकशान्त्यै ॥
नवरात्रिहोमं मधुकं दशाहमुन्मादतापज्वरशूलशान्त्यै ।
श्रीभार्गवीभिर्नवरात्रिहोमैः प्रयान्ति शान्ति कुपिताश्च देवाः ॥

End:

तदस्थिशेषेण शरीरकर्णे मन्त्रं समुच्चार्य विमुच्य चैवम् ।
शतप्रयोगात्स रिपुस्स्वदेहात्प्रयाति याम्याः परमं सुघोरम् ॥

Colophon:

इत्याकाशभैरवकल्पे विंशोऽध्यायः ॥

No 8014. मन्त्राक्षरप्रमाणनिर्णयः.

MANTRĀKṢARAPRAMĀṆANIRṆAYAḤ.

Pages, 7. Lines, 16 on a page.

Begins on fol. 154*b* of the MS. described under No. 424.

Complete.

This forms the second Paṭala in Śāradātilaka, a work dealing with the details connected with Mantras in general, i.e., their characteristics, the Yantra and Cakra relating thereto, the manner of repeating the Mantras, etc.

Beginning:

अथ मन्त्रप्रतिष्ठाप्रयोगः ।

तत्र दीक्षोक्तमुहूर्तादौ धात्र्यादिनिर्मितं यन्त्रं कस्मिंश्चित् पात्रे अम्लादिरसशोधितं संस्थाप्य . . . .

फट्कारपञ्चकादिर्यो मदोन्मत्त उदीरितः ।
तद्वदस्त्रस्थितं मध्ये यस्य मन्त्रस्य मूर्छितः ॥

विरामं स्थानगं यस्य हृतवर्यिस्स कथ्यते ।
आदौ मध्ये तथा मूर्ध्नि चतुरस्त्रयुतो मनुः ॥
ज्ञातव्यो भीत इत्येषः यस्स्यादष्टादशाक्षरः ।

End:

एतादृशगुणोपेतश्शिष्यो भवति नापरः ।
एकाब्देन भवेद्योग्यो ब्राह्मणोऽब्दद्वयान्नृपः ॥
वैश्यो वर्षैस्त्रिभिश्शूद्रश्चतुर्भिर्वत्सरैर्गुरोः ।
न शुश्रूषा परिग्राह्या दीक्षायोगव्रतादिषु ॥

Colophon:

शारदातिलके द्वितीयः पटलः ॥

No. 8015. मन्त्रोत्कीलनविधिः.
MANTRŌTKĪLANAVIDHIḤ.

Pages, 6. Lines, 25 on a page.

Begins on fol. 63*a* of the MS. described under No. 5482

The fifth Paṭala in Dēvīrahasyatantra.

Gives the manner of repeating a Mantra so that its efficacy may be firmly secured.

Beginning:

अथ वक्ष्ये महातत्त्वं मन्त्राणां परमार्थदम् ।
येन विज्ञानमात्रेण विद्या सिध्यति तत्परम् ॥
उत्कीलनविधिं वक्ष्ये सर्वमन्त्ररहस्यकम् ।
अदातव्यमभक्तेभ्यो नाख्येयं यस्य कस्य चित् ॥
शाक्तानां बीजमन्त्राणां शैवानां च विशेषतः ।
वैष्णवानां मनूनां तु वक्ष्याम्युत्कीलनं परम् ॥

End:

काममादौ च मन्त्रान्ते तारं देवि जपेत्सुधीः ।
वासुदेवमनोर्मन्त्रस्स्यादुत्कीलनकाभिधः ॥

इति तत्त्वं महादेवि मन्त्राणां परमार्थदम् ।
तव स्नेहेन कथितं नाख्येयं ब्रह्मवादिभिः ॥

Colophon:

इति श्रीदेवीरहस्ये तन्त्रे मन्त्रोत्कीलनविधिर्नाम पञ्चमः पटलः ॥

No. 8016. मलयालचक्रपूजाविधानम्.

MALAYĀLACAKRAPUJĀVIDHĀNAM.

Pages, 6. Lines, 5 on a page.


Begins on fol. 24*a* of the MS. described under No. 3862, wherein this is shown as Kēralacakra among the other works.

Complete.

Gives the form of the Yantra and also the manner of worshipping the Cakra relating to Malayāla-bhagavatīmantra.

Beginning:

मलयाळयन्त्रम् ॥



बं बं बं बं बं बं बं बं बं बं बं हं					
आं	19		20	16	434
ह्रीं	1	46	5	101286	वं

End:

ओं ह्रीं श्रीं सुवर्णमन्त्रपुष्पं समर्पयामि ॥

No. 8017. महागणपतिमन्त्रकल्पः.
MAHĀGAṆAPATIMANTRAKALPAḤ.

Pages, 3. Lines, 14 on a page.

Begins on fol. 94*a* of the MS. described under No. 5673.

Complete.

This is the 28th Kalpa in Tripurāsiddhānta.

Describes the details of procedure to be adopted in connection with the repetition of the Mahāgaṇapatimantra and gives also the arrangement of the syllables constituting the Mantra, the nature of the Yantra relating thereto, etc.

Beginning :

दक्षिणामूर्तिरुवाच—

गणानामधिपस्यायं मया मन्त्रः प्रवक्ष्यते ।
यस्य श्रवणमात्रेण विघ्नैर्मर्त्यो विमुच्यते ॥
इतः पूर्वं मया नोक्तं यस्य कस्यापि पार्वति ।
कथयामि तव स्नेहात् शृणु मत्प्राणवल्लभे ॥
प्रणवं पूर्वमुच्चार्य श्रियं मायान्तथोच्चरेत् ।
मदनं काश्यपं पश्चात् गकारं बिन्दुसंयुतम् ॥

End :

इत्युक्तो गणनाथस्य मन्त्रस्सर्वोत्तमोत्तमः ।
सर्वाभीष्टप्रदा देवी किं पुनः श्रोतुमिच्छसि ॥

Colophon :

इति श्रीमहात्रिपुरासिद्धान्ते महागणपतिप्रशंसा नामाष्टाविंशः कल्पः ॥

No. 8018. महागणपतिविधानम्.
MAHĀGAṆAPATIVIDHĀNAM.

Pages, 15. Lines, 8 on a page.

Begins on fol. 114*a* of the MS. described under No. 5683.

Complete.

Gives details as to the manner of repeating the Mahāgaṇapatimantra.

Beginning:

अथ शिवशक्त्यवतारविशेषरूपगाणपत्यमन्त्रोपासनप्रकारः प्रकाश्यते तत्रादौ वाञ्छितेष्टाभिमतप्रदसर्वमन्त्रविजयकरमहागणपतिमन्त्रः। स च प्रणवश्रीबीजहृल्लेखाकामबीजभूबीजगणपतिबीजान्युक्त्वा संबुद्ध्यन्तं चतुर्थ्यन्तं वा गणपतिशब्दश्चोक्त्वा वरवरदपदं सर्वजनपदश्चोक्त्वा मे वशमित्युच्चार्य आनयाभिजायाव (येअ)प्युच्चरेत्।

End:

ईदृशं गणपतिं ध्यात्वा मन्त्री तोयैस्सुधामयैः।
दिनादौ दिनवाम(ध्ये वा) तर्पयेन्मस्तकैस्सुधीः॥
चत्वारिंशच्च गः पूर्वं तत्पूर्वं वा चतुश्शतम्।
चत्वारिंशद्दिनात्तस्य काङ्क्षिता सिद्धिरेष्यति॥
कस्मिंश्चित्कृष्णपात्रे तु नवनीतं प्रसारयेत्।

तत्राष्टदलकर्णिकायां परस्पराभिमुखः गमिति बीजद्वयं विलेख्य . . . .

य र ल व श ष स हों हं सस्सो हं स्वाहा॥

No. 8019. महालक्ष्मीरत्नकोशः.

MAHĀLAKṢMĪRATNAKŌŚAḤ.

Substance, paper. Size, 10⅜ × 8⅜ inches. Pages, 494. Lines, 19 on a page. Character, Telugu. Condition, good. Appearance, new.

The colophons ascribe the authorship to Śaṅkara in some places, to Nārāyaṇa in other places, and jointly to Śaṅkara and Nārāyaṇa in some other places. Gives the details connected with the Mahālakṣmīmantra, the manner of its repetition, the Yantra and Cakra relating thereto, etc. In this work all Mantras addressed to a male deity are conceived as relating to Nārāyaṇa

सप्तकोटिमहामन्त्राः त्वयोक्ता बहुधा वृथा ।
सर्वेषां फलमेकत्र केन मन्त्रेण सिध्यति ॥
यस्मिन्नुपासिते सर्वं सुप्रसन्नं भविष्यति ।
तन्मन्त्रं मम देवेश वक्तुमर्हसि तत्त्वतः ॥
साधु साधु महाभागे यदुक्तन्तु त्वयानघे ।
तदुक्तं लोकरक्षार्थं वक्ष्येऽहं शृणु सुन्दरि ॥

* * * *

महालक्ष्मीमहामन्त्रं ब्रह्मणा मे पुरोदितम् ।
तत्ते वक्ष्यामि देवेशि समाहितमनाः शृणु ॥

Colophon :

इति महालक्ष्मीकल्पे नारायणब्रह्मोमामहेश्वरसंवादे नारायणशङ्कराभ्यां विरचिते प्रत्यक्षसिद्धिप्रदे महालक्ष्मीरत्नकोशाख्ये प्रथमोऽध्यायः ॥

End :

चिद्रूपां कोटितद्भासां लहरीस्फुरणालयाम् ।
सौरमार्गेण संपश्यन् स्फुरणं परिचिन्तयेत् ॥
संवित्सेवाप्रकारं ते कथितं वरवर्णिनि ।
पूजान्ते भोजनं कृत्वा कुर्यादानन्दयोगकम् ॥

Colophon :

इति श्रीमहालक्ष्मीकल्पे उमामहेश्वरसंवादे शङ्करेण विरचिते प्रत्यक्षसिद्धिप्रदे महालक्ष्मीरत्नकोशे अष्टाशीतितमोऽध्यायः ॥

श्रीमहालक्ष्मीरत्नकोशस्सम्पूर्णः ॥

No. **8020.** महालक्ष्मीरत्नकोशः.

MAHĀLAKṢMĪRATNAKŌŚAḤ.

Pages, 37. Lines, 5 on a page.

Begins on fol. 21*b* of the MS. described under No. 5572.

This was written by Śaṅkara and forms a portion of **Mahālakṣmikalpa.**

Simlar to the above.

Contains Adhyāyas 82 to 87 only.

End and Colophon :

इति श्रीमहाश्रीनाथादिविवरणं नाम सप्ताशीतितमोऽध्यायः ॥

पञ्चाशद्वर्णभेदैर्विहितवदनदोःपादयुक्कुक्षिवक्षो—
देहां भास्वत्कपर्दाकलितशशिकलामिन्दुकुन्दावदाताम् ।
अक्षस्रक्पुस्तचिह्नाभयवरदकरां त्रीक्षणां पद्मसंस्था-
मच्छाकल्पावतुच्छस्तनजघनभरां भारतीं तां नमामि ॥

गुरुत्रयगणपतिपीठत्रयसहिताय चतुर्विंशतिसहस्रपरिवारिताय कामगिरिपीठाय नमः । . . . .

महाविद्याप्रजापी तु श्रीगुर्वाख्यं शिवं विना ।
महाविद्यैव मृत्युस्यात्त्रिभिर्मासैर्न संशयः ॥

No. **8021.** महालक्ष्मीरत्नकोशः.

MAHĀLAKṢMĪRATNAKŌŚAḤ.

Pages, 35. Lines, 18 on a page.

Begins on fol. 128*a* of the MS. described under No. 5755.

Contains Adhyāyas 41 to 48 only.

Same work as the above. The subject treated of herein is Bhadrakṛtyāpraśaṁsā.

No. **8022.** महालक्ष्मीरत्नकोशः.

MAHĀLAKṢMĪRATNAKŌŚAḤ.

Pages, 22. Lines, 16 on a page.

Begins on fol. 105*a* of the MS. described under No. 7593.

Incomplete. Contains Adhyāyas 1 to 5 ; but wants 15 Ślōkas at the beginning.

Same as the above.

No. 8023. महालक्ष्मीरत्नकोशः.
MAHĀLAKṢMĪRATNAKŌŚAḤ.

Pages, 25. Lines, 16 on a page.

Begins on fol. 34*b* of the MS. described under No. 7739.

Adhyāyas 65 to 73 only.

Same work as the above.

No. 8024. महाषोडश्युद्धारः.
MAHĀṢŌḌAŚYUDDHĀRAḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 19*a* of the MS. described under No. 673.

Complete.

Gives the order of arrangement of the syllables constituting the Ṣōḍaśākṣarīmantra which is addressed to Durgā.

Beginning:

लक्ष्मीशक्तिरनङ्गवाग्भवपरावेदादिशैवारमा
वायुर्योनिरमाक्षमाशिववधूव्योमेन्दुपुष्पेषुकः ।

End:

लक्ष्म्यादिबीजानि विलोमितानि श्रीषोडशार्णे त्रिपुराम्बिकायाः ।

No. 8025. महाषोढान्यासः.
MAHĀṢŌḌHĀNYĀSAḤ.

Pages, 8. Lines, 9 on a page.

Begins on fol. 5*a* of the MS. described under No. 7833.

Complete.

Gives the six kinds of Nyāsa (or the ceremonial touching of the various parts of one's body) relating to Śrīvidyā.

Beginning:

अथ महाषोढा न्यसेत् । प्रपञ्चभुवनमूर्तिमन्त्रदेवतामातरः । अथातः प्रपञ्चन्यासमारभ्यते । अं आदिप्रपञ्चरूपाय श्रियै नमः । आं द्वीपरूपाय मायायै नमः । इं जलधिरूपाय कमलायै नमः । ईं गिरिरूपाय विष्णुवल्लभायै नमः ।

End :

अं सं संहारभैरवनाथाय नमः । इति मूर्ध्नि ।

इति मातृकान्यासः ॥

Colophon :

इति महाषोढा समाप्ता ॥

कुलपात्रमिदन्तुभ्यं दीयते शुद्धिसंयुतम् ।
स्वीकृत्य सुभगे देवि जयन्देहि रिपुं दह ॥

* * * *

सम्पूजकानां परिपालकानां यतीन्द्रयोगीन्द्रतपोधनानाम् ।
देशस्य राष्ट्रस्य कुलस्य राज्ञः करोतु शान्तिं मम चाम्बिका सदा ॥

No. **8026.** महासौरखण्डः.

MAHĀSAURAKHAṆḌAḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 148*a* of the MS. described under No. 7758.

Complete.

Gives the number of the Ṛks, the names of the Ṛṣis, the Chandas and other particulars connected with the Mantras addressed to the sun-god. By the propitiation of the sun-god one is supposed to be able to get rid of one's diseases and sins and to obtain wisdom and salvation.

Beginning :

अथ सौर्याणां मन्त्राणामृक्सङ्ख्यामृषिदैवतच्छन्दांसि पुनर्वक्ष्यामः—

पूर्वाचार्यक्रमेणैतत्सर्वं पुरा दृष्ट्वा शौनकादिभिराचार्यैर्जपतां तु प्रत्यक्षत्वार्थमिदानीं तन्मयोच्यते । उदु त्यं जातवेदसमिति त्रयोदशर्चस्य सूक्तस्य कण्वपुत्रप्रस्कण्व ऋषिः, सूर्यो देवता ।

End :

एवं भास्करसमाराधनं कुर्यात्तदा गृही पापक्षयार्थी व्याधिविमो-

चनार्थी मोक्षार्थी विद्यार्थी सूर्यस्यैवं सायुज्यं सरूपतां सलोकतामश्नुते नमः शौनकाय नमः शौनकाय ॥

Colophon:

इति महासौरखण्डस्समाप्तः ॥

No. **8027.** मातङ्गीकल्पः.

MĀTAṄGĪKALPAḤ.

Pages, 44. Lines, 14 on a page.

Begins on fol. 123*a* of the MS. described under No. 5673.

Incomplete.

Paṭalas 29 (wants beginning) to 40 in Tripurāsiddhānta.

Deals with the importance and use of the Mātaṅgīmantra and also the details connected with the repetition of that Mantra.

२९. मातङ्गीमन्त्रमाहात्म्यम्.
३०. मातङ्गीमन्त्रोद्धारः.
३१. मातङ्गीपूजाविधानम्.
३२. मातङ्गीमन्त्रमाहात्म्यस्तवराजकथनम्.
३३. बलिविधानम्.
३४. वश्ययोगकथनम्.
३५. सम्पत्प्रयोगकथनम्.
३६. विद्याप्रयोगकथनम्.
३७. सर्वप्रयोगकथनम्.
३८. उच्छिष्टमातङ्गीमन्त्रमाहात्म्यम्.
३९. वागीश्वरीमन्त्रमाहात्म्यम्.
४०. नकुलीश्यामापादुकामन्त्रोद्धारः.

Beginning:

सर्वकामप्रदा विद्या मातङ्गया इयमेव हि ।
इयमेव महाविद्या मातङ्गी जगदीश्वरी ॥
सर्वेषामार्तिशमनी सर्वपापविनाशिनी ।
सर्वदारिद्र्यसंहर्त्री सर्वलोकवशङ्करी ॥

* * * *

श्रीपार्वत्युवाच—

देवदेव महादेव मातङ्गीमन्त्रमुत्तमम् ।
कामदं श्रोतुमिच्छामि कथयेष्टप्रदं मम ॥

श्रीदक्षिणामूर्तिरुवाच—

श्रीमातङ्ग्या मनुं वक्ष्ये भक्तानामिष्टदायकम् ।
यस्य श्रवणमात्रेण जायते कान्तिरुत्तमा ॥

End:

एषा श्रीपादुका प्रोक्ता सर्वपापविनाशिनी ।
नकुल्यनन्तरं देवि जपेच्छ्रीगुरुपादुकाम् ॥
एतच्छ्रीनकुलीमन्त्रमाहात्म्यं कथितं मया ।
समासेन महादेवि किं पुनश्श्रोतुमिच्छसि ॥

Colophon:

इति श्रीमहात्रिपुरासिद्धान्ते नकुलीश्यामापादुकामन्त्रोद्धारो नाम चत्वारिंशः कल्पः ॥

No. **8028.** मातृकामन्त्रभजनम्.
MĀTṚKĀMANTRABHAJANAM.

Pages, 6. Lines, 9 on a page.

Begins on fol. 103*a* of the MS. described under No. 5683.

Incomplete.

Gives the nature of the Mantra, Yantra, Nyāsa, etc., in relation to the Mātṛkāmantra which is addressed to Sarasvatī and is made up of the letters of the alphabet.

Beginning:

एवं प्रणवं प्रतिपद्य परं ब्रह्म नामप्रपञ्चोपादानमातृकामन्त्राख्यशब्दब्रह्माकारे विवर्तत इति मातृकामन्त्रभजनप्रकारः संक्षिप्योच्यते—

* * * *

तस्य शिरसि सूर्यसोमात्मकममृतरसघनीभूतं मातृकायन्त्ररूपं शुभ्रपद्मं स्मृत्वा मूलाधारमारभ्य मस्तकपर्यन्तम् ।

End :

अक्षस्रजं बीजपूरं कपालं पङ्कजं करैः ।
वहन्ती हेमसङ्काशा महालक्ष्मीस्समीरिता ॥
एताभिर्मातृकाभिश्चतुर्थावरणम् । तत इन्द्रादिभिः पञ्चमम् । एवम् ॥

No. 8029. मातृकासन्ध्याविधिः.
MĀTṚKĀSANDHYĀVIDHIḤ.

Pages, 8. Lines, 7 on a page.

Begins on fol. 170*a* of the MS. described under No. 745, wherein this has been given as Nāmapārāyaṇa.

Complete.

Describes the method of performing certain ablutions by the use of the letters of the alphabet, as a preliminary rite to the repetition of the Śrīvidyā.

Beginning :

तत्र विधिवदाचम्य मूलविद्यया शिखायां बद्ध्वा तयैव प्राणायामत्रयं कृत्वा मूलविद्यया ऋष्यादिकरषडङ्गन्यासान् विधाय धेनुमुद्रया जलममृतीकृ(त्य मूल) विद्ययाष्टधा[भिर]भिमन्त्र्य तेन जलेन कुशैरकारादिक्षकारान्तैस्सबिन्दुभिर्मातृकाक्षरैः प्रत्यक्षरं स्वशिरसि प्रोक्ष्य मूलविद्यया च त्रिः प्रोक्ष्य सूर्यमण्डले देवीं यथोक्तरूपां ध्यात्वा दक्षिणहस्तेन जलमादाय लं वं यं रं हमिति पाञ्चभौतिकैः मन्त्रैस्सप्तवारमभिमन्त्र्य विद्यया च त्रिरभिमन्त्र्य ।

End :

पूर्ववत्कृतां मूलविद्यामष्टोत्तरशतं जपेत् । प्राणायामपूर्वकं दीपं देव्यै निवेद्य स्तुत्वा देवीं परमाकाशात् सहस्रदलकमले उद्वास्य कामरूपमात्मानं विभावयेत् ॥

Colophon :

इति तुर्यसन्ध्याविधिः ॥

No. 8030. माहेश्वरीमन्त्रकल्पः.
MĀHĒŚVARĪMANTRAKALPAḤ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 29*b* of the MS. described under No. 2854.

Complete.

67th Adhyāya of Ākāśabhairavakalpa.

On the details connected with the repetition of the Mantra which is addressed to Māhēśvarī, one of the seven Mātṛdēvatās. This Mantra is considered to have the power of bestowing on one prosperity and success in life.

Beginning:

माहेश्वर्यास्तु मन्त्रस्य तथा रुद्र ऋषिः स्मृतः ।
छन्दस्तु देवी गायत्री देवता सा महेश्वरी ॥
भुवो बीजं ततः शक्तिर्गायत्री स्वेष्टयोगकम् ।
न्यासादिकं यथापूर्वं ध्यानपूर्वमिहोच्यते ॥

End:

मध्ये शक्ति भुवश्च प्रणवमथ वसोः पत्रके मन्त्रवर्णं
बाह्ये भूःस्वर्महादीन् ऋतुगृहविवरे षोडशारे स्वरश्च ।
बाह्ये चूडाख्यमन्त्रं कचटतपयशं मूलमन्त्रश्च तारं
साविञ्या यज्ञमेतत् सकलविजयदं सर्वसौभाग्यमेतत् ॥

Colophon:

इत्याकाशभैरवकल्पे माहेश्वरीमन्त्रं नाम सप्तषष्टितमोऽध्यायः ॥

No. 8031. मृत्युञ्जयकल्पः.
MṚTYUÑJAYAKALPAḤ.

Substance, palm-leaf. Size, $13\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 5. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 12*b*. The other work herein is Rudrayāmala

Complete.

On the method of performing Hōma with the Mṛtyuñjaya-Mantra, which is considered to have the power of warding off the influence of evil-spirits and of removing chronic diseases.

Beginning:

अथातो मृत्युञ्जयकल्पं व्याख्यास्यामः—

कृत्याद्रोह आभिचारे दीर्घरोगे ग्रहपीडायां . . . . संवत्सरे संवत्सरे वाचार्यवरणं कृत्वा स्वयं वायुष्कामः कारयेत् । स्नात्वा पुण्याहं वाचयित्वा प्राणानायम्य . . . . मृत्युदेवताप्रीत्यर्थं प्रपञ्चसारे बोधायनोक्तप्रकारेण महामृत्युञ्जयहोमं करिष्ये ।

End:

जठरमभिमृशति । यत इन्द्र भयामहे स्वस्तिदा विशस्पतिरिति द्वाभ्याम् । गुरवे प्रतिमावस्त्रादिदक्षिणां दत्वा ऋत्विग्भ्यो दक्षिणां दत्वा ब्राह्मणान् भोजयेदपूपैः सक्तुभिर्घृतपायसेन च । एवमेकरात्रं त्रिरात्रं पञ्चरात्रं सप्तरात्रं वा कृत्वापमृत्युञ्जयतीत्याह भगवान् बोधायनः ॥

No. 8032. मृत्युञ्जयकल्पः.
MṚTYUÑJAYAKALPAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 113*b* of the MS. described under No. 2898.

Complete.

Similar to the above.

Beginning:

अथातो मृत्युञ्जयकल्पविधिं व्याख्यास्यामो जन्मनक्षत्रे पुण्यनक्षत्रे त्रिजन्मसु ब्राह्मणानन्नेन परितोष्य पुण्याहं वाचयित्वा ।

End:

तच्छंयोरावृणीमह इति बलिं ददाति । धेनुं वृषभमनड्वाहं हिरण्यं कांस्यं वा वासो वा पुनर्मृत्युं जयतीत्याह भगवान् बोधायनः ॥

Colophon:

इति मृत्युञ्जयहोमः ॥

No. **8033.** यक्षिणीकल्पः.

YAKṢINĪKALPAḤ.

Pages, 19. Lines, 24 on a page.

Begins on fol. 88*b* of the MS. described under No. 5629.

Complete.

On the details connected with the repetition of a Mantra addressed to certain Yakṣiṇīs.

Beginning:

अथातस्सम्प्रवक्ष्यामि यक्षिणीकल्पमुत्तमम् ।
सर्वसिद्धिकरं दिव्यं सर्वक्लेशविनाशनम् ॥
आदौ च सुन्दरी देवी शुभा पद्मावती ततः ।
तृतीयं चन्द्रवदना चातुर्थी मोहनी परा ॥

* * * *

एतत्ते ख(क)थितं देवि रहस्यं सर्वकामदम् ।
स(न)शिष्याद्यैः(य)प्रदातव्यं किं वान्यच्छ्रोतुमिच्छसि ॥

Colophon:

इति ब्रह्मयामले षट्सहस्र्यां वारुणसंहितायां शिवदेवीसंवादे रहस्यप्रकरणे एकोनविंश[ति]ः पटलः ॥

End:

ओं ह्रीं आगच्छागच्छ पुनरागमनाय स्वाहा ।

इत्युद्वासनम् । इति जपपूजादिकं सर्वासामेकप्रकारः । सर्वमन्त्रा स्तारका मायादिकाः ॥

Colophon:

इति यक्षिणीसिद्धशाबररहस्यसाधनविद्या समाप्ता ॥

No. **8034.** यक्षिणीप्रयोगः.

YAKṢIṆĪPRAYŌGAḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 62*a* of the MS. described under No. 5686.

Complete.

On the method of propitiating certain Yakṣiṇīs by the repetition of certain prescribed Mantras, and by Hōmas, etc.

Beginning:

अथ सिद्धयक्षिणीप्रयोग :—

मनुः—वानावति पद्मवति स्वाहा ।

ग्रामाद्बहिः वने वेदिकां कृत्वा तत्र कलशस्थापनादिकं कृत्वा पुनश्चरविधिं कुर्यात् । यथाविधि तर्पणावाहनादिकं कुर्यात् । तत्र प्रतिदिने षोडशनिष्कं दीयते । किं चाष्टमहासिद्धिः भवति । शुक्लपक्षप्रतिपद्दिनमारभ्य पर्वपर्यन्तं प्रतिदिनं सहस्रत्रयजपं कुर्यात् । अथ अष्टमहासिद्धिप्रयोगः ।

End:

अथ बन्धमोक्षयक्षिणीप्रयोगः—

ओं नमो हाटके कुमारि स्वाहा । सहस्रत्रयं प्रतिदिनं सप्ताहं कुर्यात् घृतहोमं कन्यकाभोजनम् । अथ अदृश्ययक्षिणीप्रयोगः—ओं कनकवति करवीरक स्वाहा । कृष्णाष्टमीमारभ्य पर्वपर्यन्तं प्रतिदिनं सहस्रत्रयजपं कुर्यात् । निम्बसमिद्धोमः । भस्मतिलकं कुर्यात् । अदृश्यं भवति ॥

No. **8035.** यक्षिणीमन्त्रविधानम्.

YAKṢINĪMANTRAVIDHĀNAM.

Pages, 4. Lines, 7 on a page.

Begins on fol. 34*b* of the MS. described under No. 7991.

Incomplete.

Similar to the above; but this Mantra relates to certain other Yakṣiṇīs.

Beginning:

अथ यक्षिणीमन्त्रविधानमाह—

पूर्वासां यक्षिणीनां तु कुर्यात् (कार्यं) समीहितम् ।
भगिनीमातृपुत्रिस्त्रीरूपतुल्यं यथेप्सितम् ॥
लक्षमेकं जपेन्मन्त्रं वटवृक्षतले शुचिः ।
बन्धूककुसुमैः पश्चात् मध्वाज्यक्षीरमिश्रितैः ॥

End:

ओं प्रभूते सुहि(वि)लोचने ब्लूं ब्लूं.

No. **8036.** यक्षिणीमन्त्रविषयः.

YAKṢIṆĪMANTRAVIṢAYAḤ.

Pages, 15. Lines, 7 on a page.

Begins on fol. 18*a* of the MS. described under No. 7991.

Wants beginning.

Similar to the above.

Beginning:

. . . . . मशेषवलित्रयात्मं तव मध्यमम्बा ॥
नलिनोत्पलानां श्रियमावहन्तीं कान्त्याः कटाक्षैः कमलाकराणाम् ।
कदम्बमालाञ्चितकेशपाशां मातङ्गकन्यां हृदि भावयामि ॥

* * * *

लक्षत्रयं ततस्सिद्धा देवी स्याद्वटयक्षिणी ।
वस्त्रालङ्करणं दिव्यं रसं सिद्धं रसायनम् ॥
दिव्याञ्जनं च सा तुष्टा साधकाय प्रयच्छति ।
ओं ह्रीं वटवासिनि यक्षकुलप्रसूते वटयाक्षिणि एह्येहि स्वाहा ।

End:

निवेश्य तद्गृहं ध्यायन् नन्दं भैरवनिस्वनम् ।
अन्तरिक्षचरे देवि सर्वाभरणभूषिते ॥

उलूकरूपे सुभगे पक्षिदेवि निशाचरि ।
शिशुं विकारामुश्चाद्य प्रगृह्णाण बलिं त्वमिति ॥
इमं मन्त्रं समुच्चार्य सन्ध्याकाले बलिं क्षिपेत् ।
*　　　*　　　*　　　*
क्षीरोदकपालं क्षीरान्नादस्ततोऽपरोऽञ्चलः ।
अन्नादश्चाप्यपरस्मात् ग्रहपूजायतद्विधाप्रायः ॥ (?) ॥

Colophon:

इति समाप्तः ॥

No. **8037.** यन्त्रकच्छपुटम् .

YANTRAKACCAPUṬAM.

Pages, 50. Lines, 5 on a page.

Begins on fol. 145*a* of the MS. described under No. 6685.

Complete.

Describes the Yantras relating to certain Mantras and gives out the effects that may be produced by repeating Mantras at different hours of the day.

Contains 12 pages of commentary in Telugu at the end.

Beginning:

अन्यमतम्–

यस्मिन्कस्मिन्नृनां कार्यं मन्त्राणां साधनं शुभम् ।
पूर्वाह्णे वश्यपौष्टयर्थं मध्याह्ने प्रीतिनाशनम् ।
उच्चाटमपराह्णे तु सन्ध्यायां मारणं तथा ।
शान्तिकं चार्धरात्रे तु ततो(दू)र्ध्वं सर्वकर्म च ॥

End:

मन्त्रः—

ओं नमो नारायणाय चिन्तामणिबीजम् । हरमन्त्रः—नीलकण्ठाय . . . . . बीजम् । मन्त्रः . . . .

Colophon :

यन्त्रकच्छपुटं समाप्तम् ॥

No. 8038. यन्त्रकल्पचिन्तामणिः.

YANTRAKALPACINTĀMAṆIḤ.

Substance, palm-leaf. Size, 14⅞ × 1⅜ inches. Pages, 116. Lines, 8 on a page. Character, Grantha. Condition, slightly injured Appearance, new.

Complete.

On the method of drawing the various Yantras and of writing in them the Sādhyanāmans, *i.e.*, the names of persons whom the Mantra in question is intended to affect. The work is said to have been compiled by Dāmōdara, son of Gaṅgādhara.

A number of diagrams of the Yantras described in the work is given on fols. 34 to 57.

The following is a list of the Yantras dealt with in this work :—

I. वश्याधिकारः.

१. महामोहनम.
२. राजकोपशमनबीजसम्पुटम्.
३. यावज्जीवं स्वामिवश्यकरणम्.
४. दिव्यस्तम्भः.
५. राजमोहनम्.
६. दुष्टवश्यकरमृत्युञ्जयः.
७. विवादविजयः
८. धनिकवशीकरणम्.
९. दुष्टमोहनम्.
१०. विवादविजयः.
११. वश्यकरगाणपत्यम्.
१२. जनवश्यकरणम्.
१३. जगद्वश्यम्.
१४. भृत्यवश्यकरपिशाचिका.
१५. क्रूरवशीकरणकालानलचक्रम्.
१६. दुष्टवशीकरणोच्छिष्टपिशाचिका.
१७. सानुकूलकण्टकम्.
१८. क्रोधशमनजामदग्न्यम्.
१९. सौभाग्यदललिताख्यानम्.
२०. सौभाग्यकरणम्.
२१. स्त्रीवशीकरणकामराजः.
२२. मदनमर्दनम्.
२३. राजबालवश्यकामाख्यः.
२४. सौभाग्यजननम्.
२५. सौभाग्यजनककमला.

II. आकर्षणाधिकारः

१. माणिभद्रम्.
२. मित्रदर्शनम्.
३. त्रैपुरम्.
४. ललनातुष्टिकरकामराजः.
५. मानिन्याकर्षणम्.

III. स्तम्भनाधिकारः

१. शत्रुमुखगतिस्तम्भनम्.
२. यात्रास्तम्भनम्.
३. प्रतिवादिमुखमुद्रणम्.
४. शत्रुमुखस्तम्भनम्.
५. अग्निस्तम्भनम्.
६. अग्निनिवारणम्.
८. यात्रास्तम्भनम्.
७. शत्रुमुखस्तम्भनम्.
९. पिशुनगतिमतिवाग्बन्धनम्.

IV. विद्वेषणाधिकारः

१. नरनारीदौर्भाग्यवर्धनम्.
२. सर्वविद्वेषणम्.
३. बन्धुविद्वेषणम्.
४. स्वामिभ्रातृविद्वेषणम्.
५. जगद्विद्वेषणम्.

V. मारणाधिकारः

१. सर्वशत्रुमारणम्.
२. प्रबलमारणम्.
३. देशान्तरस्थशत्रुमारणम्.
४. सर्वजीवमारणम्.
५. नरनारींमारणम्.

VI. उच्चाटनाधिकारः

१. शत्रूच्चाटनम्.
२. सर्वदेह्युच्चाटनम्.
३. सद्यउच्चाटनम्.
४. देशान्तरोच्चाटनम्.
५. नार्युच्चाटनम्.
६. त्रिलोकोच्चाटनम्.
७. त्रिलोकोच्चाटनम्.

VII. शान्त्यधिकारः

१. शान्तिपुष्टिकरणम्.
२. व्याघ्राद्युपद्रवनिवारणम्.
३. वन्ध्यागर्भधारणम्.
४. भूतज्वरनाशनम्.
५. बालरक्षाकरणम्.
६. ज्वरनाशनम्.
७. शीतज्वरप्रशमनम्.
८. ज्वलनकामरक्षाकरणम्.
९. अपस्मारादिदोषहरणम्.
१०. सर्पस्तम्भनगरुडभाषितम्.
११. भूतत्रासनम्.
१२. ज्वरनाशनम्.
१३. गर्भरक्षाकरणम्.
१४. सुखप्रसूतिकरणम्.
१५. तृतीयज्वरनाशनम्.
१६. सर्वरक्षाकरसौभाग्यवर्धनम्
१७. द्यूतविजयः.
१८. बन्धमोक्षः.
१९. भवविमोचनम्.
२०. दुष्टसत्त्वमोचनम्.

VIII. बन्धिमोक्षाधिकारः

१. बन्धमोक्षणम्.
२. निगलबन्धमोक्षः.
३. बन्धमोक्षणम.

Beginning:

यं ध्यायन्त्यसुरास्सुराश्च निखिला यक्षःपिशाचोरगाः
राजानश्च तथा मुनीन्द्रानिवहास्स(वार्थसांसिद्ध)ये ।
भक्तानां वरदाभयप्रदकरं पाशाङ्कुशालङ्कृतं
चक्रविदुग्ध(श्चचामरवीज्य)मानमनिशं सोऽहं (श्रये शङ्करम) ॥
संभा(सा)रदुस्सा(ःखा)न्मुनिपुङ्गवान्यो(द्यो)
बुद्ध्याय(जग्राह) मन्त्रैश्च (न्त्रांश्च)दुरासहोजाः ।
जाज्वल्यमानो दिवि दृश्य (ते य-
स्स) भार्गवो मामवतश्च रसम् (ताच्छरण्यः) ॥
यस्य प्रसादाद्बलिनो भवन्ति जानान्ति दैत्या विविधां च मायाम् ॥
यो लब्धवान्मन्त्रवरं षडर्णं मृत्युञ्जयं देववरात् गणेशात् ॥

जालन्धरे पीठवरे प्रसिद्धे (प्रत्यक्ष) रूपा भुवि वर्तते या ।
स्तो(गो)त्रे तस्मिन् वेदविद्याप्रवीणो योन्या(ऽत्रा)जैषीन्नास्तिकान् वेदबाह्यान्॥
(तस्यान्ववा) ये पण्डितोऽहं नृसिंहो ज्वालामुखीं नौमि महाप्रभावाम् ।
यां योगमायां परमार्थविद्यां (विशे) षपूज्यां भृगुवंशजरना(जाना)म् ॥
तस्यात्मजेद्यत् (जस्स्यात्) भुवि धर्मशीलो नाम्ना महादेव इति प्रसिद्धः ।
निसर्गवैराभुव(रं प्रजहस्तु सत्त्वा यं प्राप्य दुष्टाहितरक्षुकादथ(यः) ॥

तस्मादासीत्सुमतिविकासि(सी)देवन्त(दत्तः) कलावान्
मान्यो (राज्ञां) सदसि विदुषां गम्यगङ्गाप्रवाहाम् ।
उत्कल्लोलां दिशि दिशि जनाः कीर्तिपीयूषसिन्धुं
यस्याद्यापि श्रवणचुलकैः कुञ्चिताक्षाः पिबन्ति ॥
गङ्गाधरस्त(त्त)नयो बभूव विवेकगाम्भीर्यगुणैरुदारः ।
यं प्राप्य लक्ष्मीश्च सरस्वती च तत्याज युग्मं स्थिरतां न नूनम् ॥
दामोदरस्सर्वकलाप्रवीणस्तस्मादभूच्छ्रीगणनाथभक्तः ।
लब्धप्रतिष्ठो गुरुदेवभक्तो मान्यस्सदा धर्मपरायणो वा ॥
दृष्ट्वानेकशिवागमांश्च विविधैरालोक्य सौरागमै —
र्देवीशास्त्रसमागमांश्च विविधानालोक्य विस्तारतः ।
कर्तुं वाञ्छति सङ्ग्रहं सुमतिमान् दामोदरस्स स्वयं
लोकानां च हिताय यन्त्रनिकरं मन्त्रेण युक्तं स्फुटम् ।
प्रेरितश्चन्द्रचूडेन स्वप्नेन द्विजपुङ्गवाः ।
चकार कल्पं यन्त्राणां चिन्तामणिरिति स्फुटम् ॥

* * * *

चिन्तामणौ यन्त्रवरे सुकल्पे श्रीचन्द्रचूडस्य मुखाद्विनिर्गते ।
तस्मिन् हि चाद्याखिलपीठिकेयं कृता हि दामोदरपण्डितेन ॥

Colophon :

इति श्रीयन्त्रचिन्तामणौ महाकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे दामोदरपण्डितोद्धृते प्रथमपीठिका समाप्ता ॥

* * * *

तस्मिन् महाकल्पवरे सुसम्यक् गतस्समाप्तिं प्रथमोऽधिकारः ।
सद्यन्त्रचिन्तामणिसर्वसिद्धिदे श्रीचन्द्रचूडस्य मुखाद्विनिर्गते ॥
तस्मिन्तृतीयाखिलपि(पी)ठिकायामिमं च दामोदरपण्डितस्सुधीः ।
वश्याभिधानं प्रथमाधिकारं शृणोति यो भक्तियुतो मनुष्यः ॥
तस्याशु देवो भगवान् सदाशिवो ददाति लक्ष्मीं विपुलां च बुद्धिम् ।

Colophon:

इति वश्याधिकारस्समाप्तः ॥

* * * *

Colophon:

इति यन्त्रचिन्तामणौ महाकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे चतुर्थपीठिकायामाकर्षणाधिकारः समाप्तः ॥

* * * *

Colophon:

संस्तम्भनं नाम ततस्तु पूर्णं कृतं तृतीयं च महाप्रभावम् ।
नवैव यन्त्राणि महाधिकारे रहस्यभूतानि तु कीर्तितानि ॥
इति स्तम्भनाधिकारस्तृतीयस्समाप्तः ॥

End:

एवं कृते तृतीयेऽह्नि मुच्यते नात्र संशयः ।
विवरस्थोऽपरुद्धो वा गूढस्थोऽपि स मुच्यते ॥

Colophon:

इति बन्धिमोक्षाधिकारे तृतीयं यन्त्रम् ॥

चिन्तामणौ यन्त्रवरे सुकल्पे श्रीचन्द्रचूडस्य मुखाद्विनिर्गते ।
तस्मिंस्तु पीठे किल षष्ठकेऽयं चकार दामोदरविप्रवर्यः ॥

* * *

वश्याभिधानं प्रथमं द्वितीयमाकर्षणं स्तम्भनकं तृतीयम् ।
विद्वेषणं मारणकं ततश्च उच्चाटनं शान्तिकरं [च]समाप्तम् ॥

बन्धिप्रसादं[जननं] सुमहत्प्रभावमत्यन्तमुच्चाटकरं च तद्वत् ।
अष्टाधिकारं प्रवदन्ति कल्पचिन्तामणिं देववरैस्सुपूजितम् ॥

* * * *

ओं ऐं उन्मत्तं कुरु कुरु वार्तालि मम शत्रूनुच्चाटय हुं नाशय नाशय विषेध विषेध हुं फट् स्वाहा आं ह्रीं क्रों क्रं क्ष्रां चैव चतुरश्र-कुशे ॥

सप्तम्यां तु वर्षेऽस्मिन् बहुधान्यके दक्षिणायनकृष्णपक्षे स्थिरवासरे लिखितो मासि धनुर्नामके रामभद्रस्य सुतेन सुब्रह्मण्येन चिन्तामणि-ग्रन्थः सुब्रह्मण्यसुतरामलिङ्गस्य लिखितः ॥

No. 8039. यन्त्रचिन्तामणिः.

YANTRACINTĀMAṆIḤ.

Pages, 16. Lines, 18 on a page.

Begins on fol. 5*b* of the MS. described under No. 6045, and not on fol. 1*a* as shown therein.

Contains the 11th and 19th Yantras of Vaśyādhikāra, the 8th Yantra of Stambhanādhikāra, the 10th and 17th Yantras of Śāntyadhikāra, and Yantras 2 to 5 of Māraṇādhikāra.

Same as the above. Gaṇapatimālā and Hanumatkavaca are also given.

No. 8040. यन्त्रचिन्तामणिः.

YANTRACINTĀMAṆIḤ.

Pages, 9. Lines, 7 on a page.

Begins on fol. 13*b* of the MS. described under No. 7991.

Contains the first Pīṭhikā complete and the second incomplete.

Same as the above.

No. 8041. यन्त्रचिन्तामणिः.
YANTRACINTĀMAṆIḤ.

Substance, palm-leaf. Size, 9¼ × 1¼ inches. Pages, 79. Lines, 5 on a page. Character, Canarese. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Nṛsiṁhatāpanīyōpaniṣad 41*a*.

Complete.

Similar to the above.

Beginning:

ईश्वर्युवाच—

वेदशास्त्राणि चोक्तानि मन्त्रयन्त्राणि वै त्वया ।
पुनश्चरणबाहुल्यात्तेषां सिद्धिस्तु दुर्घटा ॥
ततः काले मनुष्याणामप्रयासेन दुर्लभा ।

End:

इक्षुकोदण्डधारक कुसुमबाणेन हन हन स्वाहा ।
लक्षमावर्तयेन्मन्त्रमेकलिङ्गशिवालये ॥
दशांशं सगुडं चाज्यं जुहुयादेकमानसः ।
ततो देवी प्रसन्नास्य करोति शुभयन्त्रिणः ॥

Colophon:

इति यन्त्रचिन्तामणिस्समाप्ता ॥
कृष्णस्य पुस्तकम् ॥

No. 8042. यन्त्रविषयः.
YANTRAVIṢAYAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 55*a* of the MS. described under No. 5819.

Consists of one stanza only.

On a certain Yantra described in Nāgārjuna-tantra, the wearing of which is considered to have the power of warding off the influence of evil spirits and of removing the fear of snakes, and other animals, etc.

Beginning and **End :**

नि(नी)लं चापि दयाचले नय विभो खारे परं रागिणां
भूपो नारि भगोदरं चर निभं तानं शतं चोर्जितम् ।
भूतप्रेतपिशाचराक्षसभटैस्सर्पैर्मृगैस्सङ्गरे
शत्रोरग्निभयं च नाशनमिदं नागार्जुने निर्मितम् ॥

No. **8043.** यन्त्रशास्त्रम्.

YANTRAŚĀSTRAM.

Substance, palm-leaf. Size, 8⅝ × 1¼ inches. Pages, 140. Lines, 4 on a page. Character, Telugu. Condition, good. Appearance, old.

This contains the diagrams of the Yantras relating to certain Mantras.

No. **8044.** यन्त्रसङ्ग्रहः.

YANTRASAṄGRAHAḤ.


Pages, 8. Lines, 6 on a page.

Begins on fol. 9*a* of the MS. described under No. 5832.

Incomplete.

Herein are given the diagrams of several Yantras relating to Mantras addressed to Śiva.

Beginning :



End :

अघोर क्लीं क्लीं शिवाय हरिहारचक्रं हरस्य चक्रम् ॥

No. **8045.** यन्त्रसङ्ग्रहः.
YANTRASAṄGRAHAḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 27*a* of the MS. described under No. 5832. Similar to the above.

No. **8046.** यन्त्रसारः.
YANTRASĀRAḤ.

Pages, 39. Lines, 8 on a page.

Begins on fol. 143*a* of the MS. described under No. 6667. Incomplete.

A treatise on Yantra by Dāmōdara.

Beginning:

कुण्डालयत्रिपुरतापनसत्प्रसा(द)·
लेशाप्तवाक्प्रसरवैभवलब्धकीर्तिः ।
आलोड्य चागमशतान्यथ यन्त्रसारं
दामोदरो वितनुते विदुषान्निवेशान् ॥
आलिख्याष्टदलं पद्मं तारन्तत्कर्णिकान्तरे ।
तस्योदरे समिति च जीवं साध्यार्णवेष्टितम् ॥
तारस्य पार्श्वयोर्द्दष्टिः इ ई इति च तत्पुरः ।
जिह्वास्या(प्यां)मिति दिक्ष्वेतान् सो हं हंसार्णकान् बहिः ॥
द्वौ द्वौ सरौ केसरेषु दलेषु त्र्यम्बकाक्षरान् ।
चतुरश्चतुरो बाह्ये वेष्टितं व्यञ्जनाक्षरैः ॥

End:

व्यष्टादशपदं चक्रं लिखेत्कोष्टचतुष्टये ।
मध्ये पाशाङ्कुशं वह्निमध्ये नाम लिखेत्क्रमात् ॥
कोष्ठेष्वानुष्टुभं मन्त्रमीशादि परिलेखयेत् ।
अ(विलिख्या)ष्टदलं कुलैः परितः परिवेष्टितम् ॥

अनेन लभ्यते नष्टामस्थिश्चापि रसातले ।
यस्य हस्तगतश्चक्रं तस्य चोरभयं कुतः ॥
गौरीह.

No. 8047. यन्त्रसारः.
YANTRASĀRAH.

Substance, paper. Size, 13⅜ × 8½ inches. Pages, 348. Lines, 25 on a page. Character, Grantha. Condition, good. Appearance, old.

Incomplete.

Similar to the above.

Beginning:

अथ प्रवक्ष्यामि च वैदिकानि यन्त्राणि संक्षिप्य सतान्त्रिकाणि ।
इष्टाय भक्ताय सुसंयताय शुश्रूषवे शिष्यवराय तावत् ॥
अथ कविरुक्त्वा यन्त्राण्यर्थानपि तत्र तत्र संक्षेपात् ।
स्वयमेव वदति भूयो दुर्ज्ञेयत्वाद्धिताय मन्त्रविदाम् ॥
अनुष्टुभो यन्त्रं लिख्यते—
आलिख्याष्टदलं पद्मं तारं तत्कर्णिकान्तरे ।
तस्योदरे समिति च जीवं साध्यार्णवेष्टितम् ॥

End:

चतुर्दश्याञ्जलिं कुर्यात् पञ्चदश्या प्रदक्षिणम् ।
षोडश्योद्वासनं कुर्यादेवमाराधयेद्धरिम् ॥ इति.

No. 8048. यन्त्राणि.
YANTRĀṆI.

Pages, 8. Lines, 4 on a page.

Begins on fol. 23*a* of the MS. described under No. 6157.
Contains diagrams of certain Yantras.

No. 8049. यन्त्राणि.
YANTRĀṆI.

Pages, 5. Lines, 4 on a page.

Begins on fol. 10*a* of the MS. described under No. 6157.

Complete.

Contains also diagrams of certain Yantras.

No. 8050. यन्त्रोद्धारः.
YANTRŌDDHĀRAḤ.

Pages, 8. Lines, 6 on a page.

Begins on fol. 109*a* of the MS. described under No. 6685, wherein this is shewn as Āñjanēyayantra.

Complete.

Deals with the order of arranging the syllables of the Āñjanēyamantra in the Yāntra relating thereto.

Beginning:

अथ यन्त्रं प्रवक्ष्यामि सर्वकामार्थसिद्धये ।
आदौ चन्द्रं समालिख्य त्रिकोणं वर्तुलं तथा ॥

बहिरष्टदलं पद्मं ततः पार्थिवमण्डलम् ।
तद्बाह्ये भूपुरद्वन्द्वं वज्रकोणसमन्वितम् ॥

End:

तद्दलेषु रामदूताय नमः, वायुपुत्राय नमः, अञ्जनागर्भसुताय नमः—इति लिखेत् । तदुपरि आवर्तं लिखेत् ।

भूकोणचतुष्कोणेषु त्रीन् त्रीन् प्रणवान् विलिखेत् ।
भूकोण आवर्तमध्ये एकाक्षरान् विलिखेत् ।
लं रं वं शं षं यं सं यं अं विलिखेत् ॥

Colophon:

यन्त्रचक्रोद्धारस्समाप्तः ॥

No. 8051. यन्त्रोद्धारप्रकारः.
YANTRŌDDHĀRAPRAKĀRAḤ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 84*a* of the MS. described under No. 139.

Complete.

On the order of arranging the syllables of the Rāmamantra in the Yantra relating thereto.

Beginning:

आदौ षट्कोणमालिख्य वृत्तरेखात्रयं लिखेत् । तदुपरि केसरसहितस्याष्ट दलानि विरचय्य पुनः वृत्तत्रयं कृत्वा पुनः पूर्ववद्दलानि विलिख्य पुनः पूर्ववद्वृत्तपूर्वकं केसराणि द्वादश दलानि विलिख्य पुनः पूर्ववद्वृत्तपूर्वकं केसराणि षोडश दलानि विलिख्य पुनः वृत्तपूर्वकं सकेसराणि द्वात्रिंशद्दलानि विलिख्य ततो भूगृहं विलिखेत् । तत् कथम्? चतुरश्रं रेखात्रयसमन्वितं द्वारोपेतं वज्रशूलाढ्यं मेषराश्यादि वल्ल्यादिविभूषितं फणिसंयुतम् ।

End:

रामं प्रसन्नवदनं सर्वाभरणभूषितम् ।
एवं श्रीराघवं ध्यात्वा जीवन्मुक्तिर्न संशयः ॥

Colophon:

रामयन्त्रं सम्पूर्णम् ॥

No. 8052. रक्तचामुण्डीमन्त्रकल्पः.
RAKTACĀMUṆḌĪMANTRAKALPAḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 17*b* of the MS. described under No. 2854 and not on 18*b* as shewn therein.

Complete. 39th Adhyāya of Ākāśabhairavakalpa.

Deals with the Yantra, etc., relating to the Raktacāmuṇḍīmantra.

Beginning:

श्रीशिव उवाच—

वक्ष्यामि रक्तचामुण्डि महासिद्धिप्रदायकम् ।
निग्रहानुग्रहाकर्षदक्षमद्भुतमोहिनि ॥
मन्त्रस्य रक्तचामुण्डी(ण्ड्या) ऋषिः शङ्कर उच्यते ।
छन्दोऽनुष्टुप् तथा रक्तचामुण्डी देवताम्बिके ॥

* * * *

श्रीं ह्रीं फट् रक्तचामुण्डीश्वरि शत्रुजीवविनाशिनि एह्येहि शीघ्रमिष्टानाकर्षयाकर्षय स्वाहा ।

* * * *

वृत्तं च सप्तच्छदमष्टपत्रं ततः परं सप्तदशाश्रकं च ।
मध्ये द्विबीजं क्रमशस्तु मन्त्रं दलेषु साध्यं परितो द्विबीजम् ॥
एतत्तु रक्तचामुण्डीयन्त्रमाकर्षमोहयोः ।

End:

तथा भवतु चामुण्डी ततस्सा त्वं प्रसीद मे ।
इति दृष्ट्वा ततो देवि दत्ताभयकराम्बुजे ॥
अङ्गुलीयं च गृह्णीयात्तस्य हस्ताब्जसंस्थितम् ।
ततस्स्वेच्छाक्रियां कुर्यान्नित्यालङ्कृतविग्रहः ॥

Colophon:

इत्याकाशभैरवकल्पे रक्तचामुण्डीमन्त्रं नाम एकोनचत्वारिंशोऽध्यायः ॥

No. **8053.** रसरत्नाकरः (मन्त्रकाण्डः).

RASARATNĀKARAḤ (MANTRAKĀṆḌAḤ).

Pages, 156. Lines, 21 on a page.

Begins on fol. 1*a* of the MS. described under No. 5629.

By Nityanāthasiddha.

A work on the details of procedure to be adopted with a view to making the repetition of certain Mantras effective.

Contains the following Paṭalas :—

१. मन्त्रसाधनम्.
२. सर्वजनवश्यम्
३. राजवश्यम्.
४. स्त्रीवश्यम्.
५. पतिवश्यम्.
३. आकर्षणम्.
७. अग्न्यादिस्तम्भनम्.
८. अशनिस्तम्भनम्.
९. मोहनोच्चाटनकथनम्.
१०. मारणविधिः.
११. विद्वेषादिव्याधिकरणम्.
१२. मन्त्रीकरणम्.
१३. कौतुकयोगः.
१४. यक्षिणीमन्त्रसाधनम्.
१५. सर्वाञ्जनादिसाधनम्.
१६. ज्ञातनिधिग्रहणम्.
१७. अदृश्यकरणम्.
१८. पादुकासाधनम्.
१९. अमृतसञ्जीविनीविद्या.
२०. औषधविन्यासक्रमः.

Beginning :

रसरत्नाकरे मन्त्रकाण्डः—

संसारे बहुविस्तीर्णे विद्याशक्तीरनेकधा ।
प्रोक्तवान् शङ्करः पूर्वं पृच्छन्तीं पार्वतीं प्रति ॥
* * * *
शोषितेऽपि न सिद्धिश्चेत् दाहयन् योनिबीजतः ।
आग्ने(ये)नैव बीजेन मन्त्रमालिख्य धारयेत् ॥
कण्ठदेशे तथा मन्त्री सिद्धिस्स्याच्छङ्करोदितम् ।
इत्येवं सर्वमन्त्राणामुपायश्शम्भुनोदितः ॥

Colophon :

इति सिद्धनागार्जुनविरचिते कच्छपुटे मन्त्रसाधनं नाम प्रथमः पटलः ॥

End :

अदृश्यो जायते सद्यो देवैरपि न दृश्यते ॥
दिग्वेदमुनिकामैश्च ह्यङ्कलीतैलपेषितैः ।
पुष्यभास्करयोगेन त्रिलोहेन तु पेषितैः ॥

मूर्ध्नि स्वे खेचरत्वं स्याद्योजनानां शतावधि ।
एते सर्वमहायोगाश्चण्डीमन्त्रेण सिद्धिदाः ॥

Colophon:

इति श्रीपार्वतीपुत्रनित्यनाथसिद्धविरचिते रसरत्नाकरे मन्त्रखण्डे साङ्गोपाङ्गकच्छपुटप्रकरणं नाम विंशति(तम): पटलः ॥

No. 8054. रहस्यतन्त्रः.
RAHASYATANTRAḤ.

Pages, 106. Lines, 21 on a page.

Begins on fol. 1*a* of the MS. described under No. 3895.

Incomplete.

The portion of this work as found in this MS. deals with the manner of pronouncing the Cidambaramantra and with the details relating to the repetition thereof.

Beginning:

चिदम्बरमनुं वक्ष्ये उपदेशानुसारतः ।
प्रयोगानपि तस्यात्र प्राणशक्तिमनुं पुरा ॥
क्लीं कामबीजमुच्चार्य पूर्वमेहियुगं वदेत् ।

* * * *

चिदम्बरनटेशाख्यमहामन्त्रस्य सर्वदा ।
ऋषिस्सदाशिवश्छन्दो महापूर्वो विराट् भवेत् ॥
पूर्वोक्तो देवता प्रोक्ता हङ्कारं बीजमुच्यते ।
सश्शक्तिः कीलकं मं स्यान्मोक्षार्थे विनियुज्यते ॥

End:

ठम् वायानमशि स्तम्भय फट् इदं षष्टिसहस्रेण सेनास्तम्भनं भवति । मृं मृं खे खे यनमशिवा खे खे मारय खे खे षष्टिसहस्रेण जनमारणं भवति । ओन्नमः क्लीं शिवाय सौः श्रीं सौः ह्रीं इति लक्षजपेन काङ्क्षितं सिध्यति ।

Colophon:

इति वामदेवमुखं समाप्तम् ॥

No. **8055.** रहस्यपटलः.

RAHASYAPAṬALAḤ.

Pages, 15. Lines, 27 on a page.

Begins on fol. 50*b* of the MS. described under No. 2961, and is included in Bhairavayāmala 49*a*, given therein.

Incomplete.

The portion of the work contained in this MS. deals with the manner of conducting the worship in relation to several Mantras, and especially with the manner of lighting the lamp to be used in connection with the repetition of the Durgā-Mantra

Beginning:

ऊर्ध्वपुण्ड्रेक्षुकोदण्डपुष्पसायकसंयुताम् ।
ध्यात्वा सम्भोगदुर्गां तां प्रवक्ष्ये मन्त्रपद्धतिम् ॥
पार्वत्युवाच—दीपदुर्गाविधानम् ।
देवदेव जगन्नाथ करुणाकर शङ्कर ।
दीपदुर्गाविधानाख्यमत्याश्चर्यकरं तथा ॥

* * * *

अत्याश्चर्यकरं लोके मन्त्रमेतत्सुपावनम् ।
अतीतानागतं चैव अशरीरेण उ(तू)च्यते ॥
तन्मन्त्रं च विधानं च पूजां चावेशलक्षणम् ।
वक्ष्येऽहं तव हे देवि खलपातकिनां तथा ॥
न वक्तव्यं न वक्तव्यं न वक्तव्यं कदाचन ।

* * * *

Colophon:

इति रहस्यपटले उमामहेश्वरसंवादे दीपदुर्गाविधानं नामाष्टमः पटलः ॥

इति सर्वमन्त्राणां दीपविधिः ॥ दुर्गामन्त्राणां पुरश्चर्याविधिः ॥

End :

ओं नमो भगवति उच्छिष्टचण्डालि उग्रचण्डालि शक्तिचण्डालि जीवग्राहि मांसग्राहि रक्तपानि वृक्षपोषिणि शत्रुभेदिनि शत्रुभक्षिणि तिमिरि तिमिरि मर्द्द मर्द्द प्राणघातकि भयङ्करि नानाजन्तुजालवृक्षमारिणि स्वाहा.

No. **8056.** रामचक्रन्यासः.

RĀMACAKRANYĀSAḤ.

Substance, paper. Size, 10 × 7 inches. Pages, 16. Lines, 20 on a page. Character, Telugu. Condition, slightly injured. Appearance, new.

Begins on fol. 233*b*. The other works herein are Rāmārcanacandrikā 1*b*, Rāmāvaraṇapūjā 249*b*, Rāmavēdapādastava 262*b*.

Complete.

Deals with the order of arranging the syllables of the Rāma-Mantra in the Cakra called Sītārāma-Cakra, the manner of worshipping it and the details connected with the Nyāsa thereof.

Beginning :

अतः परं प्रवक्ष्यामि सर्वलोकोपकारकम् ।
श्रीराममन्त्रन्यासेऽत्र चक्रन्यासमनुत्तमम् ॥
सीतारामात्मकं चक्रं स्वशरीरे विचिन्तयेत् ।
सीताचक्राणि षट् चात्र रामचक्रचतुष्टयम् ॥
पराश्रितं मेलनं च दशावरणसंज्ञिकम् ।

End :

अनेन न्यासयोगेन साक्षाद्रामो भविष्यति ।
तस्मात् सर्वप्रयत्नेन न्यासं कुर्याद्यथाविधि ॥
चक्रोद्धारश्च पूजा च चक्रन्यासस्तथैव च ।
एकं च यस्य विद्येत सिद्धो(द्धिं) यात्येव नान्यथा ॥

इदं सीतारामरूयं चक्रन्यासमनुत्तमम् ।
गोपनीयं प्रयत्नेन व्याख्यातं ते मया प्रिये ॥

Colophon :

इति श्रीरामचक्रन्यासः संपूर्णः ॥

No. 8057. राममन्त्रोद्धारः.

RAMAMANTRODDHĀRAḤ.

Pages, 4. Lines, 5 on page.

Begins on fol. 3*a* of the MS. described under No. 5864.

Complete.

On the order of arrangement of the syllables constituting the Rāmamantra and on the details of procedure connected with the repetition thereof.

Beginning :

अनन्ताज्ञानवस्वेन्दु (हृद्वह्नि) बीजं रामाय हृन्मनुः ।
षडक्षरोऽयमाश्लिष्टो भजतां कामदो मणिः ॥
ब्रह्मा प्रोक्तो मुनिश्छन्दो गायत्रं देवता मनोः ।
देशिकेन्द्रैस्समाख्यातो रामो रावणमर्दनः ॥
दीर्घभाजा स्वबीजेन कुर्यादङ्गानि षट् क्रमात् ।
ब्रह्मरन्ध्रे भ्रुवोर्मध्ये हृन्नाभ्यङ्गेषु पादयोः ॥

End :

जपादौ साधितं यन्त्रं स्वर्णकट्वादिकल्पितम् ॥
बाहुना विधृतं पश्चाद्विजयश्रीपराक्रमान् ।
गदितं राममन्त्रस्य विधानं मुनिपूजितम् ॥

Colophon :

यन्त्रोद्धारस्समाप्तः ॥

राम श्यामाभिरामं रविशशिनयनं कोटिसूर्यप्रकाशं
दिव्यं दिव्यास्त्रपाणिं शरमुखशरधिं चारुकोदण्डहस्तम् ।
कालं कालाग्निरुद्रं रिपुकुलदहनं विघ्नविच्छेददक्षं
भीमं भीमाट्टहासं सकलभयहरं रामचन्द्रं भजेऽहम् ॥

No. 8058. रुद्रयामलकल्पकौस्तुभः.

RUDRAYĀMALAKALPAKAUSTUBHAḤ.

Substance, paper. Size, $10\frac{5}{8} \times 8\frac{1}{4}$ inches. Pages, 156. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains Paṭalas 1 to 5 and 84 to 89 in Siddhāgamatantra.

On the Pūjā, the Yantra, the order of arrangement of the syllables and other details connected with the Vanadurgāmantra. Certain Mantras addressed to Viṣṇu, Śiva and Śakti are also incidentally given in one of the Paṭalas.

१. वनदुर्गामहाविद्यामन्त्रमाहात्म्यम्.
२. महाविद्यापुरश्चर्याविधिः
३. महाविद्यामन्त्रोद्धारः.
४. महाविद्यायन्त्रोद्धारः.
५. मन्त्रजालोद्धारः.
८४. महाविद्याक्रमः.
८५. महाविद्यापारायणक्रमः.
८६. महाविद्यादिग्बन्धनम्.
८७. वैष्णवशैवशाक्तमन्त्रवर्णनम्
८८. विद्यापारायणक्रमः.
८९. महाविद्यानिरूपणम्.

Beginning:

सर्वेश्वरीं जगद्धात्रीं जगदम्बां परापराम् ।
नमाम्यहं महादेवीं महात्रिपुरसुन्दरीम् ॥

* * * *

वनदुर्गामहाविद्यामन्त्रमाहात्म्यमुत्तमम् ।
कथितन्ते महेशानि किं पुनः श्रोतुमिच्छसि ॥

Colophon:

इति श्रीकल्पकौस्तुभे प्रथमः पटलः ॥

* * * *

महालक्ष्मीमन्त्रमादौ वश्याचामुण्डिकामनुम् ।
एवं बन्धसमायुक्तो महाविद्यां जपेत्प्रिये

Colophon :

इति श्रीरुद्रयामले सिद्धागमतन्त्रे पञ्चमः पटलः ॥

* * * *

एवं कृत्वा च दिग्बन्धमैन्द्रादीर्बन्धयेद्दिशः ।
निगमैरागमैर्मन्त्रै रुद्रबन्धनपूर्वकम् ॥

Colophon :

इति श्रीरुद्रयामले सिद्धागमे तन्त्रे महाविद्योद्धारे चतुरशीतितमः पटलः ॥

End :

सम्यक् संसिद्धमन्त्रस्तु नित्यमेवं समाचरेत् ।
पारायणं नित्यमेकं कुर्वन्मन्त्री विचक्षणः ॥
सुवासिनीं ब्राह्मणं च तर्पयेत्तत्र तत्र तु ।
सर्वसिद्धिमवाप्नोति नात्र कार्या विचारणा ॥

Colophon :

इति श्रीरुद्रयामले पार्वतीपरमेश्वरसंवादे सिद्धागमतन्त्रे महाविद्या-निरूपणं नाम एकोननवतितमः पटलः ॥

No. 8059. रुद्रयामलकल्पकौस्तुभः.

RUDRAYĀMALAKALPAKAUSTUBHAḤ.

Substance, paper. Size, 9⅜ × 7⅜ inches. Pages, 186. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains Paṭalas 1 to 8 and 87 to 89 in Siddhāgamatantra.

Same as the above.

No. 8060. रुद्रयामलम्.

RUDRAYĀMALAM.

Pages, 23. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 8031.

A portion of Rudrayāmala from Dānakalpa to the end of Āliṅganadāna.

Deals with the manner of offering gifts with a view to get rid of fear, sickness, poverty and various other kinds of evil.

Beginning:

शौनको(क्तरुद्रयाम)ळे—

नृपाणां पट्टबन्धानाममात्यानां विशेषतः ।
गृहदोषे समुत्पन्ने मालायोगाद्युपप्लवे ॥
दुस्स्वप्नाद्भुतसत् . . . . . भाद्युपप्लवे ।
बलादिरोधसमये धनमानक्षयादिषु ॥
स्थिते संशयकाले च भयेष्वन्येषु वा यदि ।
छागदानं प्रकुर्वीत तत्तद्भयहरा . . ॥
(अभीष्ट)फलसिद्ध्यर्थं छागदानं समाचरेत् ।
अमारिक्तादितिथिषु व्यतीपाते च वैधृतौ ॥
विष्ट्यां कष्टदिने वापि जन्मर्क्षे वा त्रिजन्मसु ।

End:

ये तु रोगाः प्रबाधन्ते दातुस्ते पापकर्मजाः ॥
तान् रोगान् प्रतिगृह्णामि त्वं जीव शरदः शतम् ।
एवं दानं प्रकुर्वीत व्याधिपीडापनुत्तये ॥
एकवारं द्विवारं वा त्रिवारं वाथ शक्तितः ।
सर्वरोगोपशान्त्यर्थं सत्यं सत्यं शिवोदितम ॥

Colophon:

इति रुद्रयामळे आलिङ्गनदानविधिः ॥

No. **8061.** रुद्रयामलम्.

RUDRAYĀMALAM.

Substance, palm-leaf. Size, 13 × 1⅞ inches. Pages, 15. Lines, 4 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete Forms the 33rd Paṭala of Rudrayāmala and deals with the manner of conceiving in the mind the deities to

whom particular Mantras are addressed. Wants two pages at the beginning.

Beginning:

कम्बुकण्ठीं सुताम्रोष्ठीं मदविह्वललोचनाम् ।
भजेऽहं बगलान्देवीं पीताम्बरवराशि(सि)ना(का)म् ॥
ओन्नमो बगलान्देवीमासवप्रियभामिनीम् ।
भजेऽहं स्तम्भनार्थञ्च गदां जिह्वाञ्च बिभ्रतीम् ॥

End:

ब्रह्मास्त्रमिति विख्यातं त्रिषु लोकेषु दुर्लभम् ।
गुरुभक्ताय साधूनां न देयं यस्य कस्य वै ॥

Colophon:

इति श्रीरुद्रयामले सांख्यायनतन्त्रे मूर्तिन्यासध्याने त्रयस्त्रिंशः पटलः ॥

No. 8062. रुद्रविधानम्.

RUDRAVIDHĀNAM.

Pages, 30. Lines, 5 on a page.

Begins on fol. 42*a* of the MS. described under No. 29.

Incomplete.

On the details connected with the repetition of certain Sūktas addressed to Rudra.

Beginning:

अथातो रुद्रविधानं व्याख्यास्यामः । स्नात्वा सर्वोपद्रवनाशनमिति इषे त्वेति मन्त्रेण दशप्रणवसहितेन खं ब्रह्मान्तेषु याः क्रियाः प्रणवः ब्रह्मा भूर्भुवस्सुवरोम् । भूरसि इति भूमिप्रार्थनं, ये भूतानामधिपतिरिति क्षेत्राधिपतिप्रार्थनम्, चत्वारि शृङ्गेत्यासनं, शिरसा जातवेदस इति कश्यप ऋषिः, जातवेदसाग्निर्दुर्गा देवता, त्रिष्टुप् छन्दः, दुर्गाप्रार्थने विनियोगः । ओं जातवेदसे ।

End:

द्यौश्शान्तिरन्तरिक्षश्शान्तिः पृथिवी शान्तिरापश्शान्तिरोषधयश्शान्तिर्वनस्पतयश्शान्ति(श्शान्ति)रेव शान्तिः । कालाय नमः गन्धं समर्पयामि । कलविकरणाय नमः तिलाक्षतान् . . . . अमुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य अन्यमस्मदिच्छ सा त इत्या नमो निरृते तुभ्यमस्तु क्षां निरृतये रक्षोऽधिपतये खड्गहस्ताय साङ्गहस्तायुधसवाहनसशक्तिपत्नीपुत्रपरिवारसहिताय नमः निरृतिमावाहयामि.

No. **8063**. रेणुकातन्त्रम्.

RĒṆUKĀTANTRAM.

Pages, 8. Lines, 25 on a page.

Begins on fol. 85*a* of the MS. described under No. 5629.

On the details of procedure connected with the repetition of the Mantra addressed to Rēṇuka, the mother of Paraśurāma.

Beginning:

गुरुं गणपतिं दुर्गां वटुकं शिवमच्युतम् ।
ब्रह्माणं गिरिजां लक्ष्मीं वाणीं वन्दे विभूतये ॥

ईश्वर उवाच—

शृणु देवि प्रवक्ष्यामि रेणुकामन्त्रमुत्तमम् ।
यस्य विज्ञानमात्रेण सर्वकार्याणि साधयेत् ॥
अस्य रेणुकामन्त्रस्य भार्गवोरुचि (व ऋषि)रुच्यते ।
छन्दोऽनुष्टुप् तथात्युक्ता रेणुका देवताह्वया ॥
क्लां बीजं क्लीं शक्तिः क्लुं कीलकमुदीरितम् ।
सर्वकार्यार्थसिद्ध्यर्थे विनियोगो वरानने ॥

*　　*　　*　　*

Colophon:

इत्येतदमरेश्वरतन्त्रे रेणुकाकल्पे चतुष्षष्टितमोऽध्यायः ॥

End:

ओं श्रीं ह्रीं क्लीं हसखप्रें ऐं महाप्रकटयोगिनि एकवीरके ह्रीं जगन्मोहिनि ह्रीं नागलोकभूलोकादिसत्यलोकानां श्रीं श्रीं शीघ्रमाकर्षिणीं (णि) क्लीं सकलमनोरथाकर्षिणीं(णि) सर्वसिद्धिं कुरु कुरु सौः क्लां आ आ (रेणु)के स्वाहा ॥

Colophon:

इति डामरेश्वरतन्त्रे रेणुकामालामन्त्रस्वरूपं नाम चतुष्षष्टितमोऽध्यायः ॥

No. **8064.** रेणुकातन्त्रम्.

RĒṆUKĀTANTRAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 117*a* of the MS. described under No. 5417.

Complete.

Similar to the above.

Beginning:

अथ यन्त्रम्—

षट्त्रिंशत्कोष्ठसंयुक्तं रेणुकायन्त्रमुत्तमम् ।
लिखित्वा क्लीं च शूलाग्रे साध्यनामाभिसंयुतम् ॥
यन्त्रमध्ये साध्यनाम लिखेत्सर्ववशीकरम् ।

End:

शं स्तम्भे वौषडाकर्षे नमस्सम्पत्तिरेव च ।
स्वाहा शान्तिस्स्वधा पुष्टिः इत्येते मन्त्रपल्लवाः ॥

No. **8065.** लक्ष्मीमन्त्रकल्पः.

LAKṢMĪMANTRAKALPAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 19*b* of the MS. described under No. 2854.

Complete.

Forms the 44th Adhyāya of Ākāśabhairavakalpa.

On the details connected with the Mantra addressed to Lakṣmī.

Beginning :

श्रीशिव उवाच—

लक्ष्मीमन्त्रं प्रवक्ष्यामि सर्वसौभाग्यवर्धनम् ।
आयुष्करं महावश्यममोघं जयवर्धनम् ॥
लक्ष्मीमन्त्रस्य वामेश ऋषिश्छन्दस्तु बृहती ।
महालक्ष्म्याः प्रसादस्य सिद्ध्यै सर्वसमृद्धये ॥
सर्वलोकवशीकारे विनियोगस्तथाम्बिके ।

End :

यो जपेदन्वहं प्रातरष्टोत्तरशतं सुधीः ।
तस्य सर्वसमृद्धिस्स्यात्संशयो नास्ति सुन्दरि ॥

Colophon :

इत्याकाशभैरवकल्पे लक्ष्मीमन्त्रं नाम चतुश्चत्वारिंशोऽध्यायः ॥

No. 8066. लघुचक्रपद्धतिः.
LAGHUCAKRAPADDHATIḤ.

Pages, 6. Lines, 16 on a page.

Begins on fol. 206*b* of the MS. described under No. 424 Complete.

On the measurement to be adopted in regard to Mantracakras, and the manner of drawing them in a compact form.

Beginning :

ह्रासे देवीकृते तत्तमगलविगते तोषभागे झसूत्रान्
कृत्वा पूरीदलान्ते गवलवसुभयोर्वा तयोस्तोयभागान् ।
धान्यांशान्मे विमार्जे प्लुधितुवरणाग्राणि सूत्रद्वयानि
प्राक् प्राधंरोधिगानं विधिमदवगं दिव्यसूनुश्चिरं स्यात् ॥

अस्यार्थस्तु द्वा इति द्वयं कथयति । से इति सप्त । एवं कटपयादिक्रमेण द्विसप्तत्यङ्गुलानि भवन्ति । चक्रोल्लेखनप्रकारस्तु, षट्त्रिंशदङ्गुलायामं सूक्ष्मसूत्रं संपाद्य वृत्तक्रमेण वलयं कृतं चेत् पूर्वोत्तरभागाभ्यां द्विसप्तत्यङ्गुलायामं भवति । तन्मध्ये पूर्व(पौरस्-)त्यार्धद्वाविंशत्यङ्गुलसूत्रेण वृत्तं कृतं चेत् पूर्वोत्तराभ्यां पञ्चचत्वारिंशदङ्गुलायामं भवति ।

End:

शेषाङ्गुलीभिः क्रमतस्तुलेख्यं पुरत्रयं हे त्रिपुरे महेशि ॥

सूर्यं सूर्यसुतं च केतुमुडुराड् भूमीसुतो वृत्तकं
राहुं सौम्यबुधं च केतुरगमच्छुक्रस्तथा चेन्दुगः ।
सूर्यो राहुरथाङ्गिरस्सुत(गत)श्चाङ्गारकं . . तां
मन्दं प्राग्दिशि वृत्तकं च विहरेश्चक्रं शिवायाः परम् ॥

No. **3067.** वनदुर्गाकल्पः.

VANADURGĀKALPAḤ.

Pages, 51. Lines, 20 on a page.

Begins on fol. 32*a* of the MS. described under No. 5643. Complete.

On the details connected with the repetition of the Vanadurgāmantra.

Contains the following Paṭalas :—

१. वनदुर्गामन्त्रोद्धारादिः.
२. वनदुर्गापुरश्चर्याविधिः.
३. होमबलिदानाविधिः.
४. वनदुर्गाध्यानविभवः.
५. जपकर्मविधिः.
६. होमकर्मविधिः.

Beginning:

नानाद्रुमसमाकीर्णे नानापुष्पोपशोभिते ।
नानापक्षिसमाकीर्णे नानामृगसमन्विते ॥

* * * *

कृपया परयाभीक्ष्णं षण्मुखं द्वादशेक्षणम् ।
प्रणम्य दण्डवद्भूमौ पप्रच्छ मुनिसत्तमः ॥

अगस्त्य उवाच —

किं रूपं वनदुर्गायाः कान्यङ्गानि विशेषतः ।
उद्धारः कीदृशः प्रोक्तो विनियोगश्च कीदृशः ॥
किं बीजं का पुनश्शक्तिर्वर्णानां च तथैव च ।
एतत्सर्वं च विस्तीर्य ब्रूहि मे दैत्यनाशन ॥

* * * *

Colophon:

इति वनदुर्गाकल्पे गुहप्रोक्ते प्रथमः पटलः ॥

End:

काकोलूकवसाभ्यक्तैस्तद्वर्णैर्म्रियते रिपुः ।
अर्धरात्रे महारण्ये कुर्यात्सर्वत्र मारणम् ॥
अमोघोऽयं प्रयोगः स्यात् शत्रुर्मासं भविष्यति ।
अथैवं विषमूलेन समं कुर्याद्विधानतः ॥

No. 8068. वनदुर्गाकल्पः.
VANADURGĀKALPAḤ.

Pages, 40. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 7799.
Complete.
Same as the above.

No. 8069. वनदुर्गाकल्पः.
VANADURGĀKALPAḤ.

Pages, 22. Lines, 8 on a page.

Begins on fol. 122*a* of the MS. described under No. 124.
Complete.
Same as the above.

No. 8070. वनदुर्गामन्त्रविषयः.

VANADURGĀMANTRAVIṢAYAḤ.

Pages, 28. Lines, 9 on a page.

Begins on fol. 21*a* of the MS. described under No. 7799.

Complete.

This is the 2nd Paṭala of Śāradātilaka.

Similar to the above. Deals chiefly with the Yantra relating to the Vanadurgāmantra.

Beginning:

बिन्दुत्रिकोणषट्कोणचतुर्दलाष्टदलषोडशदलद्वात्रिंशद्दलभूपुरद्वितयं चेति भद्रयन्त्रलक्षणम् । तत्र बिन्दौ मायागर्भितदुर्गाबीजं, कोणत्रये वाग्भवकामराजशक्तिबीजान्यग्रादि प्रादक्षिण्येन लिखेत् । ततः षट्कोणे उत्तिष्ठ पुरुषि ज्वल किं स्वपिषि प्रज्वल भयं मे समुपस्थितं ज्वालामालिनि यदि शक्यमशक्यं वा शूलिनि तन्मे भगवति त्रिशूलवरधारिणि शमय स्वाहा कपर्दिनि इति षडङ्गमन्त्रान् स्वान्तादि प्रादक्षिण्येन लिखेत् ।

End:

यन्त्रं विन्ध्यनिवासिन्यै प्रोक्तं सर्वसमृद्धिदम् ॥
रक्षाकरं विशेषेण क्षुद्रभूतादिनाशनम् ।
राज्यदं राष्ट्रदं राजवश्यदं वश्यमिच्छताम् ॥
सुतार्थिनां च सुतदं रोगिणां रोगनाशनम् ।
बहुना किं मयोक्तेन यन्त्रं तत्कामदं नृणाम् ॥

Colophon:

इति शारदातिलके द्वितीयः पटलः समाप्तः ॥

No. 8071. वनदुर्गामन्त्रविषयः.

VANADURGĀMANTRAVIṢAYAḤ.

Pages, 28. Lines, 20 on a page.

Begins on fol. 57*a* of the MS. described under No. 5643, and is included in Vanadurgākalpa 32*a* shewn among the other works therein.

Complete.

This is the 2nd Paṭala of Śāradātilaka

Same as the above.

No. 8072. वनदुर्गामन्त्रविषयः.

VANADURGĀMANTRAVIṢAYAḤ.

Pages, 15. Lines, 8 on a page.

Begins on fol. 132*b* of the MS. described under No. 124, and is included in Vanadurgākalpa 122*a* shown among the other works therein.

Complete.

Same as the above.

No. 8073. वनदुर्गायन्त्रोद्धारः.

VANADURGĀYANTRŌDDHĀRAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 55*a* of the MS. described under No. 5639, wherein it is shown as Mahāvidyāyantrarāja.

Complete.

On the manner of drawing the Yantra relating to the Vanadurgāmantra and the method of filling it up with the syllables of the Mantra.

Beginning:

महाविद्यायन्त्रराजं प्रवक्ष्यामि समीहितः ।
बिन्दुत्रिकोणमालिख्य षट्कोणं वृत्तसंयुतम् ॥
अष्टारं तु सवृत्तं च ततः षोडशपत्रकम् ।

* * * *

चतुष्षष्टिदलं पश्चाद्वृत्तं भूपुरसंयुतम् ।
एतद्यन्त्रं महादेवि यन्त्रराजं सुरेश्वरि ॥
अत्र बीजं कर्णयुक्तं बिन्धुमध्ये सबिन्दुकम् ।

End:

बहुनोक्तेन किं देवि सर्वकार्यार्थसाधनम् ॥

एतद्यन्त्रस्य माहात्म्यं मम वक्तुं न शक्यते।
त्रयीशानि महादेवि सत्यं सत्यं न संशयः ॥

Colophon:

इति शम्बरतन्त्रे उमामहेश्वरसंवादे वनदुर्गायन्त्रोद्धारस्समाप्तः ॥

No. 8074. वर्णनिघण्टुः.
VARṆANIGHAṆṬUḤ.

Pages, 9. Lines, 16 on a page.

Begins on fol. 102*b* of the MS. described under No. 424.

Complete.

A lexicon giving the various meanings of the letters of the alphabet or Matṛkākṣaras as used in relation to Mantras.

Beginning:

प्रणम्य परमानन्दं श्रीगुरुं पुरुषोत्तमम्।
मातृकार्णनिघण्टुं यं (प्रवक्ष्ये)बालवुद्धये ॥
प्रणवस्तारकोऽव्यक्तोऽवेदादिश्च शिवोऽव्ययः।
आदिमश्च ध्रुवोङ्कारो मूलज्योतिश्शिवादिकः ॥
त्रिवृद्ब्रह्मा त्रिमात्रश्च शब्दाः प्रणववाचकाः।

End:

हंसप्राकारवर्णानां संज्ञामायाविसर्गिणः।
एषा स्वतन्त्रतन्त्रोक्ता वर्णसंज्ञा समीरिता ॥

Colophon:

समाप्तिः ॥

No. 8075. वशीकरणविद्यामन्त्रकल्पः.
VAŚĪKARAṆAVIDYAMANTRAKALPAḤ.

Pages, 4. Lines, 18 on a page.

Begins on fol. 1*a* of the MS. described under No. 6045, and is included in Yantracintāmaṇi shown among the other works therein.

Complete.

On the Yantra related to a Mantra considered to have the power to enable one to exercise influence over all people.

Beginning:

अस्य श्रीवशीकरणविद्यामहामन्त्रस्य वामदेव ऋषिः; देवी गायत्री छन्दः वशीकरणविद्या देवता ।

* * * *

सर्वलोकवश्यं कुरु कुरु स्वाहा । द्वात्रिंशद्वर्णसहस्रं जप्त्वा । लमिति पञ्चपूजां कुर्यात् ।

अथ यन्त्रक्रममाह—

तिर्यक् तथोर्ध्वं शररत्नरेखाः क्रमणे मन्त्रोपरि तत्रिशूलम् ।

कामाख्यदं यन्त्र . . . . ॥

धना(क्षणा)त्तत्साके(ध)केन्द्रस्य वश्यमायान्ति जन्तवः ।

एवं तु कामिनी कुर्यात् कामनं कामनाधिया ॥ इति ।

End:

दिक्पालबजिानि मध्ये विलिख्य रं लं हं षं नं यं सं शं इं ईं टं टां आं ह्रीं आं ह्रीं क्रं सर्ववश्याधिकं भवेत् ॥

No. 8076. वश्यमन्त्रकल्पः.
VAŚYAMANTRAKALPAḤ

Pages, 2. Lines, 8 on a page.

Begins on fol. 198*b* of the MS. described under No. 119, wherein this has been omitted to be shown among the other works.

Contains two Ślōkas on the method of drawing the Yantra relating to the Vaśyāmantra.

Beginning and **End:**

मुखरञ्जनि क्लीं ह्रीं श्रीं सर्वराजवशङ्करि सर्वदुष्टमृगवशङ्करि सर्वशङ्कुवशङ्करि सर्वलोकवशङ्करि अमुकं मे वशमानय स्वाहा ॥

यन्त्रोद्धारणम्—

त्रिकोणकर्णिकं पञ्चपद्मपत्रे मनुः प्रिये ।
अष्टपत्रबहिर्देवी पुनष्षोडशपत्रकम् ॥
तद्बाह्येऽष्टदलं प्रोक्तं चतुष्पत्रे मनुः प्रिये ।
चतुरश्रं तु तद्बाह्ये देवि देव्यासनं भवेत ॥

No. 8077. वश्याञ्जनादिप्रयोगः.
VAŚYĀÑJANĀDIPRAYŌGAḤ.

Pages, 8. Lines, 16 on a page.

Begins on fol. 18*a* of the MS. described under No. 7739.

Complete.

On the method of preparing an unguent for the eyes, considered to be efficacious in driving away one's enemies, in creating enmity between two persons or in bringing others under one's control.

Beginning:

उलूकनेत्रं सङ्गृह्य तत्पित्तेनैव मर्दयेत् ।
पातालमधुना सार्धमञ्जयेद्धरणीं ततः ॥
एतत्सर्वाञ्जनं ज्ञेयं सुलभं द्रव्यशोधनम् ।
तदस्थिकीलकं कुर्यात् विक्षिपेद्वैरिमन्दिरे ॥
पक्षादुच्चाटनं चैव विद्वेषो जायते ध्रुवम् ॥

End:

चन्द्राट्टहासदव्याय विकृतरूपिणे कट कट भञ्जय भञ्जय प्रसर प्रसरावेशयावेशय गुरुस्तु गुरुस्तु कम्पय कम्पय अमुकं ज्वरेण गृह्ण गृह्ण हुं फट् स्वाहा ॥

No. 8078. वश्याद्यष्टकर्मलेखः.
VAŚYĀDYAṢṬAKARMALĒKHAḤ.

Pages, 5. Lines, 18 on a page.

Begins on fol. 3*a* of the MS. described under No. 6045, wherein this has been included in Yantracintāmaṇi.

Complete.

Deals with the nature of the syllables to be introduced into the Yantra relating to the Pañcākṣara mantra, so as to indicate the objects to be attained by using the Mantra.

Beginning:

स्तम्भनं मोहनं चैव नकारेण तु मन्त्रकम् ।
वश्यमाकर्षणं प्रोक्तं वाकारेण तु मन्त्रकम् ॥
मकारान्तं तु विद्वेषं यकारं मोक्षशान्तिकम् ।
शिकारोच्चाटनं कृत्वा संहारक्रम उच्यते ॥
वश्ये तु बिल्वफलकैः पञ्चविंशतिकोष्ठकैः ।
चतुर्थं च तृतीयं च द्वितीयं पञ्चमाद्यकम् ॥
पञ्चाक्षरक्रमेणैव विलिखेत्तदनन्तरम् ।

End:

तालपत्रे श्यामलिप्ते विलिख्यैवं सुसाध्यकम् ।
पुरस्तात्तद्विलिप्तं तत् पत्रं दीपेषु दापयेत् ॥

इति भेदनम् ॥

* * * *

उकारं लोकदैवत्यं वास्तुदैवत्यमेव च ।
बलवर्धनबीजं च कालदैवतमेव च ॥
उकार पृथ्विबीज(न्तू)च्चाटनं शत्रुमारणम् ।

No. **8079.** वागीश्वरीध्यानम्.

VĀGĪŚVARĪDHYĀNAM.

Pages, 10. Lines, 7 on a page.

Begins on fol. 121*a* of the MS. described under No. 5683.

Complete.

On the manner of meditating upon and worshipping Sarasvatī, and on the method of repeating the Mantra addressed to her.

Beginning:

मम ज्ञानशक्त्यात्मकवागीश्वर्यादिसारस्वतशक्तिमन्त्राराधनाविधानमभिधीयते । तत्र वागीश्वरीमन्त्रः स च वदेति पदद्वयादिकः वाग्वादिनीति पदोपेतस्वाहान्तः ।

प्रणवभुवनेश्वरीसंपुटितमन्त्रोऽयं महासारस्वतप्रदः। वागीश्वरीमन्त्रस्य कण्व ऋषिः, विराट् छन्दः वागीश्वरी देवता।

End:

एवं ध्यात्वा मानसार्चनपूर्वकमावरणयुक्तं बाह्यार्चनं कुर्यात् तत्र देव्याः पार्श्वयोः संस्कृतप्राकृतवाग्देव्यौ संपूज्य आवरणपूजां कुर्यात् ·

* * * *

देवीध्यानपुरस्सरं प्रतिदिनं सहस्रत्रयजपो वक्षस्स्थलप्रमाणजलस्स्थस्य महासारस्वतकरः॥

No. 8080. वाराहीमन्त्रकल्पः.
VĀRĀHĪMANTRAKALPAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 30*b* of the MS. described under No. 2854.

Complete.

70th Adhyāya of Ākāśabhairavakalpa.

Gives details regarding the Yantra and Pūjā relating to the Vārāhīmantra, and also the manner of repeating it.

Beginning:

अथ मन्त्रस्य वाराह्या ऋषिरत्रिर्जितेन्द्रियः।
छन्दोऽनुष्टुप् ततो देवी वाराही देवताम्बिके॥
वं बीजमथ हुं शक्तिः अभीष्टे विनियोगकम्।
वामित्यादिकराङ्गस्य न्यासं मूलेन वाम्बिके॥
वज्रोपलसमां नीलां प्रसन्नमाहिषासनाम्।
सर्वदुःखहरां घोरां स्तब्धलोमाननां नुमः॥

End:

साध्यमायावृतं यन्त्रं सर्वदुष्टनिवारणम्॥
संपूज्य विधिवद्देवीं जपेदष्टसहस्रकम्।
दक्षिणाभिमुखं देवि जपेतद्रिपुनाशनम्॥

Colophon:

इत्याकाशभैरवकल्पे वाराहीमन्त्रं नाम सप्ततितमोऽध्यायस्समाप्तः ॥

No. 8081. विद्याप्रदमन्त्रकल्पः.
VIDYĀPRADAMANTRAKALPAḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 138*a* of the MS. described under No. 2848, wherein this was omitted to be shown among the other works.

Complete.

Gives details regarding the Yantra and Pūjā relating to a Mantra considered to have the power of bestowing wisdom and learning; and also deals with the manner of repeating that Mantra.

Beginning:

. . . . . . साधु यन्त्रं नवनीते प्रतिजप्य मन्त्रमेनम् ।
परिभक्षयतामनङ्गबाधा प्रशमं गच्छति शुद्धिमेति चेतः ॥
प्रयोगान्तरम्—
आदाय कोष्णं सलिलं प्रसन्नं प्रजप्य मन्त्रं प्रपिबाद्विवारम् ।
रागादिदोषप्रशमाय बुद्धेर्ज्ञानोदयाय प्रशमाय वृत्तेः ॥

End:

पुनस्तद्बहिर्वृत्तं विलिख्य तस्मिन् कादिवर्णैर्वेष्टयेत् । पुनस्तद्ब हिश्चतुरश्रं विलिखेत् । एवं नवपत्रे वा स्वर्णपट्टे वा विलिख्य नारीमुपयुज्यात् । तस्मात्पुत्रं प्रसूयते ॥

No. 8082. विनायककल्पः.
VINĀYAKAKALPAḤ.

Pages, 39. Lines, 6 on a page.

Begins on fol. 140*a* of the MS. described under No. 2848.

Complete.

On the details connected with the Yantra, Pūjā and Japa of the Mantra addressed to Vināyaka.

Beginning:

गुरुं सदाशिवं शम्भुं रुद्रं विश्वम्भरं विधिम् ।
परां पराशिवां मायां वन्दे रौद्रीं श्रियं गिरम् ॥

श्रीशिव उवाच—

देवेश जगतां नाथ चित्सदानन्द शाश्वत ।
चिदाख्यानमिह श्रोतुं चिरादिच्छाम्यहं प्रभो ॥

* * * *

सर्वदेवमयश्शम्भुश्शिववन्द्यो विनायकः ।
तस्माद्वैनायकं कल्पमृजु सर्वार्थसिद्धिदम् ॥

End:

मध्ये बीजं ग्लौं शिखां त्रिकोणे त्रिवर्णं वसुदलकमले शिष्टमन्त्रवर्णं त्रिवर्णं भूकोणे बीजयुक्तं सकलरिपुकलासाहितरिपु एहि ह्रीङ्कारावृतम् । अरिपक्षशत्रुजन्मर्क्षे पवनशतजपं प्राणप्रतिष्ठामन्त्रशतवारं क्रूरसिक्तं स्नुहि क्षारादिक्रूरद्रव्यसिक्तं साम्यद्रव्यसिक्तं सिरात्रितयम् ॥

No. 8083. विश्वामित्रकल्पः.
VIŚVĀMITRAKALPAḤ.

Pages, 25. Lines, 5 on a page.

Begins on fol. 10*a* of the MS. described under No. 5362, and is included in Viśvāmitrasaṁhitā shown among the other works therein.

On the details connected with the rites preliminary to the repetition of the Gāyatrīmantra.

Contains the following Paṭalas:—

१. आह्निकयोगः.
२. आचमनविभागयोगः.
३. प्राणायामविधिः.
४. मार्जनविधिः.
५. अर्घ्यप्रदानयोगः.
६. आवाहनादिन्याससंयोगः.
७. कालजपयोगः.
८. उपस्थानयोगः.

Beginning:

विश्वामित्रकल्पे आह्निकविधिं व्याख्यास्यामः ।
स गुरुं पूजयेद्देवीमुपचारैस्तु पञ्चकैः ॥
भक्तिश्रद्धानुसारेण विश्वामित्रं प्रकल्पयेत् ।
अस्य मन्त्रस्य प्रश्नस्य प्राणापानं निरुन्धयेत् ॥

* * * *

Colophon:

इति विश्वामित्रकल्पे आह्निकयोगो नाम प्रथमपटलः ॥

End:

त्रिपादजपसाद्गुण्यं तुर्यपादं दशांशकम् ।
तुर्यजाप्यं विना येन कुरुते निष्फलं भवेत् ॥

Colophon:

इति विश्वामित्रकल्पे उपस्थानयोगो नाम अष्टमोऽध्यायः ॥

No. 8084. विषतन्त्रम्.

VIṢATANTRAM.

Pages, 13. Lines, 7 on a page.

Begins on fol. 27*b* of the MS. described under No. 7991.

Incomplete.

Gives how poison came into the world and states what things are poisonous. Also gives a Mantra which is considered to be efficacious in removing snake poison.

Beginning:

विषतन्त्रं प्रवक्ष्यामि सङ्क्षेपेण निबोध मे ।
मथ्यमाने जलनिधौ अमृतार्थं सुरासुरैः ॥
जातः प्रागमृतोत्पत्तेः पुरुषो घोरदर्शन ।
दीप्ततेजाश्चतुर्दंष्ट्रो हरिकेशोऽनलेक्षणः ॥
जगद्विषण्णं तं दृष्ट्वा तेनासौ विषसंज्ञिकः ।

* * * *

पञ्चाक्षरेण मन्त्रेण चाहरेत् सर्पजं विषम् । क्षिप ओं स्वाहा—
एतद्गरुडपञ्चाक्षरी जरत्कारो जरत्कावी(रो)त्राहि मां विषसर्पतः ।

End:

अविं कुसुम्भशाकेन बिसैस्सह वरूडकम् ।
शष्कुलीमारनालेन नाद्यान्मधु गुडेन तु ॥
न जातु कटुतैलेन भ्रष्टान्नाद्यात् कपोतकान् ।

No. 8085. वीरभद्रमन्त्रकल्पः.

VĪRABHADRAMANTRAKALPAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 28*b* of the MS. described under No. 2854.

Complete.

63rd Adhyāya of Ākāśabhairavakalpa.

On the Yantra and Pūjā relating to the Vīrabhadramantra, and also on the manner of repeating that Mantra.

Beginning:

श्रीशिवः—

वक्ष्यामि वीरभद्रस्य मन्त्रं सर्वार्थसाधकम् ।
निग्रहानुग्रहकरं [दिव्यं] साधकानां जयावहम् ॥
अस्य श्रीवीरभद्रस्य कालाग्निरुद्र ऋषिस्स्मृतः ।
जगती छन्द इत्युक्तो वीरभद्रस्तु देवता ॥
वीं बीजं हुं ततश्शक्तिः विनियोगस्तु निग्रहे ।
व्यामित्यादिकराङ्गस्य न्यासं कृत्वाथ भावयेत् ॥

End:

ठङ्कारमध्ये परिलिख्य मन्त्रं बाह्येऽष्टपत्रेषु च हुंफडर्णम् ।
संवेष्ट्य पाशाङ्कुशमातृकान्यान् आराधयेच्छ्यामलवीरभद्रम् ॥

आराधनावसानेषु मातृकावर्णपूर्वकम् ।
सर्वकार्यार्थसिद्ध्यर्थं जपेत् सिध्यति शोभने ॥

Colophon :

इत्याकाशभैरवकल्पे श्यामलावीरभद्रं नाम त्रिषष्टितमोऽध्यायः समाप्तः ॥

No. 8086. वैष्णवीमन्त्रकल्पः.
VAIṢṆAVĪMANTRAKALPAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 30*a* of the MS. described under No. 2854 and not on 30*b* as shown therein.

Complete.

69th Adhyāya of Ākāśabhairavakalpa.

On the manner of drawing the Yantra and performing the worship relating to the Mantra addressed to Vaiṣṇavī, one of the manifestations of Śakti.

Beginning :

अथ मन्त्रस्य वैष्णव्या ऋषिर्विष्णुरनन्तरम् ।
गायत्री छन्द इत्युक्तो वैष्णवी देवता ततः ॥
वं बीजं चाथ सं शक्तिः विनियोगस्त्वभीष्टके ।
वां सान्नित्यादिहस्तस्य न्यासमङ्गस्य तत्परम् ॥

End :

आराध्य देवीमनुवासरं यो जपेत् सहस्रं प्रयतः प्रदोषम् ।
तस्याशु सिद्धिं धनधान्यवृद्धिं सौभाग्यजात्यां तनुते तु लक्ष्मीम् ॥

Colophon :

इत्याकाशभैरवकल्पे वैष्णवीमन्त्रं नाम एकोनसप्ततितमोऽध्यायस्समाप्तः ॥

No. 8087. शतधारयन्त्रधारणाविधिः.
ŚATADHĀRAYANTRADHĀRAṆAVIDHIḤ.

Pages, 3. Lines, 6 on a page.


Begins on fol. 18*b* of the MS. described under No. 5832.

On the method of drawing, worshipping and wearing on the body, the Śatadhārayantra, i.e , the Yantra relating to the Cakra of Viṣṇu, which is considered to have the power of warding off untimely death in children.

Beginning :

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ यजमानस्य गोत्रोद्भवस्य धर्मपत्न्या गर्भस्थशिशोरपमृत्युपरिहारार्थं . . . . शतधारयन्त्रधारणकाले मण्टपप्रतिष्ठापनं करिष्ये । नूतनवस्त्रं प्रागग्रे निधाय तन्मध्ये यथाशक्ति तण्डुलं निधाय भूरेरवा अष्टाक्षरीदलसंवृतं लिखित्वा तन्मध्ये नृसिंहबीजं लिखित्वा ।

End :





शङ्खं चक्रं च पाशं परशुमसिमिषुं . . . सकलरिपुजनप्राणसंहारचक्रम् ॥

पर्वत . . आयच्छ ब्रह्मणस्पते । सर्वेषां वृद्धसुवासिनीनां करस्पर्शनं कृत्वा पुरुषहस्तेन धारणं कृत्वा तत आशीर्वचनं कृत्वा ॥

No. 8088. शब्दाकर्षिणीभाषामन्त्रकल्पः.

ŚABDĀKARṢIṆĪBHĀṢĀMANTRAKALPAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 19*a* of the MS. described under No. 2854, wherein this has been omitted to be shown among the other works.

Complete.

43rd Adhyāya of Ākāśabhairavakalpa.

On the details connected with the repetition of a certain Mantra addressed to Sarasvatī, which is considered to have the power of enabling a person to understand the meaning of every word he hears.

Beginning:

श्रीशिव उवाच—

वदामि शृणु ते गुह्यं भाषामन्त्रमनुत्तमम् ।
यस्य स्मरणमात्रेण सुप्रसन्ना सरस्वती ॥
ऋषिर्मन्त्रस्य भारत्या ब्रह्मा गायत्रिरुच्यते ।
छन्दो देवी महावाणी देवता सान्तमद्भुतम् ॥
बीजशक्तिस्ततः स्वाहा विनियोगो विशेषतः ।
सर्वशब्दार्थविज्ञानसिद्ध्यै सारस्वताप्तये ॥

End:

सभासंवेशने काले प्रतिवादिसमाकुले ।
मनसा सज्ञ(ज्ज)विजयो(भवेन्निज)गुरुं स्मरन् ॥

Colophon:

इत्याकाशभैरवकल्पे शब्दाकर्षणीभाषामन्त्रो नाम त्रिचत्वारिंशोऽध्यायः ॥

No. 8089. शब्दाकर्षिणीमन्त्रकल्पः.

ŚABDĀKARṢIṆĪMANTRAKALPAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 18*b* of the MS. described under No. 2854.

Complete.

42nd Adhyāya of Ākāśabhairavakalpa.

Similar to the above.

Beginning :

शब्दाकर्षणिकायास्तु बलप्रमथनऋ(स्त्वृ)षिः ।
जगती छन्द इत्युक्तो (देवता)सैव सुन्दरी ॥
पकारं बीजमित्युक्तं स्वाहा शक्तिस्ततः परम् ।
शब्दाकर्षणसिद्ध्यर्थे विनियोगस्तथाम्बिके ॥

End :

इति गुह्यं महामन्त्रं सर्वज्ञानप्रदं परम् ।
सर्वदा सर्वकार्येषु जपेन्मन्त्री वरानने ॥

Colophon :

इत्याकाशभैरवकल्पे शब्दाकर्षणीमन्त्रो नाम द्विचत्वारिंशोऽध्यायः ॥

No. 8090. शरभकालिकाप्रत्यङ्गिरागमः.

ŚARABHAKĀLIKĀPRATYAṄGIRĀGAMAḤ.

Pages, 42. Lines, 16 on a page.

Begins on fol. 48*a* of the MS. described under No. 7739.

On the details connected with the repetition of the Mantra addressed to Pratyaṅgirā. This Mantra is considered to have the power of curing various kinds of fever.

Contains the following Paṭalas, of which the 9th only is incomplete :—

२. शीतज्वरविनाशनम्.
३. ज्वरनाशयन्त्रम्.
४. सन्निपातनाशनबीजयन्त्रम्.
५. चातुर्थिकज्वरनाशनयन्त्रम्.
६. रोगनाशनयन्त्रराजः.
७. कृत्रिमनाशनयन्त्रम्.
८. कृत्रिमरोगनाशनप्रयोगः.
९. भूतकृत्यनिवारणम्.

Beginning:

अत्यन्तभीकरं रूपं महोग्रं श्रीनृकेसरिम् ।
हृदि ध्यात्वा प्रवक्ष्यामि यत्तत्सिध्यतु मे वचः ॥

* * * *

ईश्वर उवाच—

शीतज्वरविनाशं च मन्त्रं शृणु कुलेश्वरि ।
तारं मायात्रयं चैव पाशान्तरितमेव च ॥
सुधाबीजाष्टकं लिख्य अङ्कुशं बीजमालिखेत् ।
पुनश्श्रीबीजमालिख्य गुणसङ्ख्यानमेव च ॥

* * * *

Colophon:

इति शरभकालिकातन्त्रे द्वितीयः पटलः ॥

End:

इति शरभकालिकातन्त्रे नवमः पटलः ॥
काशान् साक्षिमयूरपिञ्छबृहतीयुग्मे च राजीयुतं
निम्बार्कस्य च पत्रमेवमहिराट्चर्मापि तद्यद्यदा ।
शृङ्गश्वानडुह(द)जोर्णाविमपि गोशृङ्गवेणुत्वचां
धूमं देवि शृणुष्व भूतहरणं बेतालपैशाचहृत् ॥

* * * *

एवं तु सप्तरात्रं तु पक्षाद्वा भूतनाशनम् ।
तस्य भूतस्य मन्त्रं तु वक्ष्यामि कुलसुन्दरि ॥

No. **8091.** शरभकालिकाप्रत्यङ्गिरागमः.

ŚARABHAKĀLIKĀPRATYAṄGIRĀGAMAḤ.

Pages, 34. Lines, 20 on a page.

Begins on fol. 1*b* of the MS described under No. 7739.

In addition to the nine Paṭalas mentioned under the previous number, this MS. contains also the tenth Paṭala dealing with Vaśyayōga.

Same as the above.

See under the previous number for the beginning :

End :

ओं आं ग्लौं क्रों भूतांस्तान् भक्ष भक्ष भस्मीकुरु भस्मीकुरु आं क्रों हुं ग्लौं आं क्रों फट् स्वाहा ॥

Colophon :

इति श्रीशरभकालिकाप्रत्यङ्गिरागमे सर्वतन्त्रराजोत्तमोत्तमे नवमः फटलः ॥

ज्वलज्जिह्वासमायुक्तं महोग्रं श्रीनृकेसरिम् ।
हृदि ध्यात्वा प्रवक्ष्यामि यत्तत्सिध्यतु मे वचः ॥

पार्वत्युवाच—

नमस्ते करुणासिन्धो नमः पन्नगकङ्कण ।
अधुना वश्ययोगं च वद मे करुणाकर ॥

* * * *

षट्कोणबीजमालिख्य कोणसन्धौ तु साधकः ।
मायाबीजं कोणयोश्च शूल एव तु संलिखेत् ॥

No. 8092. शरभमन्त्रकल्पः.
ŚARABHAMANTRAKALPAḤ.

Pages, 2. Lines, 19 on a page.

Begins on fol. 39*a* of the MS. described under No. 2886 and is included in Ākāśabhairavakalpa 38*a*, shown among the other works therein.

Complete.

On the details connected with the repetition of the Mantra addressed to Śarabha.

Beginning :

वन्दे गुरुपदद्वन्द्वमवाङ्मनसगोचरम्।
रक्तशुक्लप्रभामिश्रमगम्यं त्रैपुरं महः ॥

श्रीदेव्युवाच—

सर्वज्ञ भगवन् शम्भो शरभेशस्य तत्त्वतः ।
जगत्क्षोभणमन्त्रस्य स्वरूपं वक्तुमर्हसि ॥

शिवः—

अथ शृणु कथयामः प्रार्थ्यमानं मुनीन्द्रै-
रधिगतरिपुलोकानावृतानाधृतास्त्रात् ।
हरिविधिमुखवीरानप्रमेयानसङ्ख्यान-
पि हरति स योधान् लीलया यत्र तं तत् ।
जगत्क्षोभणमन्त्रस्य ऋषिस्तत्पुरुषेश्वरः ।
खं बीजं फट् ततश्शक्तिर्विनियोगो विनिग्रहे ॥

End:

किमत्र बहुनोक्तेन वक्ष्याम्यार्ये यथातथम् ।
मन्त्रस्मरणमात्रेण शरभेशो भवेत्स्वयम् ॥

Colophon:

इत्याकाशभैरवकल्पे एकत्रिंशोऽध्यायः ॥

No. 8093. शरभमन्त्रकल्पः.
ŚARABHAMANTRAKALPAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 17*a* of the MS. described under No. 2854.
Complete.
Similar to the above.

Beginning:

स्थित्वा शिवाग्रतो धीमानयुतं विजितेन्द्रियः ।
दशांशं तर्पयेदिक्षु रसैर्हुत्वा पयो गवाम् ॥
सिद्धमन्त्रं प्रकुर्वीत प्रयोगात् कल्पचोदितात् ।
मन्त्रोद्धारमथेदानीं शृणुष्वेकाग्रमानसः ॥

तारमुक्त्वाथ खें खां खं फट् प्राणग्रहासिने वदन् ।
शब्दं हुं फट् सर्वशत्रु पश्चात्संहारिणे पदम् ॥

End:

राजाय वर्म फट् स्वाहेत्यन्तं षट्त्रिंशदक्षरम् ।
मन्त्रं लब्ध्वा गुरोः पार्श्वे पश्चान्मन्त्रं जपेन्नरः ॥
एतन्मन्त्रं कवचोक्तयन्त्रे विलिखेत् ॥

No. 8094. शरभमन्त्रकल्पः.

ŚARABHAMANTRAKALPAḤ.

Page, 1. Lines, 19 on a page.

Begins on fol. 40*a* of the MS. described under No. 2886 and is included in Ākāśabhairavakalpa 3*a*, shown among the other works therein.

Complete.

Similar to the above.

Beginning:

देवदेव महाभाग गिरीश जगतां पते ।
त्राहि मां दयया नाथ सच्चिदानन्द शाश्वत ॥
मन्त्राणामपि यत्सारं सर्वलोकैकशिक्षणम् ।
रक्षणं सर्वजन्तूनां ब्रूहि मे तद्विभो मनुम् ॥

* * * *

शरभेश्वरमन्त्रस्य ऋषिः कालाग्निरुद्रकः ।
छन्दस्तु जगती देवो भगवान् शरभेश्वरः ॥
खङ्कारं बीजमित्युक्तं स्वाहा शक्तिरतः परम् ।
स्वेच्छाप्रयोगसिद्ध्यर्थे विनियोगस्तथाम्बिके ॥

End:

षट्सप्तकोष्ठेषु विलिख्य शारभं रेखाग्रशूलं च तदग्रसाध्यकम् ।
बाह्ये तु मायावृततारवेष्टितं जयाधिकं साधितुमाशु चक्रम् ॥

Colophon:

इत्याकाशभैरवकल्पे षोडशोध्यायः ॥

No. **8095.** शरभमन्त्रविषयः.

ŚARABHAMANTRAVIṢAYAḤ.

Pages, 6. Lines, 19 on a page.

Begins on fol. 10*a* of the MS. described under No. 2886.

Adhyāyas 16 to 18 in the Aghōrakalpa.

Contains the Mantra, Yantra, Aṣṭaka, Stuti, Vidvēṣamantra, Vidhi, etc., relating to the deity, Śarabha.

Beginning:

अघोरकल्पं वक्ष्यामि शृणु त्वं शैलकन्यके ।
महापातककोटीनां भञ्जनं स्मृतिमात्रतः ॥
भूतप्रेतपिशाचादिनिग्रहे कपिरःदूरता(ण्मितम्) ।
भूतादिवश्यकरणं व्याधीनामपि भञ्जनम् ॥
अघोरजापिना दृष्टाः पलायन्ते महाग्रहाः ।
संहारिनिपुणं शीघ्रं षट् कर्माणि धुरन्धरम् ॥

End:

आथर्वणमिमं मन्त्रममोघदुरितापहम् ।
सर्वरक्षाकरं श्रेष्ठं सर्वसौभाग्यदायकम् ॥
एतद्यन्त्रं समालिख्य हैमके पट्टके शुभे ।
विधिनाराधयेत्सद्यः सर्वत्र विजयी भवेत् ॥

Colophon:

इति अष्टादशोऽध्यायः ॥

No. **8096.** शरभमालामन्त्रकल्पः.

ŚARABHAMĀLĀMANTRAKALPAḤ.

Pages, 10. Lines, 5 on a page.

Begins on fol. 41*a* of the MS. described under No. 5660.

Complete.

On the details connected with the repetition of the Śarabhamālāmantra.

Beginning:

जगत्क्षोभिणिमालामन्त्रस्य ऋषिस्तत्पुरुषेश्वरः ।
तथातिजगती छन्दो देवता शरभेश्वरः ॥
खं बीजं फट् ततश्शक्तिः विनियोगस्तु निग्रहे ।

* * * *

ओं नमो भगवते विश्वेश्वराय पञ्चमुखभञ्जनाय प्रणतार्तिविनाशनाय उद्दण्डकोलाहलाय ।

End:

रूपं जनय जनय विज्ञानं धावय धावय ओं खें श्रीं ह्रीं क्लीं ओं अभिवृद्धिं देहि स्वाहा । . . . .

* * * *

यदसाध्यं युगे सर्वे साध्यं योगे वरानने ।
मन्त्रस्मरणमात्रेण शरभेशो भवेत्स्वयम् ॥

Colophon:

इति महाशैवतन्त्रे अतिरहस्ये आकाशभैरवकल्पे [प्रत्य]उमामहेश्वरसंवादे शङ्करेण विरचिते शरभसालुवकल्पे जगत्क्षोभिणीमालामन्त्रं नाम त्रयस्त्रिंशोऽध्यायः ॥

No. 8097. शरभसालुवमन्त्रकल्पः.

ŚARABHASĀLUVAMANTRAKALPAḤ.

Pages, 4. Lines, 8 on a page.

Begins on fol. 23*b* of the MS. described under No. 5600, wherein this has been omitted to be shown among the other works.

Complete.

On the details connected with the repetition of the Mantra addressed to Śarabhasāluva-pakṣirāja.

Beginning:

पार्वत्युवाच—

विश्वेश्वर विरूपाक्ष विश्वरूप सदाशिव ।
मया श्रुताः कोटिकोटिभेदाः पूर्वमनुत्तमाः ॥
इदानीं श्रोतुमिच्छामि सालुवं मन्त्रमुत्तमम् ।

* * * *

षट्कोणं विलिखेन्मध्ये साध्यनाम समालिखेत् ।
तद्यन्त्रोपरि संविश्य साध्याकारं पुरो भुवि ॥

End:

आरभ्याष्टमिपर्यन्तं समाप्ते होमकर्मणि ।
अष्टोत्तरशतं हुत्वा अष्टोत्तरसहस्रकम् ॥
एवं प्रतिदिनं कृत्वा मासान्ते शत्रुरेव(नवोऽपि)च ।
गजान्त्येत्प(द्यैः प)र्यद श्चैव(टन्तोऽपि) गच्छन्ति शिवशासनम् ॥

No. **8098.** शरभसालुवमन्त्रकल्पः.

ŚARABHASĀLUVAMANTRAKALPAḤ.

Pages, 10. Lines, 16 on a page.

Begins on fol. 84*a* of the MS. described under No. 424.

Complete.

Similar to the above; forms a portion of Vātūlāgama.

Beginning:

शृण्वन्तु ऋषयस्सर्वे साळुवस्य महात्मनः ।
तस्य दर्शनमात्रेण पलायन्ते च शत्रवः ॥

* * * *

जपस्य विधिमाचक्ष्व पुरश्चरणकर्मणा ।
जपसङ्ख्याश्च होमश्च केन द्रव्येण तर्पणम् ॥

End:

हुनेच्च विधिवद्यन्त्रं कुण्डे यन्त्रं विलिख्य च ।
त्रिदिनान्ते च विद्वेषं शत्रूणाश्च परस्परम् ॥

Colophon:

इति वातूलाख्ये दिव्यागमे ब्रह्माणं प्रति उमामहेश्वरसंवादे पक्षि-
राजसाल्वतन्त्रे प्रतिपक्षसङ्घदलने द्वितीयः पटलः ॥

No. 8099. शरभसाल्वयन्त्रोद्धारः.
ŚARABHASĀLVAYANTRŌDDHĀRAḤ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 51*a* of the MS. described under No. 5660, wherein this has been omitted to be shown among the other works.

Complete.

On the method of drawing the Śarabhasālva Yantra

Beginning:

त्रिकोणे लिखिते पूर्वं तद्बाह्यं तु दलद्वयम् ।
द्वादशारं तु तद्बाह्ये . . . . ॥
. . . . . षड्दशान्ते शरभमनुमथो सप्तकं सप्तकं च ।
ओङ्कारं तस्य बाह्ये तदनु परिवृतं साध्यमाकर्षयन्तम् ॥

End:

यस्त्वा कृत्ये च काले च त्वन्ते गच्छ पुनर्नवे ।
आरा कृत्ये स्मृत्ये नाशय सर्वाश्च यातुधान्यः ॥

No. 8100. शरभेश्वरयन्त्रम्.
ŚARABHĒŚVARAYANTRAM.

Pages, 3. Lines, 19 on a page.

Begins on fol. 40*a* of the MS. described under No. 2886, and is included in Ākāśabhairavakalpa 38*a*, shown among the other works.

Complete. Forms the 18th Adhyāya of Ākāśabhairavakalpa.

On the method of drawing the Śarabhēśvara Yantra.

Beginning:

अस्य(थ)यन्त्रम् ।
वकारं पूर्वमालिख्य तद्बाह्ये वर्तुलं लिखेत् ।
तद्बाह्ये चतुरश्रं च तद्बाह्येऽष्टदलं लिखेत् ॥
तद्बाह्ये षोडशारञ्च तदग्रे वृत्तमालिखेत् ।
तदग्रे पञ्चकोणं च ठङ्कारे साध्यनामकम् ॥

End:

एतद्यन्त्रं समालिख्य हैमके पट्टके शुभे ।
विधिना धारयेद्योऽयं सर्वत्र विजयी भवेत् ॥

Colophon:

इत्याकाशभैरवकल्पे शरभास्त्रमन्त्रप्रयोगो नाम अष्टादशोऽध्यायः ॥

No. 8101. शाबरचिन्तामणिः.

ŚĀBARACINTĀMAṆIḤ.

Pages, 52. Lines, 18 on a page.

Begins on fol. 91*a* of the MS. described under No. 5586.

Complete.

Gives the details connected with certain Mantras composed in Sanskrit mixed up with the Dravidian languages, and also deals with the manner of repeating them.

The author of the work seems to be Ādinātha; but in the colophons to Paṭalas 3 to 9 the authorship is ascribed to Nityanātha or Nityanāthasiddha. The vernacular rendering of the Mantras seems to have been done by Ādinātha's five disciples who were natives of Cōla, Kēraḷa, Karṇāṭa, Āndhra and Ghūrjara countries.

Contains the following Paṭalas:—

१. शाबरचिन्तामणिमन्त्रषट्कर्मनिरूपणम्.
२. शाबराचिन्तामणिषट्कर्मप्रयोगः.
३. संमोहनविद्याशाबरमन्त्राचिन्तामणिः.
४. वशीकरणशाबरमन्त्रः.
५. उच्चाटनशाबरमन्त्रः.
६. केरलान्ध्रघूर्जरमन्त्रभेदः.
७. विद्वेषणशाबरमन्त्रः.
८. स्तम्भनशाबरमन्त्रः.
९. आकर्षणशाबरमन्त्रः.
१०. गौडीमारणशाबरमन्त्रचिन्तामणि.

Beginning:

विश्वेश्वरसरस्वत्या गुरोश्शिष्यं तपोधनम् ।
नृसिंहध्यानसम्पन्नं वामनाख्यं नमाम्यहम् ॥

श्रीकराम्भोजयुगले कस्तूरीपङ्कसङ्कुले ।
नखैर्लिखन्तं चित्राणि श्रीनृसिंहमहं भजे ॥
ओङ्कारवाचकं साक्षान्महोग्रश्रीनृकेसरिम् ।
हृदि ध्यात्वा प्रवक्ष्यामि यत्तत्सिध्यतु मे वचः ॥
मन्त्रात्मकं मन्त्रमूर्तिं महोग्रश्रीनृकेसरिम् ।
हृदि ध्यात्वा प्रवक्ष्यामि यत्तत्सिध्यतु मे वचः ॥

* * * *

पार्वत्युवाच—

भूसुरार्चित भूतेश शेषकङ्कण शङ्कर ।
लङ्केशार्चितपादाब्ज नमस्ते शाङ्करीपते ॥

* * * *

भूतले शाबरं मन्त्रं वर्तते साधकं विना ।
पठासि (हठात्सि)द्धिकरी विद्या पावनं वद मे प्रभो ॥

ईश्वर उवाच—

मम मानसपुत्रोऽस्ति मत्स्येन्द्रेभ्यो महाबलः ।
चोलकेरलकर्णाटकान्ध्रघूर्जरदेशिकः ॥
शिष्यपञ्चकसंयुक्तस्तपस्तेपे सुदारुणम् ।
तत्र प्रसन्नो भगवान् हंसरूपी परात्परः ॥

हंस उवाच—

किमस्ति काङ्क्षितं ब्रूहि आदिनाथ परात्परम् ।
असाध्यमपि योगीन्द्र वदाम्येतद्व्रतं मम ॥

आदिनाथ उवाच—

प्रत्येकं मन्त्रशास्त्रं तु कौलाचारमतानुगम् ।
कौलाचारविहीनं तु कल्पयाम्यहमादरात् ॥

कटाक्षमस्ति देवेश तन्मन्त्रागममादरात् ।
पाठान्मन्त्रोक्तिफलदं कुरु चिन्मयविग्रह ॥
इत्युक्तं तु महेशस्तु तदादिश्य पिता ययौ ।
आदिनाथस्तु गिरिजे शिष्यरै(ष्यान)ध्यापितं(पयन्) मनुम् ॥
तस्य तस्यैव भाषायां मन्त्रं तज्जपलक्षणम् ।
प्रयोगं चोपसंहारमुक्तवानपि पार्वति ॥
षट् प्रयोगान् क्रमेणैव देवतामन्त्रमादरात् ।
* * * *
आदौ तद्देवतां वक्ष्ये मत्स्येन्द्रोक्तिसुसिद्धये ।

Colophon :

इति श्रीपार्वतीपुत्रादिनाथविरचिते पञ्चद्राविडशाबरचिन्तामणिर्नाम प्रथमः पटलः ॥

End :

बलिं दद्यात् कुक्कुटं च मद्यमांसादिकं तथा ।
तथैव प्रेतभूमौ तु धैर्यबुद्धिसमान्वितम् ॥
* * * *

Colophon :

इति श्रीपार्वतीपुत्रादिनाथविरचिते शाबराचिन्तामणिर्नाम दशमपटलः ॥

No. 8102. शारदातिलकम्.

ŚĀRADĀTILAKAM.

Substance, paper. Size, $9\frac{1}{8} \times 7\frac{1}{8}$ inches. Pages, 466. **Lines**, 16 on a page. Character, Telugu. Condition, good. **Appearance**, new.

Complete.

Deals with the ritualistic details connected with various Mantras and also gives the method of repeating them.

By Lakṣmaṇadēśika, son of Śrīkṛṣṇadēśika who is the son of Vijaya also called Ācāryapaṇḍita and grandson of Mahāraṇa or Mahāvana or Mahābala.

Contains the following Paṭalas :—

१. उपोद्घातः.	१३. गणपतिमन्त्रविधिः.
२. वर्णाभिव्यक्ति etc. (देवतास्वरूपमन्त्रजननादि).	१४. सोममन्त्रविधिः.
३. दीक्षाक्रमः.	१५. वैष्णवमहामन्त्रविधिः.
४. दीक्षाविधिः.	१६. नारसिंहमन्त्रविधिः.
५. अग्निसंस्कारहोमः.	१७. जगन्मूलमन्त्रविधिः.
६. वर्णतनुनिरूपणम्.	१८. महेशमन्त्रविधिः.
७. वाग्देवीपूजाविधिः.	१९. मन्त्ररत्नकथनम्.
८. श्रीमन्त्रनिरूपणम्.	२०. अघोरास्त्रमन्त्रविधिः.
९. भुवनेश्वरीमन्त्रविधानम्.	२१. गायत्र्याग्नेयास्त्रमन्त्राविधि'.
१०. त्वरितामन्त्रविधानम्.	२२. कृत्यास्त्रमन्त्रविधिः.
११. दुर्गामन्त्रविधानम्.	२३. त्र्यम्बकमन्त्रविधिः.
१२. त्रिपुरामहाविद्या.	२४. यन्त्रभेदकथनम्.
	२५. यमादियोगकथनम्.

Beginning :

नित्यानन्दवपुर्निरन्तरमिलत्पञ्चाशदर्णैः क्रमात्
व्याप्तं येन चराचरात्मकमिदं शब्दार्थरूपं जगत् ।
शब्दब्रह्म यदूचिरे सुकृतिनश्चैतन्यमन्तर्गतं
तद्वोऽव्यादनिशं शशाङ्कवदनं वाचामधीशं महः ॥

* * * *

सारं वक्ष्यामि तन्त्राणां शारदातिलकं शुभम् ।
धर्मार्थकाममोक्षाणां प्राप्तेः प्रथमकारणम् ॥
शब्दार्थसृष्टिर्मुनिभिश्छन्दोभिर्दैवतैस्सह ।
विधिश्च मन्त्रयन्त्राणां तन्त्रेऽस्मिन्नभिधीयते ॥

* * * *

Colophon :

इति श्रीशारदातिलके प्रथमः पटलस्समाप्तः ॥

End :

दिक्कालादिविवर्जिते परशिवे चैतन्यमात्रात्मके
शून्ये कारणपञ्चकस्य निलये(यं)नीते निरालम्बने ।
आत्मानं विनिवेश्य निश्चलधिया निर्लीनसर्वेन्द्रियो
योगी योगफलं प्रयाति सुलभं नित्योदितं निष्क्रियम् ॥

महारणाय प्रणतोऽस्मि तस्मै संविल्लतालिङ्गनशीतलाय ।
येनार्पितं मुक्तिफलं विपक्कमात्मादि(म्नाय)शाखाभिरुपाश्रितेभ्यः ॥

तस्मादभूदखिलदेशिकवारणेन्द्रः
षट्कर्मसागरविहारविनोदशीलः ।
यस्य त्रिलोक(विततं)विजयाभिधान-
माचार्यपण्डित इति प्रथयन्ति सन्तः ॥

तन्नन्दनो देशिकदेशिकोऽभूत्
श्रीकृष्ण इत्यभ्युदितप्रभावः ।
यत्पादकारुण्यसुधाभिषेकां
लक्ष्मीं परामश्नुवते कृतार्थाः ॥

आश्चर्यविद्याविभवस्य तस्य जातः प्रभोर्लक्ष्मणदेशिकेन्द्रः ।
विद्यास्वशेषासु कलासु सर्वास्वनि(पि)प्रभां(थां)यो महतीं प्रपेदे ॥
आदाय सारमखिलं निखिलागमेभ्यश्श्रीशारदातिलकनाम चकार तन्त्रम् ।
प्राज्ञस्स एष पटलैरिह तत्त्वसङ्ख्यैः प्रीतिप्रदानविधये विदुषां चिराय ॥

अनाद्यन्तां शम्भोर्वपुषि कलितार्धेन वपुषा
जगद्रूपं शश्वत्सृजति महनीयामपि गिरम् ।
सदर्थी शब्दार्थस्तनभरनता शङ्करवधूः
भवद्भूत्यै भूयात् भवजनितदुःखौघशमनी ॥

Colophon :

इति शारदातिलके पञ्चविंशः पटलः समाप्तः ॥

No. 8103. शारदातिलकम्.

ŚĀRADĀTILAKAM.

Pages, 24. Lines, 22 on a page.

Begins on fol. 56*a* of the MS. described under No. 5507.

Incomplete. Paṭalas 1 and 2 only.

Same as the above.

No. 8104. शारदातिलकम्.

ŚĀRADĀTILAKAM.

Substance, palm-leaf. Size, $14\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 378. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Complete.

Same as the above.

No. 8105. शारदातिलकव्याख्यानम्.

ŚĀRADĀTILAKAVYĀKHYĀNAM.

Substance, paper. Size, $14\frac{1}{8} \times 9$ inches. Pages, 684. Lines, 25 on a page. Character, Telugu. Condition, injured. Appearance, new.

A commentary by Bhaṭṭarāghava. The commentary is called Padārthādarśa.

Breaks off in the middle of the genealogy of the commentator given at the end of the commentary on the last Paṭala.

Beginning :

श्रीकण्ठं निजताण्डवप्रवणताप्रोद्दाममोहोदयं
पश्यन्त्या कुतुकाद्भुतप्रियतया सञ्जातभावं मुहुः ।
मन्दान्दोलितदुग्धसिन्धुलहरीलीलारसं लोचन-
प्रान्तोन्मीलनमातनोतु भवतां भूतिं भवान्याश्शुभम् ॥

*　　*　　*　　*

शारदातिलके तन्त्रे गुरूणामुपदेशतः ।
पदार्थादर्शटीकेयं राघवेण विरच्यते ।

* * * *

अथेश्वरस्सर्वा अपि श्रुतीः भवपाशबद्धानां जन्तूनां स्वर्गाय मुक्तये च उपदिशति स्म । अन्येषां स्मृतिशास्त्रादीनां तन्मूलकत्वेन तदर्थप्रतिपादकत्वेन च प्रामाण्यमिति प्रसिद्धतरम् । अस्यास्त्वागमस्मृतेः कथं तन्मूलकत्वम् ? ।

End:

तन्त्रार्थमुपसंहरन्नाशिषां युगलं करोति—अनादीति । मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषकाण्यायुष्मत्पुरुषकाणि चेति भगवत्पतञ्जलिवचनादिति शिवम् ॥

पुरं गोदावर्या विलसदुपकण्ठे जनततं
जनस्थानं नाम प्रथितमभवद्दक्षिणदिशि ।
महाराष्ट्रे देशे जनकतनयालक्ष्मणवृतः
पुरा रामो यस्मिन्नवसदतितुष्टेन मनसा ॥

तस्मिन् पुरे ब्राह्मणसत्तमानां कुले वि(शु)द्धे महति प्रसिद्धे ।
श्रीभट्टरामेश्वर इत्युदारो गुणैरभूद्वादिमहेभसिंहः ॥
तस्मादमुत्राक्षण(भूत्तीक्ष्ण)कुशाग्रबुद्धिः श्रीभट्टपृथ्वीधरनामधेयः ।
अनेकधाध्यापयदेष माद(णवान्)वेदान्तशास्त्रं फणिभाषितानि ॥
[भू]गीर्वाणाचाया(र्य)वर्यो दिवि कृतवसतिर्यद्भयादेव शङ्क
शेषः पातालमूलं सपदि(गुरु)वरा(देव)भू(भी)त्या विवेश ।
अन्येषां कैव वार्ता कृतकृतकवचश्चापलानां कृतं तैः
सम्यक् शक्योऽस्य वक्तुं न हि वदनशतैरप्यशेषप्रभावः ॥

* . * * *

आयुर्वेदनिधिः कलासु कुशलः कामार्थशास्त्रे गुरुः
सङ्गीते निपुणस्सदागमनिधेः पारं प्रयातः परम् ।

श्रीदुर्गे गणनायक ग्रहगुरो गोविन्द गौरीपते
युष्मानर्थितया नतेन शिरसा सोऽयं प्रबद्धोऽञ्जलिः ॥
मन्त्रार्चादिविवेचने यदि भवेत्त्वं बालिशत्वं भ्रमात्
काचित्कं मम भक्तिभावितहृदो दासस्य तत् क्षम्यताम् ।

* * * *

कायस्था इव वाचकाः कति चन प्रायेण मूका इति
श्रोतारस्त्वपरे शुका इव परे साधुप्रलापाः पुनः ।
ग्रन्थग्रन्थिविवेचनैकचतुरा ये कोविदाः केवलं
द्वित्रास्ते तदुदीरिताच(व)गतयो विज्ञा वपुः(बभुः) पश्चषाः ॥

No. 8106. शारदातिलकव्याख्या.
ŚĀRADĀTILAKAVYĀKHYĀ.

Pages, 135. Lines, 21 on a page.

Begins on fol. 69*a* of the MS. described under No. 5507.

Same as the above.

Breaks off in the third Paṭala.

No. 8107. शास्तृमन्त्रकल्पः.
ŚĀSTṚMANTRAKALPAḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 20*a* of the MS. described under No. 2854.

Complete. 47th Adhyāya of Ākāśabhairavakalpa.

On the details connected with the Mantras addressed to Śāstṛ and on the manner of repeating them.

Beginning:

श्रीशिव उवाच—

श्रृणु गुह्यं महामन्त्रं महाशास्तुर्वदाम्यहम् ।
भोगमोक्षप्रदं दिव्यं पुत्रसंपत्प्रदं परम् ॥

* * * *

ऋषिरस्यार्धनारीशः छन्दोऽनुष्टुप् ततः परम ।
देवता तु महाशास्ता देवो हरिहरात्मजः ॥
मायावर्णन्तु बीजं स्यात् रमा शक्तिरतः परम् ।
मम सर्वार्थसिद्ध्यर्थे विनियोगो वरानने ॥

End:

सम्पाद्य(म्पद)न्नसमृद्धौ च प्रसादेऽनुग्रहे परे ।
तम्मे कुरु कुरु स्वाहेत्यखिलं प्रजपेद्बुधः ॥

सहक्षमलवरयूं हसक्षमलवरयूं आनन्दनाथायानन्दवल्लीवल्लभाय स्वाहा ॥

Colophon:

इत्याकाशभैरवकल्पे महाशास्तृमन्त्रो नाम सप्तचत्वारिंशोऽध्यायः ॥

No. 8108. शुद्धदक्षिणामूर्तिमन्त्रोद्धारः.

ŚUDDHADAKṢIṆĀMŪRTIMANTRŌDDHĀRAḤ.

Pages, 8. Lines, 16 on a page.

Begins on fol. 248*b* of the MS. described under No. 424.

Complete.

On the manner of pronouncing the Mantra addressed to Dakṣiṇāmūrti and on the rites to be observed as preliminary to the repetition of that Mantra. The Mantra here is unmixed with the syllables relating to हंस, मेधा, etc., and is hence called शुद्ध.

Beginning:

ओं ब्रह्माद्यशेषेत्यादि ओं क्लीं पशु हुं फट् इति पाशुपतास्त्रेणाङ्गुलिन्यासकरन्यासकरशोधनव्यापकत्रयतालत्रयदिग्बन्धनाग्निप्राकारान् विधाय ह ह हे ति मन्त्रत्रयेण मूलाधारहृदयभ्रूमध्यगतसुषुम्नानाडीपर्वत्रयं भङ्क्त्वा ।

End:

आदौ वेदादिमुच्चार्य स्वराद्यं सविसर्जनम् ।
पश्चार्णे तत उद्धृत्य पुनरंसविसर्गकम् ॥
अन्ते समुद्धरेत्तारं मनुरेवं नवाक्षरः ।
ओं अः नमश्शिवाय अः ओं मनुः ॥

No. 8109. शूलिनीदुर्गाविधानम्.

ŚŪLINĪDURGĀVIDHĀNAM.

Pages, 150. Lines, 17 on a page.

Begins on fol 1*a* of the MS. described under No. 7784.

On the ritualistic details connected with the Śūlinīdurgāmantra and on the manner of repeating the Mantra.

Contains the following Upadēśas:—

१. दुर्गाक्रियाविधिः.
२. विविधधूपाञ्जनम्.
३. ध्यानभेदः.
४. कालनिर्णयविधानम्.
५. नानादैवतयन्त्रदोषारिष्टनिवारणम्.
६. हिरण्येश्वरीविधानम्.
७. सिद्धिलयभावनाविधानम्.
८. एकादशावस्थाविधिः.
९. सर्वोच्चाटनम्.
१०. रक्तबीजाविधिः.
११. क्रियोत्कर्षः.
१२. नानाविवादविजयः.
१३. विश्वरूपस्तुतिः.
१४. क्रियाविचित्रम्.
१५. मनुवेधरहस्यम्.
१६. क्रियामोघम्.

Beginning:

अस्य श्रीशूलिनीदिग्बन्धनमालामन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीशूलिनीदुर्गा देवता । . . . .

अथ ते शूलिनीदेव्यास्सुमुखीकरणस्तुतिम् ।
प्रवक्ष्यामि समासेन सर्वकामार्थसिद्धये ॥

* * * *

Colophon :

इति दुर्गाक्रियाविधिर्नाम प्रथमोपदेशः ॥

End :

दशदानं विशेषेण देवताविघ्नशान्तये ।
एवमन्योन्ययुक्तानि दानानि निखिलानि च ॥

Colophon :

इति श्रीमहाशूलिनीदुर्गाविधाने क्रियामोघं नाम षोडशोपदेशः ॥

No. 8110. शूलिनीदुर्गाविधानम्.
ŚŪLINĪDURGĀVIDHĀNAM.

Pages, 12. Lines, 19 on a page.

Begins on fol. 63*a* of the MS. described under No. 2886.

Upadēśas 4 to 13 in the Ākāsabhairavakalpa. These Upadēśas are not in the same order as in the last

Similar to the above.

Beginning :

श्रीशूलिनीदुर्गाकल्पविशेषो लिख्यते ।

शिव उवाच—

श्रीमहाशूलिनीदेव्या यन्त्रयन्त्रार्णलक्षणम् ।
भूतावेशाविकारांश्च तन्निवारणलक्षणम् ॥
अविस्तृतमसङ्कोचमशेषार्थफलप्रदम् ।
ऋजु तच्छृणु वक्ष्यामि गोपनीयं जगद्धितम् ॥

Colophon :

इति महाशैवतन्त्रे अतिरहस्ये आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे शङ्करेण विरचिते दुर्गाक्रियाविधाने चतुर्थ उपदेशः ॥

End :

इति सुमतिरशेषदेवतानां भजनविधानविशेषसूक्ष्मसूक्ष्मम् ।
शिवगुरुकरुणाकटाक्षलब्धं स्वमधिकरोतु शिवैक्यभाग्यसिद्ध्यै ॥

Colophon :

इति महाशैवतन्त्रे पुरश्चर्या प्रकरणविधिर्नाम त्रयोदश उपदेशः ॥

No. 8111. शूलिनीप्राणयन्त्रोद्धारः.

ŚŪLINĪPRĀṆAYANTRODDHĀRAḤ.

Page, 1. Lines, 19 on a page.

Begins on fol. 16*b* of the MS. described under No. 2886.

Complete.

On the manner of drawing the Yantra and filling it up with the syllables relating thereto. The Yantra is considered to have the power of taking away the life of one's enemies.

Beginning :

रत्नक्ष्माकोणमूतस्थलशशिहृदये मूलमन्त्रं द्विवारं
साध्यं मर्मस्वनङ्गप्रणवहृदि रवौ वेदमन्यौ हुताशम् ।
शूलं रेखाग्रदेशे निखिललिपिवृतं सर्वदोषापहारं
क्षिप्रारोग्या(दि)सिद्धिप्रदमाणिविजयं शूलिनीप्राणयन्त्रम् ॥

End :

तस्य परितः अग्निबीजं विलिखेत् । वदमन्त्रः । सारकं भागचर्माणं प्रतिकारक्रियाकारः स्वाहा ज्वल ज्वल दुष्टग्रहशूलिनि फट् हुं ॥

No. 8112. शूलिनीमन्त्रकल्पः.

ŚŪLINĪMANTRAKALPAḤ.

Pages, 9. Lines, 17 on a page.

Begins on fol. 83*b* of the MS. described under No. 5574.

Complete. Contains the 6th Upadēśa and the 29th Adhyāya of Ākāśabhairavakalpa.

On the details connected with the Śūlinīmantra and on the manner of repeating the Mantra.

Beginning :

अथ वक्ष्यामि शूलिन्या मन्त्रं दोषापहारकम् ।

स्वस्तिदं सर्वलोकानां कार्यसिद्ध्येकदायकम् ॥

*　　*　　*　　*

शूलिनि ज्वालामालिनि महाबलपराक्रमे ज्वल ज्वल प्रज्वल ।

*　　*　　*　　*

Colophon :

इति श्रीमहाशैवतन्त्रे आकाशभैरवकल्पे अतिरहस्ये प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे शङ्करेण विरचिते दुर्गाक्रियाविधाने दोषापहारो नाम षष्ठ उपदेशः ॥

End :

मध्ये शक्तिं [ह्रीं] वसुदललसच्छूलिनीवर्णयुग्मं
किञ्जल्काद्यं महिषमथिनीमन्त्रवर्णं बहिश्च ।
त्रिष्टुब्दुर्गालिपिभिर्राभ(परि)वृतं भूपुराख्येऽन्तरस्था
दुर्गाबीजं त्वभिधमभितः शूलिनीयन्त्रमेतत् ॥

Colophon :

इति श्रीआकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे शङ्करेण विरचिते शरभसालुवपक्षिराजकल्पे दुर्गाप्रकरणं नामैकोनत्रिंशोऽध्यायः ॥

No. 8113. शूलिनीमन्त्रकल्पः.
ŚŪLINĪMANTRAKALPAḤ.

Pages, 7. Lines, 5 on a page.

Begins on fol. 56*a* of the MS. described under No. 29

Incomplete.

Similar to the above

Beginning :

श्रीदेव्युवाच—

श्रीमत्सकलकल्याणबोधकेश जगत्पते ।
प्रतिक्रियास्तोत्रमन्त्वं प्रवदस्व दयानिधे ॥

ईश्वर उवाच—

श्रृणु देवि प्रवक्ष्यामि गुह्याद्गुह्यमनुत्तमम् ॥

* * * *

ऋष्यादिकं यथामूलं विशेषात्कर्मचिन्तितम् ।

प्रतिक्रियार्थसिद्ध्यर्थे विनियोगः कराङ्गयोः ॥

End:

ब्रह्मराक्षसवेतालभीमोन्मत्तमहाग्रहम्(ाः) ।

मि(भू)तापस्मारकुष्ठादिपापविक्रमखेचराः ॥

ज्वालामुखीतमोहाराप्रेतपैशाचिका ग्रहाः ।

सिंहेभमहिषव्याघ्रऋक्षवानरसौकराः ॥

No. **8114.** शूलिनीमन्त्रकल्पः.

ŚŪLINĪMANTRAKALPAḤ.

Pages, 3. Lines, 18 on a page.

Begins on fol. 146*a* of the MS. described under **No. 5673,** wherein this is given as Śūlinīkavaca.

Complete.

Similar to the above.

Beginning:

अथातस्सम्प्रवक्ष्यामि शूलिनीं तु विशेषतः ।

समाहितेन मनसा श्रृणु सर्वं वरानने ॥

ब्रह्मा श्रीशूलिनीदुर्गामन्त्रस्य ऋषिरुच्यते ।

गायत्री छन्द इत्युक्तो(क्तं)देवता शूलिनीश्वरी ॥

दुङ्कारं बीजमित्युक्तं स्थाणुश्शक्तिस्ततः परम् ।

स्वेच्छाप्रयोगसिद्ध्यर्थे विनियोगस्तथाम्बिके ॥

End:

शूलिनीयं महामन्त्रं दुर्वारं सर्वजन्तुभिः ।

गुह्याद्गुह्यतरं श्रेष्ठं गोपनीयं प्रयत्नतः ॥

* * * *

बीजाक्षरेण प्राणायामत्रयं कृत्वा मम सकलविद्यासिद्ध्यर्थे जपे वि-
नियोगः । हं सामिति षडङ्गन्यासः ।

अथ ध्यानम्—

हंसारूढं हयग्रीवं दीर्घस्तब्धश्रुतिं हरिम् ।
दधतं पुस्तकं ज्ञानमुद्रां दधतमाश्रये ॥
हसौं हृसौं ॥

No. 8115. शूलिनीयन्त्रम्.
ŚŪLINĪYANTRAM.

Pages, 5. Lines, 14 on a page.

Begins on fol. 165*a* of the MS. described under No 5673.

Complete.

On the manner of drawing the Yantra relating to Śūlinīmantra.

Beginning :

अथातः संप्रवक्ष्यामि शूलिनीयन्त्रमुत्तमम् ।
समाहितेन मनसा शृणुष्व परमेश्वरि ॥
त्रिकोणं विलिखेत्पूर्वं तद्बहिर्वृत्तमालिखेत् ।
तद्बाह्ये चाष्टपत्रन्तु पुटीकृत्य च भूपुरम् ॥

End :

इदं कल्पं मयाख्यातं गुह्याद्गुह्यतरं शुभम् ।
यः पठेच्छृणुयाद्वापि सर्वपापैः प्रमुच्यते ॥

Colophon :

इति श्रीमहादेवविरचिते आकाशभैरवकल्पेऽतिरहस्यशूलिनीदुर्गा
कल्पं नामाष्टत्रिंशोऽध्यायः ॥

No. 8116. शूलिनीयन्त्रलक्षणम्.
ŚŪLINĪYANTRALAKṢAṆAM.

Pages, 5. Lines, 6 on a page.

Begins on fol. 134*a* of the MS. described under No. 2848.

Complete.

On the measurements to be observed in drawing the Śūlinī-yantra.

Beginning:

श्रीशिव उवाच—

श्रीमहाशूलिनीदेव्या यन्त्रपीठस्य लक्षणम् ।
विशालदीर्घमानञ्च(सावधानं)शृणूच्यते ॥
यन्त्रासनं यन्त्रपीठं पटं पट्टश्च पट्टिका ।
पत्रिका बरिका धात्री फालिका फलका तथा ॥
अङ्गुष्ठपर्वमात्रं स्यात्पीठिकैकाक्षरस्य च ।
एकावरणमन्त्रस्य फलकोऽङ्गुष्ठमात्रकः ॥

End:

इतीदं परं शूलिनीदेवतायाः प्रयोगोचिताशेषयन्त्रासनानाम् ।
विशेषेण रेखार्णयुक्तावकाशप्रमाणादिकं संविदन्त्वात्मनाथात् ॥

Colophon:

इति श्रीमहाशैवतन्त्रे दुर्गाविश्वपालविधाने पीठिकादिलक्षणं नाम द्वितीयोपदेशः ॥

No. 8117. शूलिनीयन्त्रोद्धारः.

ŚŪLINĪYANTRŌDDHĀRAḤ.

Page, 1. Lines, 19 on a page.

Begins on fol. 6*a* of the MS. described under No. 2886, wherein this has been omitted to be shown among the other works.

Complete.

On the method of drawing the Yantra relating to Śūlinī-mantra.

Beginning:

एकारे वृत्तबाह्ये निगमसमदले दम्पतिश्चेति चाग्रा-
द्वृत्ताद्बाह्ये दशारे स्मरमणिसहिते यस्तदूर्वादिरान्तम् ।

योनिं योन्यन्तराले शिशिरकरदले शूलिनी युक्तबाह्ये
साध्यं नानावधूनां तनयदमतुलं स्वप्नभोगार्तिवज्रम् ॥

End:

त्रिपञ्चकोष्ठे परिलिख्य शूलिनीं मध्ये तु बीजाङ्कितसाध्ययुक्तम् ।
रेखाशिरःकल्पितशूलयुक्तं यन्त्रं महाभूतपिशाचवैरी ॥

No. **8118.** शूलिनीयन्त्रोद्धारः.
ŚŪLINĪYANTRŌDDHĀRAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. *5a* of the MS. described under No. 5858.

Complete.

Similar to the above.

Beginning:

त्रिपञ्चकोणेषु विलिख्य शूलिनीं ससाध्यनामाङ्कितमन्त्रबीजम् ।
रेखाशिरःकल्पितमन्त्रवैरं यन्त्रं महाभूतपिशाचवैरम् ॥
ओं दुं दुर्गे ज्वल ज्वल शूलिनि दुष्टग्रहं हुं फट् स्वाहा ।
शूलदलमध्ये यं रं [वि]लिखित्वा प्राग्भागे कर्णिकामध्ये पञ्च तत्त्वानि लिखित्वा लं वं रं यं हं ।

End:

दिक्पालबीजान् विलिख्य लं रं शं सं वं यं षं हम् ॥

No. **8119.** शूलिनीयन्त्रोद्धारः.
ŚŪLINĪYANTRŌDDHĀRAḤ.

Pages, 5. Lines, 14 on a page.

Begins on fol. 167*a* of the MS. described under No. 5673.

Similar to the above.

Beginning:

श्री(त्रि)पञ्चकान्नाम(कोणेषु)विलिख्य शूलिनीं स्वसाध्यनामाङ्कित-
[मन्त्यबीजम् ।
रेखाशिरःकल्पितशूलयुक्तं यन्त्रं महाभूतपिशाचवैरी ॥

वशीकरणं क्लां क्लीं क्लूं ज्वल ज्वल भूतप्रेतनिवारिणि ईं रीं रूं ज्वरविषसङ्घविमोचनीं हुं फट् स्वाहा ।

End:

महादेवीं महादुर्गां चण्डिकां हेमरूपिणीम् ।
ध्यात्वा योगेन मनसा सर्वकामफलप्रदाम् ॥

No. 8120. शैवसिद्धान्तरहस्यम्.

ŚAIVASIDDHĀNTARAHASYAM.

Pages, 6. Lines, 24 on a page.

Begins on fol. 267*b* of the MS. described under No. 7941.

16th Paṭala only.

This Paṭala treats of the several kinds of Pañcavaktrahanūmanmālāmantra, and of the effects of repeating those Mantras.

Beginning:

पापशुद्धिमथो वक्ष्ये पूजाहोमं विना तथा ।
स्मरणादेव तन्त्रस्य पापसङ्घातपञ्जरम् ॥

* * * *

ओं ह्रौं क्ष्रां क्ष्रीं हुं हसौं नमः पञ्चवक्त्राय हनुमते महाबलाय खे खे हुं फट् स्वाह ।

End:

राक्षसानपि गन्धर्वान् भूतान् दुष्टग्रहानपि ।
ग्रहानशेषान्निश्शेषान् नाशयेन्नात्र संशयः ॥

Colophon:

इति श्रीशैवसिद्धान्तरहस्ये पञ्चवक्त्रहनुमन्मालामन्त्रप्रकारो नाम षोडशः पटलः ॥

No. 8121. श्रीमन्त्रपूजाविधानम्.

ŚRĪMANTRAPŪJĀVIDHĀNAM.

Pages, 4. Lines, 7 on a page.

Begins on fol. 60*a* of the MS. described under No. 5445, wherein this is shown as Lakṣmīpūjāvidhāna among the other works.

Incomplete.

Forms a portion of Dakṣiṇāmūrtisaṁhitā. Contains the first Paṭala and a portion of the second.

On the details connected with the Pūjā, Yantra, etc., of the Lakṣmīmantra and on the manner of repeating the Mantra.

Beginning :

श्रीमच्छ्रीकोशहृदयं पञ्चसिंहासनात्मकम् ।
फलं कल्पलतानां च चारुरत्नस्फुरत्कलाम् ॥

* * * *

श्रीदेव्युवाच—

कृपामूल महादेव कृपयानन्दमन्दिर ।
किं तद्ब्रह्ममयं धाम श्रोतुमिच्छामि तत्त्वतः ॥
कथं श्रीसहितं देव श्रीकोशहृदयं कथम् ।
पञ्चसिंहासनैस्सेव्यं कथं कल्पलतात्मकम् ॥
कथं रत्नात्मकं देवि कथमाय[ा]तनात्मकम् ।
कथमाम्नायसंसेव्यं कथं नित्यात्मकं प्रभो ॥

* * * *

षडङ्गादि न्यसेन्मन्त्री हृच्छिरश्च शिखां ततः ।
कवचं नेत्रमस्त्रं च नमस्स्वाहा क्रमेण च ॥
वषड् दुं वौषडन्तं हुं फटिभिस्सह विन्यसेत् ।
अष्टपत्रं लिखेद्यन्त्रं बहिर्भूबिम्बमालिखेत् ॥

* * * *

पञ्चैस्त्रिमधुरैर्हुत्वा पुरश्चारी ततो भवेत् ।
एवं यस्सिद्धमन्त्रस्तु सर्वसाम्राज्यदो भवेत् ॥

Colophon:

इति श्रीदक्षिणामूर्तिसंहितायामेकाक्षरीलक्ष्मीपूजाविधानं नाम प्रथमः पटलः ॥

End:

महालक्ष्मीर्महादेवि पुर आरभ्य पूजयेत् ।
इन्द्रादयस्तु सम्पूज्या कामिनी . . . . . ॥

No. 8122. श्रीरुद्रयन्त्रोद्धारः.

ŚRĪRUDRAYANTRŌDDHĀRAḤ.

Page, 1. Lines, 19 on a page.

Begins on fol. 6*a* of the MS. described under No. 2886, wherein this has been omitted to be shown among the other works.

On the manner of drawing the Yantra relating to Śrīrudramantra.

Beginning:

त्रिपञ्चशूलं चतुरश्रकन्तथा मध्ये च साध्यं परितश्च शङ्करम् ।
बहिश्च तारं हुतभुक्समन्वितं श्रीरुद्रयन्त्रं मुनयो वदन्ति ॥

End:

सवातवृत्तिम् ऋतुकोणलक्ष्मीं मायाश्च बाह्यावृततारसाध्यम् ।
आराध्य यन्त्रं प्रजपेत्सहस्रमाकर्षणं चापि सुरासुराणाम् ॥

No. 8123. श्रीविद्याचक्रलेखनप्रकारः.

ŚRĪVIDYĀCAKRALĒKHANAPRAKĀRAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 36*a* of the MS. described under No. 5987, wherein this has been shown as Śrīcakradhyāna among the other works

Complete.

On the manner of filling up the Śrīcakra with the syllables of the Śrīvidyāmantra.

Beginning :

बिन्दौ कामकलां त्रिकोणनिलये तारत्रयं संलिखेत्
अष्टाश्रिष्वनुवर्णमूलमनवो लेख्या दशारद्वये ।
मध्याद्यादिमनोश्छटा द्विमुनिभिः संवेष्ट्य मन्वश्रके
पत्रेष्वष्टसु तारकाष्टकमिदं लेख्यं सदा संख्यगैः ॥
द्व्यष्टपत्रे स्वराद्यष्टौ त्रिवृत्ते मातृकां लिखेत् ।
चतुरश्रं चतुर्द्वारे दुर्गाविघ्नेशभैरवान् ॥

End :

एवं वर्णयुतं चक्रं पूजयित्वा सुधारकः ।
शिवेन समतां याति श्रीविद्यानुग्रहात्परम् ॥

Colophon :

इति श्रीचक्रे ध्यानम् ॥

No. **8124.** श्रीविद्याचक्रलेखनाविधिः.

ŚRĪVIDYĀCAKRALĒKHANAVIDHIḤ.

Pages, 11. Lines, 18 on a page.

Begins on fol. 75*a* of the MS. described under No. 5593.

Complete.

Similar to the above.

Beginning :

अथ कल्पान्तरोक्तप्रकारेणापि श्रीविद्याचक्रलेखनप्रकारा लिख्यन्ते ।
अथ पुरतो विहाय निजविष्टरात्
अरत्निमवनीमथ समन्त्रक्रमसाधनयुताः ।
अङ्गुलीयमव(ळ)देवभागवसुतोय-
पद्मभूरचयाम चक्रमरुणं सुकेसरम् (?) ॥
देवीस्तुता मे गङ्गावली स्तुतेति प्रदृश्यते ।
मानं श्रीचक्रनिमाणसूत्रेषु नवसु क्रमात् ॥

आद्ये द्वितीयेऽष्टमके नवमे च यथाक्रमम् ।
मार्जयेद्गुणभागांशाद्वृत्ताथै(यै)कत्र चान्यतः ॥

End :

अं अं सौः इति चतुरश्रे इति नवचक्रनायकीबीजानि तत्तदावरणात्पुरतो विलिखेत् ॥

Colophon :

इति श्रीचक्राक्षरलेखनविधिः सम्पूर्णः ॥

No. **8125.** श्रीविद्याचक्रविषयोपन्यासः.
ŚRĪVIDYĀCAKRAVIṢAYŌPANYĀSAḤ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 170*a* of the MS. described under No. 673.

Incomplete.

On the form of the Śrīcakra and on the manner of worshipping it.

Beginning :

श्रीदेव्युवाच—

नमस्ते जगदाधार लोकानुग्रहकारक ।
पिण्डब्रह्माण्डयोरैक्यं चक्ररूपं वद प्रभो ॥

ईश्वर उवाच—

शृणु देवि प्रवक्ष्यामि रहस्यं त्रिपुरेश्वरि ।
पिण्डाण्डरूपं श्रीचक्रं ब्रह्माण्डात्मकमीश्वरि ॥
श्रीकण्ठैः शक्तिचक्रैश्च नवभिर्वलयैस्त्रिभिः ।
पद्मद्वयेन संबन्धः श्रीचक्रं शिवयोर्वपुः ॥

End :

त्रिकोणरूपिणी शक्तिः बिन्दुरूपः शिवः स्मृतः ।
अविनाभावसंबन्धस्तस्माद्बिन्दुत्रिकोणयोः ॥
एवं विभागमज्ञात्वा श्रीचक्रं यस्समर्चयेत् ।

No. 8126. श्रीचक्रविषयोपन्यासः.

ŚRĪCAKRAVIṢAYŌPANYĀSAḤ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 172*a* of the MS. described under No. 673, wherein this has been omitted to be shown among the other works.

Incomplete.

Same as the above.

No. 8127. षण्मुखमन्त्रकल्पः.

ṢAṆMUKHAMANTRAKALPAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 28*a* of the MS. described under No. 2854.

Complete.

Forms the 60th Adhyāya of Ākāśabhairavakalpa.

Deals with the Yantra, Pūjā, etc., in relation to the Mantra addressed to Ṣaṇmukha or Subrahmaṇya and also with the manner of repeating the Mantra.

Beginning:

अथ षण्मुखमन्त्रस्य भगवान् कश्यपो ऋषिः ।
त्रिष्टुप् छन्दस्तथा देवी सुब्रह्मण्योऽथ देवता ॥
सुं बीजं ह्रीं शक्तिः ततः परं विनियोगो विजयाय वै ।
सा(सु)मित्यादिकराङ्गस्य न्यासं मूलयुतं शिवे ॥
शक्तिहस्तं विरूपाक्षं शिखिवाहनषडाननम् ।
दारुणं रिपुरोगघ्नं भावये कुक्कुटध्वजम् ॥

End:

गुहमाराध्य यन्त्रे तु जपेत् स्वेष्टार्थसिद्धये ।
त्रिसहस्रजपादेव साधकस्याखिलं लभेत् ॥
अ[ख]ण्डादेमेनि (नेमि) पर्यन्तं कार्येषु सकलेषु वै ।
तत्तत्कार्यार्थसिद्ध्यन्ति(र्थे)त्रिसहस्रं जपेच्छिवे ॥

Colophon:

इत्याकाशभैरवकल्पे सुब्रह्मण्यमन्त्रं नाम षष्टितमोऽध्यायः ॥

No. 8128. षोडशाक्षरीमन्त्रोद्धारः.

ṢŌḌAŚĀKṢARĪMANTRŌDDHĀRAḤ.

Pages, 3. Lines, 9 on a page.

Begins on fol. 13*b* of the MS. described under No. 5868.

On the manner of pronouncing the sixteen-syllabled Mantra addressed to Durgā.

Beginning :

श्रीपार्वत्युवाच—

द्वादशाक्षरमन्त्रस्य विधानं सम्यगीरितम् ।
षोडशाक्षरमन्त्रस्य चोद्धारं सम्यगीरय ॥
प्राणान्दद्याद्धनं दद्यान्मानं दद्यात्तथापि वा ।
पुत्रान् दद्यात्पशून् दद्यान्न दद्यात् षोडशाक्षरीम् ॥

* * * *

तारमादौ समुच्चार्य ततो वाग्भवमुद्धरेत् ।
कामबीजं त्रिधा कुर्यात् जातित्रितयसंयुतम् ॥

End :

निधिनिक्षेपसंरक्षोपसंरक्षा महाग्रहाः ॥
फलायनमनुक्तं यत् तत्सर्वं द्वादशार्णवत् ॥

No. 8129. संग्रहतृचकल्पः.

SAṄGRAHATṚCAKALPAḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 92*a* of the MS. described under No. 2854.

Complete.

Gives the method of worshipping the Sun briefly by means of the three Ṛks, 11 to 13 of the 50th Sūkta in the I Maṇḍala of the Ṛgvēda.

Beginning :

एवङ्गुणविशेषणाविशिष्टायामस्यां शुभतिथौ छायादेवीसमेतश्रीसूर्यनारायणप्रसादसिद्ध्यर्थं तृचकल्पविधानेन सूर्यनमस्कारं करिष्ये । घण्टा-

नादं कृत्वा कलशपूजां कुर्यात्। कलशोदकेन पूजोपकरणानि आत्मानं च प्रोक्ष्य तण्डुले वा विभूत्यां यन्त्रं लिखित्वा।

End:

अनेन पूजाविधानेन भगवान् सर्वात्ममकश्श्रीसूर्यनारायणः प्रीणातु। जपस्थलं प्रोक्ष्य प्रतिनित्यं पूजातण्डुलमादाय पक्वं कृत्वा भोजनं चेत् अपस्माररोगान् परिहृत्य तेजस्वी भवति। सर्वजनवश्यो भवति॥

Colophon:

इति तृचकल्पः॥

No. 8130. सप्तपारायणसङ्ग्रहः.

SAPTAPĀRĀYAṆASAṄGRAHAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 145*a* of the MS. described under No. 365, wherein this is shown as Ghāṭikāpārāyaṇavidhiḥ among the other works.

Complete.

Gives in a concise form the details regarding the Saptapārāyaṇa or the seven ways in which Dēvī is to be meditated upon and worshipped.

Beginning:

त्रिविधं भजनं त्रिकालजं दिनानित्याघटिकाक्षराण्यपि।
अमुकं क्रमामित्यजानतामतिदूरे खलु वादिसुन्दरी॥
उषसि गुरुमयीं त्वां प्रातराधारवह्नौ
दिनकृति दिनमध्ये मानसे तत्त्वरूपाम्।
शिरसि शशिनि नित्यारूपिणीं वासरान्ते
भजति गुरुकटाक्षक्षालिताशेषपापः॥

nd:

गणास्त्रिधाद्रिं च शरोऽङ्कशेषं वारं गतं चोरयवर्गनाथान्।
आ एतयाद्यर्चितवर्गनाथान् वीरार्चने मुख्यमुपासकानाम्

No. 8131. सप्तशतीमन्त्रविभागः.
SAPTAŚATĪMANTRAVIBHĀGAḤ.

Pages, 18. Lines, 5 on a page.

Begins on fol. 7*a* of the MS. described under No. 5667.

Complete.

Deals with the splitting up of Dēvīmāhātmya into Mantras according to Kātyāyanītantra: by Gōvinda, son of Bhaṭṭagaṇēśa, a resident of Benares.

Beginning:

अथ कात्यायनीतन्त्रोक्तमन्त्रविभाग एवाभियुक्तैः स्पष्टीकृत्य दर्शितः। तथाहि—

अष्टसप्तत्युत्तराणां श्लोकानां शतपञ्चकम्।
(आन्ध्रभाषया विवृतम्)।
प्रोक्तं सप्तशतीस्तोत्रे तत्सप्तशतसङ्ख्यया॥
विभज्य जुहुयान्मन्त्रमिति कात्यायनीमतम्।
मार्कण्डेय उवाचैकः सावर्ण्याद्यास्ततः परम्॥
श्लोकमन्त्रास्सप्तदश अर्धश्लोकात्मकास्ततः।
एकोनविंशदेवं स्युर्वैश्योक्तिर्विंशतिस्तथा॥

End:

आवृत्त्या त्वधिको मन्त्रस्सावर्णिर्भविता मनुः।
एकोनत्रिंशत्सङ्ख्याका मन्त्रा अन्ते स्मृता बुधैः॥

Colophon:

इति श्रीकण्वस्य काशिवासिनः भट्टगणेशस्य सुतेन गोविन्देन विरचितः कात्यायनीतन्त्रानुसारेण सप्तशतीमन्त्रविभागः॥

No. 8132. सप्तशतीमन्त्रविभागप्रयोगः.
SAPTAŚATĪMANTRAVIBHĀGAPRAYŌGAḤ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 16*a* of the MS. described under No. 5667, wherein this is shown among the other works as Kātyāyanītantra.

Complete. A portion of Kātyāyanītantra.

On the manner of using the stanzas of the Dēvīmāhātmya as Mantras and repeating them so as to produce effects without delay.

Beginning :

यो दुर्गाकवचं हित्वा प्रतिवारं नरेश्वरः ।
स्वदेहयजनं तस्य नरकं प्रति गच्छति ॥
अन्धकश्च महादैत्यो दुर्गाहोमपरायणः । इति ।

अथ प्रयोगाः—

प्रतिश्लोकमाद्यन्तयोः प्रणवं सम्पुटीकृत्य जपेन्मन्त्रसिद्धिर्भवेत् । सप्रणवानुलोमव्याहृतिध्यानादौ । अन्ते तु विलोमेनेत्येवं प्रतिश्लोकं कृत्वा शतकृतपाठ इति शीघ्रसिद्धिर्भवतीति शतचण्डीप्रकारः ।

End :

प्रतिश्लोकम् ऐं बीजसम्पुटितं पल्लवसहितं शतावृत्तौ शतावृतौ चेद्विद्याप्राप्तिर्भवति ॥

इति प्रयोगाः ॥

Colophon :

इति कात्यायनीतन्त्रे मन्त्रविभागः कामनापरत्वेऽर्चनप्रयोगस्समाप्तः ॥

No. 8133. सिद्धयामलतन्त्रम्.
SIDDHAYĀMALATANTRAM.

Pages, 12. Lines, 17 on a page.

Begins on fol. 154*a* of the MS. described under No. 5593.

Paṭalas 1 to 15.

Describes how the image of Gaṇapati is to be made, and gives also particulars regarding the Mantras addressed to that deity, and the various purposes for which the Mantra may be used.

Contains the following Paṭalas :—

१ and २. गणपतिप्रयोगः.
३. गणपतिनिर्माणक्रमः.
४. वश्यप्रयोगः.
५. आकर्षणप्रयोगः.
६. कृत्रिमकर्मप्रयोगः.
७. विद्वेषणक्रमः.
८. उन्मादक्रमः.
९. प्रतिविधिक्रमः.

१०. स्नेहविद्वेषणक्रमः.
११. उच्चाटनक्रमः.
१२. स्तम्भनक्रमः.
१३. स्वप्नगतकार्यपरिज्ञानम्.
१४. प्रतिमाप्रयोगविधिः.
१५. गणपतियन्त्रधारणाविधिः.

Beginning :

नमस्ते नाथ भगवन् शिवाय गुरुरूपिणे ।
गाणपत्यं महामन्त्रं श्रोतुमिच्छामि मे वद ॥

ईश्वर उवाच—

गाणपत्यं महागुह्यं गोपनीयं प्रयत्नतः ।
तथापि तव वक्ष्येऽहं साधिकासि ममाम्बिके ॥
कृष्णाष्टम्यां समारभ्य यावत्कृष्णचतुर्दशी ।
अष्टोत्तरसहस्रन्तु प्रजपेन्नित्यमादरात् ॥
मूलमन्त्रेण तेनैव अष्टोत्तरशतं सुधीः ।
तर्पयित्वा तु मूलेन एकादश तथाहुतीः ॥
कृत्वा रहसि चासीनः मूलमष्टोत्तरं जपेत् ।

* * * *

Colophon :

इति प्रयोगान्तरे सिद्धयामले शक्तिगणपतिविद्यायां गर्भकौलागमे योनिसारतन्त्रे प्रथमः पटलः ॥

End :

शाकिनीभूतबेतालभये सर्वत्र सङ्कटे ।
निर्भयत्वमवाप्नोति नात्र कार्या विचारणा ॥
तद्यन्त्रं धारिणां पुंसां राजस्त्रीजनवश्यदम् ।
सर्वजन्तुवशश्चैव सर्वसौख्यकरं भवेत् ॥

Colophon :

इति श्रीसिद्धयामलतन्त्रे प्रत्यक्षसिद्धिप्रदखण्डे उमामहेश्वरसंवादे गणपतियन्त्रधारणविधिर्नाम पञ्चदशः पटलः ॥

No. 8134. सिद्धारिकोष्ठनिर्णयः.

SIDDHĀRIKŌṢṬHANIRṆAYAḤ.

Pages, 4. Lines, 15 on a page.

Begins on fol. 271*a* of the MS. described under No. 424, and not on fol. 271*b* as shown therein.

Complete.

This is also called Siddhārinirṇaya.

On the method of finding out whether the repetition of a particular Mantra will be beneficial or harmful to the repeater.

Beginning:

नरयन्त्रं समालिख्य सप्तसप्ताद्यतारकाः ।
शिरः पादोऽधरः पृष्ठः स्वामिताराधिगण्यते ॥
शिवस्वामिनमोभृत्यापादातेष्वदरिद्रितः ।
उदरे अर्थलाभं च पृष्ठनिष्ठारमेवच(?) ॥
नृसिंहार्कवराहाणां प्रसादप्रणवस्य च ।
सपिण्डाक्षरमन्त्राणां सिद्धारिं नैव शोधयेत् ॥

* * * *

सिद्धसाध्यसुसिद्धादि प्रादक्षिण्येन योजयेत् ।
सिद्धसिद्धयथोक्तं स्याद्द्विगुणी सिद्धसाध्यतः ॥
तत्सुसिद्धस्तु कालेन तदरिर्हन्ति बान्धवान् ।

End:

सहस्रदलपङ्कजे सकलशीतरश्मिप्रभं
वराभयकराञ्जलिं विमलगन्धपुष्पाम्बरम् ।
प्रसन्नवदनेक्षणं सकलदेवतारूपिणं
स्मरेच्छिरसि रहस्यकं(भासुरं) तदभिधानपूर्वं गुरुः ॥

No. 8135. सिद्धारिकोष्ठप्रकरणम्.

SIDDHĀRIKŌṢṬHAPRAKARAṆAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 71*a* of the MS. described under No. 757.

Incomplete.

Similar to the above

Beginning:

स्वनामाक्षरमारभ्य यावन्मन्त्रादि गण्यते ।
त्रिभिर्वृध्या स्वरैर्भिध्य(द्य)शेषमृणिऋणीभवेत् ॥
मन्त्राद्यक्षरमारभ्य नामाक्षर्यादि गण्यते ।
त्रिभिर्वृध्या स्वरैर्भिद्य शेषमृणिऋणीभवेत् ॥

End:

देशे दुर्गपुरे ग्रामे मन्त्रमौषधदेवता ।
स्वामिनो गुरुभृत्यांश्च रिपुवर्णस्त्वरिष्टदः ॥

No. 8136. सिद्धारिकोष्ठप्रकारः.
SIDDHĀRIKOṢṬHAPRAKĀRAḤ.

Pages, 8. Lines, 9 on a page.

Begins on fol. 120*a* of the MS. described under No. 4384.
Complete.
Similar to the above.

Beginning:

अथ सिद्धारिकोष्ठप्रकारो लिख्यते—
सिद्धसाध्यस्तु सिद्धारिं क्रमाद्ब्रूयो विचक्षणः ।
पूर्वापरक्रमं कृत्वा . . . . . प्रकल्पयेत् ॥

* * * *

क्रमेण ककारादितकारान्तान् षोडश वर्णान् विलिख्य पुनस्तेनैव क्रमेण थकारादिसकारान्तांश्च षोडश वर्णान् विलिख्य ।

End:

नामाद्यक्षरमारभ्य यावन्मन्त्रादिदर्शनम् ।
त्रिधा कृत्वा स्वरैर्हित्वा तदन्यद्विपरीतकम् ॥
कृत्वाधिक ऋणी ज्ञेयः ऋणी चेन्मन्त्रमुत्तमम् ।

* * * *

प्रसिद्धं न च गृह्णीयात् सुप्तो येन च जागृयात् । इति ॥

No. 8137. सिद्धारिचक्रम्.

SIDDHĀRICAKRAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 65*a* of the MS. described under No. 673.

Complete.

The agreeablity of a particular Mantra in relation to one's self is found out with the help of this Cakra.

Similar to the above.

Beginning:

अध्यग्निरुद्रग्रहनेत्रवेदरवेर्दशारिर्वसुषोडशाश्च ।
मन्वन्तरे बाणतुरङ्गपक्षास्त्रयोदश स्युर्वेदवर्णमाह ॥
नामाद्यक्षरमारभ्य यावन्मन्त्रादिवर्णतः ।
सिद्धसाध्यसुसिद्धादि प्रादक्षिण्येन योजयेत् ॥

End:

महाविद्यां च गायत्रीं बालां पञ्चाक्षरीं तथा ।
नारायणं मन्त्रराजं सिद्धारिर्नैव शोधयेत् ॥
नृसिंहार्कवराहाणां प्रासादप्रणवाक्षरम् ।
पिण्डिताक्षरमन्त्राणां सिद्धारिर्नैव शोधयेत् ॥

No. 8138. सिद्धारिचक्रलक्षणम्.

SIDDHĀRICAKRALAKṢAṆAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 62*b* of the MS. described under No. 5885

Incomplete.

Similar to the above.

Beginning:

सिद्धसाध्यसुसिद्धारीन् प्रादक्षिण्येन योजयेत् ।
सिद्धसिद्धौ यथोक्तस्तु द्विगुणस्सिद्धसाध्यतः ॥

सिद्धिस्सुसिद्धसिद्धिस्स्यात् सिद्धारी हन्ति बान्धवान् ।
सुसिद्धसिद्धोऽर्धजपात् साध्यं स्यात्साधितो भवेत् ॥

End:

तदूर्ध्वे बीजसम्बोधं बीजपार्श्वकुरुद्वयम् ।
अग्निजायासमेतं तु साध्यनाम लिखेत्क्रमात् ॥

No. 8139. सिद्धिकरयोगविशेषाः.
SIDDHIKARAYŌGAVIŚĒṢĀḤ.

Pages, 26. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 7991, wherein this has been omitted to be shown among the other works.

On the methods of realising certain desired objects with the help of Mantras and recipes.

Beginning:

[द]दर्श(श)मासान्न जीवन्ति . . . . . . ।
. . . . सश्वं वा शुष्कं वा तालुदेशकम् ॥
बुद्धौ वा भग्नमायाति षण्मासान्ते न जीवति ।
यजते(शयने)यस्य वा नित्यं यूका वा मक्षिकादयः ॥
त्यजन्ते(न्ति) वैरबाधास्यात्(श्च) षण्मासान्ते न जीवति ।
कालज्ञानमिदं ज्ञात्वा तस्य कुर्वीत वञ्चनम् ॥

* * * *

ओं नमस्सर्वभूताधिपतये ग्रस ग्रस शोषय शोषय भैरवि आज्ञापयति स्वाहा । उक्तयोगानामयमेव मन्त्रः ।

अधरं कृकलासस्य सज्जुङ्कारं च मज्जकम् ।
पिष्ट्वा तद्गुलिकां कुर्यात्त्रिलोहेन तु वेष्टयेत् ॥
तां वक्त्रे धारयेद्योऽसौ क्षुत्पिपासा न बाधयेत् ।

End:

कपिकच्छु(च्छु)करोमाणि निक्षिपेत्तत्र बुद्धिमान् ।
तदुल्लङ्घनमात्रेण सर्पो बद्धो भवेद्ध्रुवम् ॥

No. 8140. सीतारामयन्त्रोद्धारः.
SĪTĀRĀMAYANTRŌDDHĀRAḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 37*b* of the MS. described under No. **514.**

Complete.

On the method of drawing the Yantra relating to Sītārāmamantra and of filling it up with the syllables of the Mantra.

Beginning:

नवषोडशबाणविरिञ्चिमुखं गिरिलोचनरुद्रमनुप्रयुतम् ।
रविविश्वसुमङ्गलसु(दं शु)भदं रसरामदशातिथियन्त्रमिदम् ॥
अहिचोरविचार(ण)वैरिहतं ग्रहभूतपिशाचविनाशकरम् ।
विषमज्वररोगनिवृत्तिकरं नवनाथसमाश्चितयन्त्रमिदम् ॥

End:

वेदाग्निवसवश्चैव इन्दुबाणसरन्ध्रकैः ।
नेत्रे मुनिरसाश्चैव यन्त्रो निगलमोचकः ॥

Colophon:

सीतायन्त्रोद्धारं संपूर्णम् ॥

No. 8141. सुदर्शनमन्त्रकल्पः.
SUDARŚANAMANTRAKALPAḤ.

Pages, 12. Lines, 9 on a page.

Begins on fol. 12*a* of the MS. described under No. **124.**

Contains Adhyāyas 9 to 12 complete and 13 incomplete.

On the details connected with the Sudarśanamantra, **such as** its uses, efficacy, the manner of pronouncing it, etc.

९. सुदर्शनमन्त्रोद्धारणम्.	११. मन्त्रमाहात्म्यम्.
१०. सुदर्शनमन्त्रप्रयोगः.	१२. यन्त्रान्तरविधिः.

Beginning:

प्रणम्य देशिकान् सर्वान् वेदान्तार्थविशारदान् ।
सौदर्शनादिमन्त्राणां सङ्ग्रहः क्रियतेऽधुना ॥

6. MANTRAKALPA—(*continued*).

6. MANTRAKALPA—(*continued*).

Venugopalachary

AGENTS FOR THE SALE OF MADRAS GOVERNMENT PUBLICATIONS.

IN INDIA

A. Cambray & Co., Calcutta.
Combridge & Co., Madras.
Higginbotham & Co., Mount Road, Madras.
V. Kalyanarama Iyer & Co., Esplanade, Madras.
G. C. Loganadham Brothers, Madras.
S. Murthy & Co., Kapaleeswar Press, Madras.
G. A. Natesan & Co., Madras.
Nazair Kanun Hind Press, Allahabad.
P. R. Rama Iyar & Co., Madras.
D. B. Taraporevala Sons & Co., Bombay.
Temple & Co., Georgetown, Madras.
Thacker & Co. (Limited), Bombay.
Thacker, Spink & Co., Calcutta.
Thompson & Co., Madras.

IN ENGLAND.

B. H. Blackwell, 50 and 51, Broad Street, Oxford.
Constable & Co., 10, Orange Street, Leicester Square, London, W.C.
Deighton, Bell & Co., Cambridge.
T. Fisher Unwin, 1, Adelphi Terrace, London, W.C.
Grindlay & Co., 54, Parliament Street, London, S.W.
Kegan Paul, Trench, Trübner & Co., 68-74, Carter Lane, London, E.C.
Henry S. King & Co., 65, Cornhill, London, E.C.
P. S. King & Son, 2 and 4, Great Smith Street, Westminster, London, S.W.
Luzac & Co., 46, Great Russell Street, London, W.C.
B. Quaritch, 11, Grafton Street, New Bond Street, London, W.
W. Thacker & Co., 2, Creed Lane, London, E.C.

ON THE CONTINENT

Friedländer & Sohn, 11, Carlstrasse, Berlin.
Otto Harrassowitz, Leipzig.
Karl W. Hiersemann, Leipzig.
Ernest Leroux, 28, Rue Bonaparte, Paris.
Martinus Nijhoff, The Hague, Holland.